४८

Mandukya bhashananda
Giri

मांडूक्यभाष्यानंदगिरी प० ४८

१

Start

श्रीगणेशायनमः॥ ॥परिपूर्णपरिज्ञानपरितृप्तिमतेसते॥ विघ्नवेजिघ्नवेतस्मैकृष्णनामवतेनमः १ शुद्धानंदपदांभोजद्वंद्वंद्वंद्व
तास्पदं॥ नमस्कुर्वेपुरस्कर्तुंतत्वज्ञानमहोदयं २ गौडपादीयभाष्यंहिप्रसन्नमिवलक्ष्यते॥ तदर्थतोऽतिगंभीरंव्याकरिष्येस्व
शक्तितः ३ पूर्वैर्यद्यपिविद्वद्भिःसोव्याख्यानमिहचक्रिरे॥ तथापिमंदबुद्धीनामुपकाराययत्यते ४ श्रीगौडपादाचार्यस्यनाराय
प्रसादतःप्रतिपन्नान्मांडूक्योपनिषदर्थाविष्करणपरानविश्लोकानाचार्यप्रणीतान्व्याचिख्यासुर्भगवान्भाष्यकारःचिकी का
र्षितस्यभाष्यस्याविघ्नपरिसमाप्त्यादिसिद्धयेपरदेवतातत्त्वानुस्मरणपूर्वकंतन्नमस्कारलक्षणंमंगलाचरणंशिष्टाचार
प्रमाणकंमुखतःसमाचरन्नर्थादपेक्षितमभिधेयाद्यनुबंधमपिसूचयति प्रज्ञानेत्यादिना तत्रविधिमुखेनवस्तुप्रतिपा
दनमितिप्रक्रियांप्रदर्शयति यत्परंब्रह्मतत्त्वतोऽस्मीत्यस्मदर्थस्यतदैक्यस्मरणरूपंनमनंसूचयताब्रह्मणाऽस्मदर्थस्य
प्रत्यक्त्वंसूचितमितितत्त्वमर्थयोरैक्यंविषयोध्वनितः पक्षद्वयस्यप्रसिद्धावद्योतकत्वाद्वेदांतसिद्धं यद्ब्रह्मतत्त्वतोऽस्मीतिसंबंधे
नमंगलाचरणमपिक्रियतेब्रह्मणोऽद्वितीयत्वादेवजननमरणाकारणाभावान्मृतमजमितिसूक्तेजननमरणप्रबंधस्य ६८
संसारत्वान्निष्प्रपंचस्वतोऽसंसारित्वंदर्शयताऽसंसारानर्थनिवृत्तिरिहप्रयोजनमितिद्योतितं यद्वाऽद्वितीयंस्वतोऽसंसारिब्रह्म
वेदांतप्रमाणकंतर्हिकथमवस्थात्रयविशिष्टाजीवाभोक्तारोऽनुभूयंतेभोजयिताचेश्वरःश्रूयतेभोज्यंचविषयजातंप्रत्यक्षमुपल
भ्यतेतदेतदद्वैतेविरुध्यतेइत्याशंक्यब्रह्मण्येवजीवजगदीश्वरश्रुतिःसर्वंकाल्पनिकंसंभवतीत्यभिप्रेत्याह प्रज्ञानेति प्रकृ
ष्टंजन्मादिविक्रियाविरहितंकूटस्थंज्ञानंज्ञप्तिरूपंवस्तुप्रज्ञानंतच्चब्रह्मप्रज्ञानंब्रह्मेतिश्रूयतेतस्यांशवोरश्मयोजीवाश्चिदाभा
साःसूर्यप्रतिबिंबकल्पानिरूप्यमाणेबिंबकल्पाद्ब्रह्मणो भेदेनासंतःतेषांप्रतानाविस्तारास्तैरपर्यायमेवाशेषशरीरव्यापि
भिस्तदेवाहस्थिरेति स्थिरावृक्षादयश्चरामनुष्यादयस्तेषांनिकरःसमूहःतंव्याप्तुंशीलमेषामितितथातैरितियावत्लोकालो
क्यमानविषयाःतान्व्याप्येतिविषयसंबंधोक्तिस्तत्फलंकथयतिभोगाःसुखदुःखादिसाक्षात्कारास्तेषांस्थविष्ठत्वंस्थूलत
903 मत्वंदेवतानुगृहीतबाह्येंद्रियद्वाराबुद्धेस्तत्तद्विषयाकारपरिणामजन्यत्वंतान्भुक्त्वास्वपितीतिसंबंधःएतेनजागरितंब्रह्म
णिकल्पितमुक्तं तत्रैवस्वप्नकल्पनांदर्शयति पुनरपीति जाग्रद्धेतुधर्माधर्मक्षयानंतर्यंपुनःशब्दार्थःस्वप्नहेतुकर्मोद्भवेच
सतीत्यपिनोच्यते॥ नचतत्रबाह्यानींद्रियाणिस्थूलाविषयाश्चसंतिकिंतुधिषणाशब्दितबुद्ध्यात्मानोवासनात्मानोविषया
भासंतेताननुभवन्स्वपितीत्यर्थःतेषांसाधकमुपन्यस्यति कामजन्यानिति कामग्रहणंकर्मविद्ययोरुपलक्षणार्थंअवस्था

मां।४
११०

द्वयकल्पनां ब्रह्म लिदर्शयित्वा तत्रैव सुषुप्तिकल्पनां दर्शयति प्रीत्येति सर्वे विशेषाः स्थूलाः सूक्ष्माश्च जागरितस्वप्नरूपा
स्तानूपीतासां मिश्रअज्ञाने विलाप्य स्वपितीति कारणभावेन तिष्ठतीत्यर्थः तत्रानंदप्राधान्यमभिप्रेत्य विशिनष्टि मधुरभुगि
ति।।अवस्थात्रयस्य मायाकृतस्य मिथ्याभूतस्य प्रतिबिंबकल्पेष्वस्मासु संबंधितामिवापाद्यास्मान्भोजयन्ब्रह्मैवेति तत्र
तो ब्रह्म एवं वाव स्थात्रयं तद्द्रष्टारो जीवाः मायावि ब्रह्म च परिशुद्धे परिकल्पितं सर्वमित्याह मायथेति तस्यैव ब्रह्मणोऽवस्थात्रया
तीतत्वेन वि ज्ञप्तिमात्रत्वं दर्शयति तुरीयमिति चतुर्णां पूरणं तुरीयमिति व्युत्पत्तेः ब्रह्मणस्तुरीयत्वेन निर्देशात्प्राप्तं सद्वितीयत्वमि
सा ज्ञे वं कल्पितस्थानत्रयसंख्यापेक्षया तुरीयत्वं न सद्वितीयत्वेनेत्याह मायेति मायावित्वेन निकृष्टत्वमाशंक्योक्तं परमि
-ति मायाद्वारा ब्रह्मणस्तत्संबंधेपि स्वरूपद्वारा न तत्संबंधोस्तीति कुतो निकृष्टतेत्यर्थः विधिमुखेन वस्तुप्रतिपादनप्रक्रियाम
वलंब्य तदर्थेनोपक्रम्य तस्य त्वमर्थप्रत्यगात्ममात्रत्वं उक्तं अभिधेयफलोक्त्या संबंधाधिकारिणौ च सूचितौ संप्रति प्रतिषेध
द्वारा वस्तुप्रतिपादनप्रक्रियामाश्रित्य त्वमर्थेनोपक्रम्य तस्य तदर्थासंसारिब्रह्ममात्रत्वं प्रत्याययति योविश्वात्मेति तत्र त्वमर्थः स्व
तसिद्धः स्विद्धातुः सर्वनाम्ना परामृश्यते तस्मिन्जागरितमारोपितं तमुदाहरति विश्वात्मेति विश्वं पंचीकृतपंचमहाभूततत्कार्यात्म
कं स्थूलं जगद्वैराजं शरीरं तस्मिन्जागरिते चाहं ममेत्यभिमानवानित्यर्थः तस्यार्थक्रियामुपन्यस्यति विधिजेति विधीयत इति विधि
र्धर्मो नेत्यनुबंधेन ततो व्यतिरिक्तोऽविधिरधर्मस्ताभ्यां धर्माधर्माभ्यामविद्याकामप्रसूताभ्यां विषयाः शब्दादयो जन्यंते तानभोगम
ज्यतया भोगशब्दितानादित्याद्यनुग्रहीतबाह्येंद्रियद्वारकबुद्धिपरिणामगोचरतया स्थूलतमान्प्राश्य साक्षादनुभूयास्थितोऽ
यं प्रत्यगात्मेत्यर्थः तत्रैव स्वप्नावस्थामध्यस्यति पश्चाच्चेति जाग्रद्धेतुकर्मक्षयानंतरं स्वप्नहेतुकर्मोद्भवे च सति स्थूलेभ्यो विषयेभ्यः
अन्यानस्मादेव हेतोः सूक्ष्मान्बाह्येंद्रियाणामुपरतत्वात् अविद्याकामकर्मप्रेरितात्मीयमतिप्रभवादेव प्रसूतानंतःकरणात्म
नो वासनामयानादित्यादिज्योतिषामस्तमितत्वादात्मभूतेनैव ज्योतिषा विषयीकृताननुभूयाऽपंचीकृतपंचमहाभूततत्का १
र्यात्मकं सूक्ष्मं प्रपंचदेहरूपं हिरण्यगर्भशरीरं स्वप्नस्थानं चाभिमन्यमानस्तैजसो भवतीत्यर्थः तत्रैव सुषुप्तिकल्पनां दर्शयति सर्वाणीति
स्थूलसूक्ष्मविभागेन स्थानद्वयावच्छिन्नान्प्रकृतानेतानशेषानपि विशेषाननुपाधिद्वयभूताननुपाधिद्वयद्वारकस्थानद्वयसंचार
प्रयुक्तश्रमोद्भवानंतरं तस्यापि परिजिहीर्षया शनैरनुक्रमेणाक्रमेण वा स्वात्मन्यज्ञाते कारणात्मनि स्थापयित्वोपसंहृत्या
व्याकृतप्रधानः सन्प्राज्ञो भवतीत्यर्थः तस्यैव प्रत्यगात्मनः स्थानत्रयविशिष्टस्यानंतः प्राज्ञं न बहिःप्रज्ञमित्यादि प्रतिषेधशा

स्वप्रसूतप्रमाणाज्ञानसमारूढस्य सर्वानर्थविशेषान् कार्यकारणरूपान् प्रमाणप्रभवादेव हित्वा निरुपाधिपरिपूर्णपरि
ज्ञानपरमात्मस्वरूपेण परिनिष्पन्नं तत्त्वं कथयतीति द्वितीयेति प्रथमश्लोकेन प्रदर्शितप्रमाणस्य प्रत्यूहप्रवाहप्रशमनात्मके
प्रयोजने स्थाने त्रयकल्पनातीतपरवस्तु प्रयुक्तं प्रार्थ्यते द्वितीयेन पात्विति नोऽस्मान् व्याख्यातृत्वेन श्रोतृत्वेन च व्यवस्थितान्
पुरुषार्थपरिपंथिकृतकारणनिरासपुरःसरं परमात्माऽपराकृताशेषकल्पनो नित्यविज्ञप्तिस्वभावो मोक्षप्रदानेन तद्धेतुज्ञानदा
नेन च परिरक्षतादित्यर्थः केचित्तु प्रकरणचतुष्टयात्मनो ग्रंथस्य वेदांतैकदेशसंबंधत्वज्ञापनार्थं निःप्रपंचवाक्यप्रतिपाद्यब्र
ह्म प्रथमश्लोकेन सूचितं द्वितीयेन मांडूक्यश्रुतिव्याख्यानरूपेणाद्यप्रकरणेन प्रणवमात्राणां मात्रापादानां चैकीकरणेन प्र
तिपाद्यं ब्रह्म सूचितमिति मन्यंते न चाद्वितीयश्लोके चतुर्थपादे वृत्तलक्षणाभावादसंगतत्वमाशंकनीयं गाथालक्षणस्य तत्र
सुसंपादितत्वादिति इष्टमं अन्ये त्वाद्यश्लोकं मूलश्लोकांतर्भूतमभ्युपगच्छंतो द्वितीयश्लोकं भाष्यकारप्रणीतमभ्युपयंति तदस
दुत्तरश्लोकेऽपि वाद्यश्लोके भाष्यकृतो व्याख्यानप्रणयनप्रसंगात् ॐमित्येतदक्षरमित्यादिभाष्यविरोधात् अपरे पुनराद्ये
नश्लोकेन शास्त्रप्रतिपाद्यपरदेवतातत्त्वानुस्मरणद्वारेण नमस्क्रिया प्रकरणप्रारंभोपयोगित्वेन क्रियते परदेवताभक्तिवद
स्य परदेवताभक्तेरपि विद्याप्राप्त्यंतरंगत्वं शास्त्रीयस्य शिष्याशिक्षायै ज्ञापनार्थमवश्यं त्वयातीतानित्यसिद्धविज्ञानमूर्तेरा
चार्यान्मोक्षोपायिकज्ञानप्राप्तिराचार्यवान् पुरुषो वेदेत्यादिश्रुत्यवष्टंभेन मुमुक्षुणा प्रार्थ्यते द्वितीयेन श्लोकेनेति कल्पयंति
यदुद्दिश्य मंगलाचरणं कृतं तन्निर्दिष्टमादौ व्याख्येयस्य प्रतीकं गृह्णाति ॐमित्येतदिति ॐमित्येतदक्षरमित्यादिप्रकरण
चतुष्टयविशिष्टमिदमारभ्यते व्याख्यायते अस्माभिरित्युद्देश्यं प्रतिजानीते किमिदं शास्त्रत्वेन प्रकरणत्वेन वा व्याविख्यासि
तं नाद्यः शास्त्रलक्षणाभावादस्याशास्त्रत्वादेकप्रयोजनोपनिबद्धाशेषार्थप्रतिपादकं हि शास्त्रमत्र च मोक्षलक्षणैकप्र
योजनवत्त्वेऽपि नाशेषार्थप्रतिपादकत्वं न द्वितीयः प्रकरणलक्षणाभावादित्याशंक्याह वेदांतेति शास्त्रं वेदांतशास्त्रार्थस्तस्या
धीधिकारिनिर्णयगुरूपसदनपदार्थद्वयतदैक्यविरोधपरिहारसाधनफलाख्यं तत्र सारो जीवपरैक्यं तस्य सम्यक् संग्रहः संश संग्रहः४
यविपर्यासादिप्रतिबंधव्युदासेन तदुपायोपदेशो यस्मिन् प्रकरणे तत्तथेति यावत् तथा च शास्त्रैकदेशसंबद्धं शास्त्रकार्यां
तरे स्थितं इदं प्रकरणत्वेन व्याख्यातुमिष्टं निर्गुणवस्तुमात्रप्रतिपादकत्वात्तत्प्रतिपादनसंक्षेपस्य च कार्यांतरत्वात् प्रकरण
लक्षणस्य चात्र संपूर्णत्वादित्यर्थः प्रकरणत्वेऽपि निर्विषयत्वादिप्रयुक्तमव्याख्येयत्वमाशंक्याह अत एवेति प्रकरणत्वादेव

मा० भा
व्या०

प्रकृतशास्त्रात् भेदेन संबंधादीनामवाच्यत्वेपि प्रकरणप्रवृत्त्यंगतया तानि तैर्नैव इत्यं वक्तव्यानीत्याशंक्य शास्त्रीयसंबंधादी
नां तदीये प्रकरणेर्थात्प्राप्तत्वान्नास्ति वक्तव्यत्वमर्थपुनरुक्तिरित्याह । यान्येवेति । श्रोतारो हि शास्त्रीयं प्रकरणं प्रतिपद्यमा
नाः शास्त्रीयाण्येव संबंधादीन्यत्र वचनाभावेपि बुध्यमानाः प्रवृत्तिं तस्मिन् प्रकुर्वंतीत्यर्थः । नहि प्रकरणकर्त्तृवदेव तद्भाष्य
कृतापि विषयादीनामत्रावक्तव्यत्वात् भाष्यकृतो विषयाद्युपन्यासोऽव्याख्यास्यादित्याशंक्याह । तथापीति । प्रकरणकर्त्तुर
वक्तव्यान्यपि तद्भाष्यकृता तानि संक्षेपतो वक्तव्यानीति व्याख्यातृणां मतं द्योत्यं त्वनुक्तत्वे तेष्वनाश्वासाद्वीकावकाद्यो
दित्यर्थः । भाष्यकृता प्रयोजनादीनां वक्तव्यत्वे सिद्धे शास्त्रप्रकरणयोर्मोक्षलक्षणप्रयोजनवत्त्वं प्रतिजानीते । तत्रेति । प्रयोज
नवच्छास्त्रमिति संबंधः । शास्त्रमहत्वं प्रकरणोपलक्षणार्थं मोक्षलक्षणं फलं ब्रह्मज्ञानस्येष्यते न शास्त्रप्रकरणयोरित्या
शंक्याह । साधनेति । स च मोक्षस्य साधनं ब्रह्मात्मैकत्वज्ञानं तस्य जनकं शास्त्रादि तद्भावेन ज्ञानव्यवधानेन मोक्षफलवद्भवति
शास्त्रादीत्यर्थः । तथापि ब्रह्मणा विषयेण संबंधो वेदांतानामेवेष्यते तत्कथमभिधेयसंबंधं शास्त्रादीत्याशंक्य ब्रह्मविचार
मंतरेण तज्ज्ञानजनकत्वायोगात् ज्ञानजननद्वारा विषयसंबंधसिद्धिरित्याह । अभिधेयेति । उक्तं ज्ञानव्यवहितं प्रयोजनादि
शास्त्रादेरुपसंहरति । पारंपर्येति । तत्र संबंधो ब्रह्मज्ञानं शास्त्रादिना जन्यमेव स्ययोग्यव्यवच्छेदादुक्तं शास्त्रादिनैव जन्यमेव
स्यन्ययोगव्यवच्छेदात् विषयापि दर्शितः । यदुक्तं प्रयोजनवत्त्वं तदाक्षिपति । किं पुनरिति । साध्यत्वे स्वर्गवदनित्यत्वं नित्यत्वे साध
नानर्थेनत्वान्न तादर्थ्येन शास्त्रादि प्रयोक्तव्यमित्यर्थः । मोक्षस्यात्मरूपत्वान्नानित्यत्वं नापि साधनानर्थक्यं स्वरूपभूतमोक्षप्र
तिबंधनिवर्तकत्वेनार्थवत्त्वादित्युत्तरमाह । उच्यत इति । यथा देवदत्तस्य ज्वरादिना रोगेणाभिभूतस्य स्वच्छतास्वरूपादप्रच्युति
रूपास्वरूपभूतैव प्रागपि सती रोगप्रतिबद्धा सती वस्तुतश्चिकित्साशास्त्रोपायप्रयोगवशात् प्रतिबंधभूतरोगापगमे
सत्यभिव्यज्यते । नहि तत्रोपायवैयर्थ्यं प्रतिबंधध्वंसार्थत्वान्नचानित्यत्वं स्वच्छतायाः शंक्यते तस्मात्तदसाध्यत्वादित्युक्ते
र्थे दृष्टांतमाह । रोगार्त्तस्येति । यथोदितदृष्टांतानुरोधादात्मनः स्वतः समुत्थवानिरिवलदुःखस्य निरतिशयानंदैकतानस्या
पि स्वाविद्याप्रसक्तानाहंकारादिद्वैतप्रपंचसंबंधादात्मनि दुःखमारोप्याहं दुःखी सुखं मया प्राप्तव्यमिति प्रतिपद्यमानस्य परम
कारुणिकाचार्योपदिष्टवाक्योत्थाद्वैतविद्यातो द्वैतनिवृत्तौ प्रतिबंधप्रध्वंसे स्वभावभूतापरमानंदता निरस्तसमस्तानर्थ
तावस्तारस्येनाभिव्यक्ता भवति । सा च स्वच्छता परिपूर्णावस्तुभावान्नातिरिच्यते । तदिदं शास्त्रीयं प्रयोजनं तस्य वस्तुरूपत्वं

साध्यत्वान्नानित्यत्वं शंकितव्यं | न च साधनवैयर्थ्यं | प्रदर्शितप्रतिबंधनिवृत्तिफलत्वादिति | द्वार्थमिति कमाह | तथेति | ननु द्वैतस्याहं
कारादेरनात्मनो वस्तुत्वात् वस्तुनश्च विद्यानपोह्यत्वान्नित्यनैमित्तिककर्मायत्तत्वान्निवृत्तेरलं विद्यार्थेन प्रकरणारंभेणेति तत्राह | द्वैते
ति | आत्माविद्याकृतस्यात्माविद्यया कारणनिवृत्त्या निवृत्तेरात्मविद्याभिव्यक्तये शास्त्रारंभो युज्यते न च द्वैतस्याविद्याकृतत्वे
प्रमाणमस्तीत्याशंक्यान्वयव्यतिरेकानुविधायिनीं श्रुतिमुदाहरति | यत्रेति | इव शब्दाभ्यामविद्यावस्थायां प्रतिभातं द्वैतस्य
तत्प्रतिभानस्य त्वाभासत्वेनाविद्यामयत्वमुच्यते | आत्मैवाभूदिति विदुषो विद्यावस्थायां कर्तृकरणादि सर्वमात्ममात्रं नाति
रिक्तमस्तीत्युक्त्वा | विद्याद्वारा सर्वस्य द्वैतस्यात्ममात्रत्ववचनाद्विद्यानिमित्ता कार्यकारणात्मकद्वैतनिवृत्तिरात्मैवेत्यभिलप्य
तेतथा च विद्यातो द्वैतनिवृत्तिनिर्देशात् तस्याविद्यात्वमवद्योत्यते | आदिशब्दोपेनेह नानेत्यधिष्ठाननिष्ठात्यंताभावप्रतियोगित्वं
द्वैतस्याभिदधत् तथा कथं वा तदारंभणवाक्यं च गृहीतं | अस्यार्थस्येति | द्वैतगताविद्याकृतत्वस्येत्यर्थः | विषयप्रयोजनाद्यनुबं
धोपन्यासमुखेन ग्रंथारंभे स्थिते सति | आदौ प्रकरणचतुष्टयस्य प्रत्येकमसंकीर्णप्रमेयं प्रतिपत्तिसौकर्यार्थं सूचयित
व्यमित्याह | तत्र तावदिति | ॐकारप्रकरणस्यासंकीर्णप्रमेयं संगृह्णाति | ॐकारेति | तन्निर्णयप्रकरणमारब्धमित्ययुक्तं
तन्निर्णये प्रमाणाभावात्तस्य चानुपयोगित्वादात्मप्रतिपत्तिर्हि पुरुषार्थोपयोगिनीत्याशंक्यागमेत्यादिविशेषणद्वयं तस्य
धानमांडूक्योपनिषद्व्याख्यानरूपत्वेन तत्र प्रामाण्यादुक्तो निर्णयः सेत्स्यतीति | न त्विदं युक्तिप्रधानं युक्तिलेशस्य सतोपि गुणप
त्वादप्रधानत्वात् न चायमोंकारनिर्णयो नोपयुज्यते | यदात्मनस्तत्त्वमनारोपितरूपं तत्प्रतिपत्तावुपायत्वात्तत्प्रतिपत्तेश्च श्रु
मुक्तिफलत्वात् तस्याद्यप्रकरणमोंकारनिर्णयायांतरफलद्वारेण तद्द्वारेण चैतत्त्वज्ञानपरमफले पर्यवस्यतीत्युपदेशादर्थ शव १
गंतव्यमित्यर्थः | वैतथ्यप्रकरणस्यावांतरविषयविशेषं दर्शयति | यस्येति | आरोपितनिषेधे सति अनारोपितप्रतिपत्तिः स्या
न्मा विविक्ते सत्र दृष्टांतमाह | रज्ज्वामिवेति | हेतुतो दृश्यत्वाद्यंतवत्त्वादियुक्तिवशादित्यर्थः | अद्वैतप्रकरणस्यार्थविशेषमुप मा
न्यस्यति | तथा अद्वैतस्यापीति | तस्यापि द्वैतवदवस्तुत्वानुपपत्त्या मिथ्यात्वप्रसंगः शंकाने तस्मात्तस्यामोपाधिकभेदाद्यव
स्थायाः सुस्थत्वाद्व्यभिचारादियुक्तिवशाद्द्वैतस्य पारमार्थिकत्वं प्रतिपादयितुं तृतीयं प्रकरणमित्यर्थः | अलातशांतिप्रक
रणस्यार्थविशेषं कथयति | अद्वैतस्येति | तस्य तथात्वमबाधितत्वेन वस्तुत्वं तत्प्रतिपक्षत्वं पक्षांतराणामित्यत्र हेतुमाह | वैद
कानीति | तेषां निराकार्यत्वे हेतुमाह | अतथाभूतत्वेनेति | मिथ्याद्वैतनिष्ठत्वेनेत्यर्थः | तदुपपत्तिभिरेव निराकरणे हेतुमाह | अन्योन्य

मा०भा०
आ०

त्रिपक्षांतरप्रतिषेधमुखेनाऽद्वैतमेव द्रढयितुं अंत्यं प्रकरणमित्यर्थः ॐकारनिर्णयद्वारेणात्मप्रतिपत्त्युपायभूतमाद्यं प्रकरणमि
त्युक्तं तन्निर्णयस्य तद्धीहेतुत्वायोगादात्मोंकारवत्त्वेऽर्थांतरज्ञानमर्थांतरज्ञाने व्याप्तिमंतरेणोपयुज्यते न चात्र धूमाग्न्योरिव व्याप्तिरूप
लभ्यते न चास्य कार्यत्वमोंकारस्य युक्तमाकाशादेरविशेषात् तस्य च सर्वात्मकत्वेनात्मवत् तत्कार्यत्वव्याघातादिति मन्वानः सन्नथ
मप्रकरणार्थं प्रयुक्तमाक्षिपति कथमिति न वयमनुमानाद्यपेक्षं भाद्योंकारनिर्णयमात्मप्रतिपत्त्युपायमभ्युपगच्छामः येन व्याप्त्यभा
वो दोषमावहेत् किंतु श्रुतिप्रामाण्यात् तन्निर्णयस्तद्धीहेतुरिति परिहरति उच्यत इति तत्र मृत्युना नचिकेतसं प्रति ॐमित्येतदित्य
नेन वाक्येन ब्रह्मत्वेन ॐमित्येतदुपदिष्टं समाहितेनोंकारोच्चारणे यद्धृतत्वं स्फुरति तदोंकारसामीप्यादेव शाखाचंद्रन्यायेनोंकार
शब्देन लक्ष्यते तेन लक्षणयोंकारनिर्णयो ब्रह्मधीहेतुरिति विवक्षित्वा श्रुतिमुदाहरति ॐमित्येतदिति प्रतिमायां विष्णुबुद्धिवदोंका
रो ब्रह्मबुद्ध्योपास्यमानो ब्रह्मप्रतिपत्त्युपायो भवतीत्यभिप्रेत्य वाक्यांतरं पठति एतदालंबनमिति किंचायमोंकारो यदा परापरब्रह्म
दृष्ट्योपास्यते तदा तज्ज्ञानोपायतामुपारोहतीति मत्वा पुनः श्रुतिं दर्शयति एतद्धेति किंच समाधिनिष्ठो यदोमित्युच्चार्यात्मानम
नुसंधत्ते तदा स्थूलमकारमुकारे सूक्ष्मे तं च कारणे मकारे तमपि कार्यकारणातीते प्रत्यगात्मन्युपसंहरत्यतस्तन्निष्ठो भवतीति तत्र
नेन प्रकारेणोंकारस्य तत्प्रतिपत्त्युपायतेति विध्यंतरेणाह ॐमित्यात्मानमिति किंच यो यं स्थाणुः स पुमानितिवद्यदेतदोमित्यु
च्यते तद्ब्रह्मेति बाधायां सामानाधिकरण्येन समाहितो ब्रह्म बोध्यते तथा च युक्तमोंकारस्य ब्रह्मज्ञानहेतुत्वमित्याह ॐमिति
ब्रह्मेति किंच सर्वास्पदत्वादोंकारस्य ब्रह्मणा श्रुतथात्वादेव लक्षणत्वादन्यत्वासिद्धेरोंकारप्रतिपत्तिर्ब्रह्मप्रतिपत्तिरेवेत्याह ॐ
कार एवेति ॐमितीदं सर्वमित्यादिवाक्यांतरसंग्रहार्थमादिपदमित्यादिश्रुतिभ्यो ब्रह्मप्रतिपत्त्युपायत्वमोंकारस्य प्रमितमि
६ स्यानु तिशेषः ननु गतप्रतिभासे सन्मात्रे चिदात्मनि प्राणादिविकल्पस्य कल्पितत्वादात्मनः सर्वास्पदत्वं न पुनरोंकारस्य तदस्ये
ननुगमादित्याह रज्ज्वादिरिवेति यथा रज्जुः शुक्तिरित्यादिरधिष्ठानविशेषः सर्पो रजतमित्यादिविकल्पस्यास्पदोऽभ्युपग ३
तस्तथाऽऽत्माद्वयत्वान्मिथ्यात्वहेत्वभावात्परमार्थसन् स्वभावो वक्ष्यमाणस्तस्य प्राणादिविकल्पस्यास्पदोऽभ्युपगम्य
ते यथैव दृष्टांतस्तथैव प्राणादिरात्माविकल्पो यस्तद्विषयः सर्वो वाक्प्रपंचो यथोक्तोंकारमात्रात्मकः तदास्पदो गम्य
नु ते न च जगतोंकारस्यानुगमः ॐकारेण सर्वा वाक् संतृण्णेति श्रुतेरतो युक्तमोंकारस्य सर्वास्पदत्वमित्यर्थः नन्वर्थजा
ग तस्यात्मास्पदत्वादोंकारास्पदत्वाच्च वाक्प्रपंचस्य प्राप्तमास्पदद्वयमिति तन्नेत्याह स चेति आत्मवाचकत्वे विनास्त्योंकारस्या

शब्दस्यार्थबोधकत्वानुपपत्तेः

न्नमात्रत्वं तद्वाचकस्य तन्मात्रत्वमिति व्याप्त्यभावात् प्राणादेरात्मविकल्पस्याभिधानव्यतिरेकदर्शनादित्याशंक्याह । ओंकारेति ।
तस्य विकारः सर्वो वाग्विशेषः । अकारो वै सर्वा वागिति श्रुतेरोंकारस्य च तत्प्रधानत्वात्तेन प्राणादिशब्देन वाच्यः प्राणादिरात्मवि
कल्पः सर्वः स्वाभिधानव्यतिरेकेण नास्ति तत्त्वाभिधानं प्राणादिशब्दविशेषात्मकमोंकारविकारभूतमोंकारव्यतिरेकेण न संभवती
त्योंकारमात्रं सर्वमिति निश्चीयते आत्मनोपि तद्वाच्यस्य तन्मात्रत्वाभिधानादित्यर्थः । शब्दव्यतिरिक्तार्थाभावे शब्दस्य शब्दत्वानुपपत्तेः
एकत्र विषयविषयित्वायोगान्निर्विकल्पे सन्मात्रे वस्तु वाच्यवाचकविभागशून्ये पर्यवस्यतीत्यभिप्रेत्य कार्यस्य वस्तुतः सत्त्व[illegible]
प्रमाणमाह वाचारंभणमिति । कार्यस्य सर्वस्यैवं मिथ्यात्वेपि कथमोंकारनिर्णयस्य ब्रह्मप्रतिपत्त्युपायत्वसिद्धिरित्याशंक्याह । तदस्ये
ति । तदिदं विकारजातमस्य ब्रह्मणः संबंधि वाच्यसामान्यरूपयातेस्पाष्टसारितं रज्जुतुल्यासितं बद्धव्याप्तमिति संबंधः । शब्दसा
मान्येनार्थसामान्यस्य व्याप्तावपि कथमर्थविशेषस्य शब्दविशेषव्याप्तिरित्याशंक्याह । नामभिरिति । शब्दविशेषैर्दामभिर्दाम
स्थानीयैर्विशेषरूपमपीदमर्थजातं व्याप्तं वक्तव्यन्यायस्य तुल्यत्वादित्यर्थः । उक्तमर्थं समर्थयते । सर्वं हीति । इदं हि सर्वं सामा
न्यविशेषात्मकमर्थजातं सामान्यविशेषरूपेण नामधानीयते व्यवहारपथं प्राप्यते तेन नामनीत्युच्यते । तदेवं वागनुरक्तबुद्धि
बोध्यत्वात् वाङ्मात्रं सर्वं वाग्जातं च सर्वमोंकारानुविद्धत्वादोंकारमात्रं सच्चोंकारो लक्षणादिना ऽत्मधीहेतुरित्याद्यप्रक
रणारंभः संभवतीत्यर्थः । तद्यथा शंकुनेति श्रुतिसंग्रहार्थमादिपदं प्रतिज्ञातप्रथमप्रकरणार्थसिद्धिरिति शेषः । अर्थमुप
पाद्य तस्मिन्नर्थे श्रुतिमवतारयति । ओमित्याहेति । श्रुतिं व्याचष्टे यदिदमिति । तदिदं सर्वमोंकार एवेति संबंधः । अभिधानस्या
भिधेयतयाव्यवस्थितमर्थजातमोंकार एवेत्यत्र हेतुमाह । तस्येति । तथापि पृथगभिधानभेदः स्थास्यति नेत्याह । अभिधानस्ये
ति । वाच्यं वाचकं च सर्वमोंकारमात्रमित्यभ्युपगमेपि परं ब्रह्म पृथगेवस्थास्यतीत्याशंक्याह । परं चेति । यद्धि परं कारणं ब्रह्म
तच्चेदवगम्यते तदा किंचिदभिधानं तेनेदमभिधेयमित्येवमात्मकोपायपूर्वकमेव तदधिगमो ऽभिधेयं च स्वाभिधानाव्यति
मात्र रिक्तं तस्तु नरोंकारमित्युक्तत्वात्तद्वाच्यं ब्रह्मापि वाचकाभिन्नं तन्मात्रमेव भविष्यति यत्र तु कार्यकारणातीते चिन्मात्रे वाच्य
वाचकविभागो व्यावर्त्यते तत्र नास्त्योंकारमात्रत्वमोंकारेण लक्षणया तदवगमोंऽशीकारादित्यर्थः । तस्येत्यादिश्रुतिम
वतार्य व्याकरोति । तस्येति भूतमित्यादिश्रुतिं गृहीत्वा व्याचष्टे । कालेति । वाच्यस्य वाचकाभेदात्तस्य चोंकारमात्रत्वादित्यु
क्तो न्यायः कालत्रयातीतमोंकारातिरिक्तं जडं वस्तु नास्त्येव प्रमाणाभावादित्याशंक्याह । कार्याधिगम्यमिति । अव्याकृतं स
भासमज्ञानमनिर्वाच्यं तन्न कालेन परिच्छिद्यते कालं प्रत्यपि कारणत्वात्कार्यस्य कारणात्पश्चाद्भाविनो न प्रागभावि का
रणपरिच्छेदकत्वं संगच्छते ऽस्त्र त्वा मादिपदेन गृह्यते । तदपि कालेन परिच्छेत्तुं शक्यते । स संवत्सरो ऽभवन्नह पुरा ततः

मा० भा०
आ०

संवत्सरः आस्तेति तस्मात्कालोत्पत्तिश्रुतेस्तदपि सर्वमोंकारमात्रं वाच्यवाचकाव्यतिरिक्तत्वात्पादित्यर्थः। अभिधा
नाभिधेययोरेकत्वमित्रैव सति कल्पितेत्वेन तदेकरूपत्वस्योक्तत्वात् किमिति पुनः सर्वं हेतुद्वयमित्युच्यते। तत्र वृत्तानुवादपूर्वक
मुत्तरवाक्यस्य प्रफलं तात्पर्यमाह। अभिधानेत्यादिना। वाच्यस्य वाचकत्वोत्पत्तेर्यवतयोरेकत्वे सिद्धे व्यतिहारनिर्देशो वृथेत्याशंक्य
हेतुरथेति॥ वाच्येन वाचकस्यैक्यमनुक्त्वा वाचकेनैव वाच्यस्यैक्यवचने सत्युपायोपेयप्रयुक्तमेकत्वेन मुख्यमैक्यमित्याशंक्य
तत्तच्चिवस्यर्थं व्यतिहारवचनमर्थवदित्यर्थः। परस्परमभेदोपदेशादभिधानाभिधेययोरेकत्वप्रतिपत्तिरस्तु सा किंफला ब्रह्म
प्रतिपत्त्युपयोगित्वादित्याशंक्याह। एकत्वेति। अभिधानाभिधेययोरेकत्वप्रतिपत्तेः भेदप्रयोजनं यदेकेनैव प्रयत्नेन द्वयमपि
विलापयन् उभयविलक्षणं ब्रह्म प्रतिपद्य निर्वृणोतीति योजना। अभिधानाभिधेययोर्व्यतिहारोपदेशं वाक्यशेषमनुकूलय श्री
न् तथा चेति। उक्ते वाचकस्य वाच्याभिन्नत्वे वाक्यमवतारयति। तदाहेति। सर्वकार्यकारणं चेत्यर्थः। आत्मपाः श्रुत्युपदिष्टस्य
परोक्षत्वं व्यावर्तयति। तद्वेति। यद्ब्रह्मश्रुत्या सर्वात्मकमुक्तं तत्परोक्षमिति मंतव्यं। किंतु अयमात्मेति योजना। चतुष्पात्त्वेन वि
श्वतैजसप्राज्ञतुरीयत्वेनेत्यर्थः। अभिनयो नाम विवक्षितार्थप्रतिपत्त्यर्थमसाधारणः शारीरो व्यापारस्तेन हस्ताग्रं हृदयदे
शमानीय कथयतीत्यर्थः। सोयमित्यादिवाक्यांतरमवतार्य व्याकरोत्योंकारेति। सर्वाधिष्ठानं तत्परोक्षरूपेणापरत्वं प्र
त्यग्रूपेण चापरत्वं तेन कार्यकारणरूपेण सर्वात्मना व्यवस्थितः सन्नात्मा प्रतिपत्तिसौकर्यार्थं चतुष्पात्कल्प्यते तत्र दृष्टा
न्तमाह। कार्षापणवदिति। देशविशेषे कार्षापणशब्दः षोडशपणानां संज्ञा तत्र यथा व्यवहारप्राचुर्याय पणादिकल्पना क्रि
यते तथा इहापीत्यर्थः। यथा गौश्चतुष्पादुच्यते न तथा चतुष्पादादेशः क्रियते निष्कलस्य श्रुतिव्याकोपादित्याह। न गोरिवेति
विश्वादिषु तुर्यांतेषु पादशब्दो यदि तु पादशब्दः सर्वत्र करणव्युत्पत्तिकस्तदा विश्वादिवत्तुर्यस्यापि करणकोटिनिवेशाद्रेय
सिद्धिः यदि तु पादशब्दः सर्वत्र कर्मव्युत्पत्तिकस्तदा साधनासिद्धिरित्याशंक्य विभज्य पादशब्दप्रवृत्तिं प्रकटयति। त्रयाणामि
त्यादिना। करणसाधनः करणव्युत्पत्तिकः कर्मसाधनः कर्मव्युत्पत्तिक इतियावत्। आत्मनो निरवयवस्य पाददृयमविनोपप
द्यते पादचतुष्टयं तु दूरोत्सारितमिति शंकते। कथमिति। परमार्थतश्चतुष्पात्त्वाभावेपि काल्पनिकमुपायोपेयभूतं पादचतुष्ट ४
यमविरुद्धमित्यभिप्रेत्याद्यपादं व्युत्पादयति। आदेत्यादिना। स्थानमस्येत्यभिमानस्य विषयभूतमित्यर्थः। प्रज्ञायास्तद्वद्
न्तरत्वसिद्धेरयुक्तमिदं विशेषणमित्याशंक्य व्याचष्टे। बहिरिति। चैतन्यलक्षणा प्रज्ञा स्वरूपभूता न बाह्ये विषये प्रतिभासते
तस्याविषयानपेक्षत्वात् बाह्यस्य च विषयस्य वस्तुतोऽभावादित्याशंक्याह। बहिर्विषयेवेति। न स्वरूपप्रज्ञा वस्तुतो
बाह्यविषये प्युते बुद्धिवृत्तिरूपा त्वसावज्ञानकल्पिता तद्विषया भवति। न च सापि वस्तुतस्तद्विषयतामनुभवति वस्तु

तस्यैवयमभावात् बाह्यस्य विषयस्य काल्पनिकत्वादतस्तद्विषयत्वं प्रातिभासिकमित्यर्थः। पूर्ववदविशेषणेन विशेषणांतरं
समुच्चिनोति। तथेति। सप्तांगत्वं श्रुत्युक्तं एवं मेनविश्वस्य विशदयति। तस्येत्यादिना। प्रकृतस्य सन्निहितस्य प्रसिद्धस्यैवात्मनः
त्रैलोक्यात्मकस्य वक्ष्यमाणरीत्या वैश्वानरशब्दितस्य सुतेजस्त्वगुणविशिष्टो द्युलोको मूर्द्धेति द्युलोकस्य शिरस्त्वमुप
दिश्यते। विश्वरूपो नानाविधः शुक्लपीतादिगुणात्मकः सूर्यश्चक्षुर्विवक्ष्यते। पृथक् नानाविधं वर्त्म संचरणमार्गो यस्य स्वभावो
ऽस्येति व्युत्पत्त्या वायुस्तत्प्राणोऽत्र तेन सर्वप्राणात्तस्येति संबंधः। बहुलो विस्तीर्णगुणो वा नानाकाशः संदेहो देहस्य मध्यमो भागो
रयिरन्नं तद्धेतुरुदकं वस्तिरस्य मूत्रस्थानं पृथिव्येव प्रतिष्ठात्वगुणो वैश्वानरस्य पादौ तथा ऋक्प्रथममागच्छेत् होमीयमित्यग्नि
होत्रस्य कल्पनाश्रुता तस्याः शेषत्वेनाहवनीयोऽग्निरस्य मुखत्वेनोक्त इति योजना। उक्तं सप्तांगत्वमुपसंहरती एवमिति।
विशेषणांतरं समुच्चिनोति। तथेति। बुद्ध्यर्थानींद्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि कर्मार्थानींद्रियाणि वाक्पा
णिपादपायूपस्थाख्यानि तान्येतानि द्विविधानींद्रियाणि दश भवंति। प्राणादय इत्यादिशब्देनापानव्यानोदानसमाना गृ
ह्यंते। उपलब्धिद्वाराणीत्युपलब्धिपदं कर्मोपलक्षणार्थं द्वारत्वं करणत्वं बुद्धींद्रियाणां मनसो बुद्धेश्च प्रसिद्धमुपलब्धौ
करणत्वं कर्मेंद्रियाणां तु वदनादौ कर्मणि करणत्वं प्राणादीनां पुनरुभयत्रैव पारंपर्येण करणत्वं तेषु तत्सु एव ज्ञानकर्म
णोरुत्पत्तेरस्तत्सुचानुसंधेः मनोबुद्ध्योश्च सर्वत्र साधारणकरणत्वं अहंकारस्याभिमानवदेव करणत्वं मंतव्यं चित्तस्य
चैतन्याभासोदयकरणत्वस्तूक्तमिति विवेक्तव्यं। पूर्वोक्ते विशेषणे विशिष्टस्य वैश्वानरस्य स्थूलभुगिति विशेषणांतरं
तद्विभजते। स एव विशिष्ट इति। शब्दादिविषयाणां स्थूलत्वं दिगादिदेवतानुगृहीतैः श्रोत्रादिभिर्गृह्यमाणत्वं इदानीं वै
श्वानरशब्दस्य प्रकृतविषयत्वं विशदयति। विश्वेषामिति। कर्मणि षष्ठी विश्वेन चैतेन नराश्चेति विश्वानराः निपातनात्पूर्वप
दस्य दीर्घता विश्वानराननेकत्वेन व्यवस्थितान्प्रत्यनेकधा धर्माधर्मकर्मानुसारेण सुखदुःखादिप्रापणादयं क
र्मफलदाता वैश्वानरशब्दितो भवतीत्यर्थः। अथवा विश्वश्चासौ नरश्चेति विश्वानरः स एव वैश्वानरः स्वार्थे तद्धितोऽण्
ससमासादिविशिष्ट विश्वेति। कथं विश्वश्चासौ नरश्चेति विग्रह्यते जाग्रत्तां नराणामनेकत्वान्नाभेदतस्यानुपपत्तेरित्या
शंक्याह सर्वेति। सर्वपिंडात्मा समष्टिरूपो विराडुच्यते तेनात्मना विश्वेषामनन्यत्वाद्यथोक्तसमाससिद्धिरित्यर्थः
विश्वस्य तैजसादुक्तत्वेन तस्यैव प्राथम्यं युक्तं कार्यरूपश्चाद्राविबत्वमुचितमित्याशंक्याह एतदिति। प्रविलापनापेक्षया प्रा
थम्यं न स्रष्टव्यापेक्षयेत्यर्थः॥ अध्यात्माधिदैवयोर्भेदमादाय प्रागुक्तं सप्तांगत्वमाक्षिपति। कथमिति। अध्यात्मप्रकृते

मा० भा०
व्या०

तस्य पुरो ह ॥ वेदांतकृते तन्निरासार्थं ब्रह्मायमात्मेति प्रत्यगात्मानं प्रकृत्य सोयमात्मा चतुष्पादिति चतुष्पात्वेतस्य
दि प्रक्रांते दृश्यते नो मूर्द्धा पंगत्वसिद्ध्यर्थं यदुक्तं तदयुक्तं प्रक्रमविरोधादित्यर्थः अध्यात्माधिदैवयोर्भेदाभावान्नप्रक्र
मविरोधोस्तीति परिहरति नैष दोष इति तत्र हेतुमाह सर्वस्येति आध्यात्मिकस्याधिदैविकेन सहितस्य प्रपंचस्य सर्व
पं स्यैव स्थूलस्य पंचीकृतपंचमहाभूततत्कार्यात्मकस्यानेनात्मना विराजा प्रथमपादत्वं तस्यैव सूक्ष्मस्यापंचीकृतपंचमहाभू
ततत्कार्यस्यानेन हिरण्यगर्भात्मना द्वितीयपादत्वं तस्यैव कार्यरूपतां त्यक्त्वा कारणात्मना मायापन्नस्याव्याकृतात्मना तृतीय
पादत्वं तस्यैव तु कार्यकारणरूपतां विहाय सर्वकल्पनाधिष्ठानतया स्थितस्य सत्यज्ञानानंतानंदात्मना चतुर्थपादत्वं तदेवा
ध्यात्माधिदैवयोरभेदमादायोक्तेन प्रकारेण चतुष्पात्वस्य वक्तुमिष्टत्वात्पूर्वपूर्वपादस्योत्तरोत्तरपादात्मना प्रविलापनात्
तुरीयनिष्ठायां पर्यवसानं सिद्धमित्यर्थः यदेवं तुरीये पर्यवसानं जिज्ञासोर्मुमुक्षोरिष्यते तदा तत्त्वज्ञानप्रतिबंधकस्य प्रा
तिभासिकद्वैतस्योपरमे सत्यद्वैतपरिपूर्णब्रह्माहमस्मीति विद्वत्कीयसाक्षात्कारः सिद्ध्यतीति फलितमाह एवं चेति उक्तन्या
येन तत्त्वसाक्षात्कारे संगृहीते सर्वेषु भूतेषु ब्रह्मादिस्थावरांतेषु आत्मैकोऽद्वितीयो दृष्टः स्यादेको देवः सर्वभूतेषु इति तत्र तत्र
ब्रह्मेवेतन्यस्यैव प्रत्यक्त्वेनावस्थानाभ्युपगमात्तान्येतानि चैव सर्वाणि प्रातिभासिकानि भूतानि तस्मिन्नेवात्मनि कल्पिता
निदृष्टानि स्युस्तथा च पूर्णात्मात्मनो भूतांतराणां च तदतिरेकेणासत्त्वास्फुरणविरहित्वं सिध्यति तेन च सर्वभूतस्थमा
त्मानं सर्वभूतानि चात्मनि संपश्यन्नात्मयाजी वै स्वाराज्यमधिगच्छतीति स्मृतिरनुगृहीता भवतीत्याह सर्वभूतस्थ इति
न चेदं मानववचनममानमिति शंकनीयं यद्वै किंच मनुरवदत्तद्भेषजमिति श्रुतेरित्यभिप्रेत्य प्रदर्शितस्मृतिमूलभूतां श्रु
तिं सूचयति यस्त्विति योहि पादत्रयं प्रागुक्तया प्रक्रियया प्रविलाप्य तुरीये नित्यविज्ञप्तिमात्रे सदानंदैकताने परिपूर्णे प्र
तिष्ठां प्रतिपद्यते स ब्रह्माहमस्मीति आत्मानं जानानः सर्वेषां भूतानामधिष्ठानांतरमनुपलभमानमात्मन्येव प्राती
तिकानि तानि प्रत्येति तेषु च सर्वेष्वात्मानं सत्तास्फूर्तिप्रदमवगच्छति ततश्च न किंचिद्विजिगोपायितुमिच्छतीति श्रुत्यस ५
श्र र्थयोक्तनीत्या तत्त्वसाक्षात्कारे संगृहीते सति स्वीकृतः स्यादित्यर्थः अध्यात्माधिदैवयोरभेदाभ्युपगमद्वारेण प्रागुक्त
परिपाट्या तत्त्वज्ञानाभ्युपगमे दोषमाह अन्यथेति सांख्यादिपक्षस्यापि प्रामाणिकत्वान्नत्वेव प्रतिदेहं परिच्छिन्नस्य प्र
त्यगात्मनो दर्शनेन प्रामाणिकोऽर्थोऽभ्युपगतो भवति व्यवस्थानुपपत्त्या च प्रतिशरीरमात्मभेदः सिध्यतीति सांख्यादि
तथा चेति सांख्यादीनां द्वैतविषयं दर्शनमिष्टं तेन त्वदीयदर्शनस्याद्वैतविषयस्याविरोधाभावाद् द्वैतं तत्त्वमिति श्रु

ति सिद्धो विशेषस्तत्पक्षे न सिद्ध्येदतः श्रुतिविरोधो भेदवादे प्रसज्येत । व्यवस्था त्वौपाधिकभेदमधिकृत्य स्वस्थापयिष्यतीत्य
र्थः । ननु भेदवादे विना द्वैतश्रुतिविरुध्यते ध्यानार्थमनन्तं ब्रह्मेति वदद्वैतं तत्त्वमित्युपदेशासिद्धेरित्याशंक्याह । दृश्यते चेति । उपक्रमो
पसंहारैकरूप्यादिना सर्वासामुपनिषदामात्मैक्यप्रतिपादनपरत्वमिष्टं । अतो न ध्यानार्थत्वमद्वैतश्रुतेरेष्टुं शक्यं । वस्तुपर
त्वलिंगविरोधादित्यर्थः । अध्यात्माधिदैवयोरेकत्वमुपेत्याद्वैतपर्य्यवसाने सिद्धे सत्याध्यात्मिकस्य व्यष्ट्यात्मनो विश्वस्य
त्रैलोक्यात्मके नाधिदैविकेन विराजा सहैकत्वं गृहीत्वा यत्तस्य सप्तांगत्वमुक्तं तदविरुद्धमित्युपसंहरति । अत इति । अध्या
त्माधिदैवयोरैक्ये हेत्वंतरमाह । मूर्द्धेति । दिवादित्यादिकं वैश्वानरावयवं वैश्वानरबुध्याध्यायतो जिज्ञासया पुनरखंडं उपसमु
पासनस्य मूर्द्धा ते व्यपतिष्यद्यन्मां नागमिष्य इति । अंधो भविष्यो यन्मामित्यादि व्यस्तोपासननिंदा समस्तोपासनविधित्स
या दृश्यते नच द्युलोकादिकं विपरीतबुद्ध्या गृहीतं । अतः स्वकीयमूर्द्धादिपरिमतनसूचितं यदध्यात्माधिदैवयोरेकत्वं न प्र
वृत्तस्मात्तयोरेकत्वमत्र विवक्षितं भवतीत्यर्थः । ननु विराजो विश्वेनैकत्वमेवमूलग्रंथे दृश्यते तत्कथमविशेषेणाध्यात्माधि
दैवयोरेकत्वं विवक्षित्वाद्वैतपर्यवसानं भाष्यकृतोच्यते तत्राह । विराजेति । यन्मुखतो विराजो विश्वेनैकत्वं दर्शितं तत्तु हिरण्य
गर्भस्य तैजसेनात्मनामिधाश्रयव्याकृतेनापहितस्य प्राज्ञेन सहैकत्वस्योपलक्षणमतो मूलग्रंथेऽप्यविशेषेणाध्यात्माधि
दैवतयोरेकत्वं विवक्षितमित्यद्वैतपर्य्यवसानसिद्धिरित्यर्थः । अध्यात्माधिदैवयोर्यदेकत्वमिहोच्यते तन्न साधु प्राणस्य विदर्शि
तमित्याह । तेचेति । अधिदैवमध्यात्मं चैकरूपं निर्दिश्य कृत्वा प्रतिपर्याय मयमेव स इत्यभेदवचनादेकत्वमत्र विवक्षितमि
त्यर्थः । ननु विश्वविराजोः स्थूलाभिमानित्वात्तैजसहिरण्यगर्भयोश्च सूक्ष्माभिमानित्वादेकत्वं युक्तं प्राज्ञाव्याकृतयोस्तु के
न साधर्म्येणैकत्वं तत्राह । सुषुप्तेति । प्राज्ञो हि सर्वविशेषमुपसंहृत्य निर्विशेषः सुषुप्ते वर्तते प्रलयदशायामव्याकृतं निःशेषवि च
शेषस्तान्यप्युपसंहृत्य निर्विशेषरूपं तिष्ठतीति तेनोक्तं साधर्म्यं पुरोधाय तयोरैक्यमविरुद्धमित्यर्थः । अध्यात्माधिदैवयोरेक
त्वे प्रागुक्तन्यायेन प्रसिद्धे सत्युपसंहारप्रक्रियया सिद्धमद्वैतमिति फलितमाह । एवं चेति । तद्धेतोः प्रतिबंधद्वैतसामात्रेणानस्फु
रतीति । किंचु वाक्यार्थैवाचार्योपदिष्टादिति वक्तुं चशब्दः । द्वितीयपादमवतार्य व्याचष्टे । स्वप्नेत्यादिना । स्थानं पूर्ववत् । दृष्टुर्ममाभि
मान विषयमन्यत्र मिति यावत् । स्वप्नपदार्थं निरूपयितुं तत्कारणं निरूपयति । जाग्रदित्यादिना । तस्याः स्वप्नादेधर्म्मार्थविशे
षणे मनेकेति । अनेकानि विविधानि करणानि साधनानि यस्याः सा तथेति यावत् । विषयद्वारकमपि वैधर्म्यं दर्शयति

मा॰ भा॰
आ॰

बहिरिति बाह्यस्य ग्राह्यादेर्विषयस्याविद्याविवर्तत्वेन वस्तुतोऽभावान्न तद्विषयत्वमपि यथोक्तप्रज्ञायाः वास्तवं किंतु प्रातीतिकमि
यमिप्रेत्योक्तमिवेति ॥ न च यथोक्ताप्रज्ञाप्रमाणसिद्धा तस्या अनवस्थानान्नेन साक्षिवेद्या सेति विवक्षित्वाह अवभासमानेति हेतुत
तुः प्रतिभासस्यैव वस्तुतोऽसत्त्वे हेतुं सूचयति मनःस्पंदनेति यथोक्ताप्रज्ञास्वानुरूपां वासनां स्वसमानाधारामुत्पादयतीत्याह तथाभूत
मिति ॥ जाग्रद्वासनावासितं मनो जागरितवदवभासत इत्यस्य मद्दुष्टुरित्यस्य व्याख्या मनस एव वासनावतः स्वप्नविषयत्वान्न तदतिरिक्तविषयाभा
वादित्याह तथासंस्कृतमिति जागरितवासनावासितं मनो जाग्रद्वद्भातीत्यत्र दृष्टांतमाह चित्रितइति यथा पटे चित्रितवदवभा चित्रितः ५
ति तथा मनो जागरितसंस्कृतं तत्तद्वद्भातीतियुक्तमित्यर्थः स्वप्नस्य जागरिताद्वैधर्म्यं सूचयति बाह्येति यथोक्तस्य मनसो जागरि
तवदनेकधा प्रतिभाने कारणांतरमाह अविद्येति यदुक्तं स्वप्नस्य जागरितजनितवासनाजन्यत्वं तत्र हेतुहृदारूप्यकस्कृतिं प्रमा
णयति तथाचेति अस्य लोकस्येति जागरितोक्तिः तस्य विशेषणं सर्वावत इति सर्वसाधनसंपत्तिरस्मिन्नस्तीति सर्वावान्तस्य मा
त्रा लेशो वासना तामपादायापच्छिद्य गृहीत्वा स्वपितीति वासनाप्रधानं स्वप्नमनुभवतीत्यर्थः यत्तु स्वप्नरूपेणापरिणतं मनः साक्षि
णो विषयो भवतीति तत्र श्रुत्यंतरं दर्शयति तथेति परत्वं मनसस्तदुपाधित्वाद्धि साधारणकरणत्वाद्वा देवत्वं द्योतनात्मकत्वात्तम
नो ज्योतिरिति ज्योतिःशब्दात्तस्मिन्नेको भवतीति स्वप्ने द्रष्टा तत्प्रधानो भवतीति स्वयंप्रकृत्या तत्र स्वेनैव प्रकाशेन द्रष्टा महिमानमम
नसो विभूतिं ज्ञानज्ञेयपरिणामात्मकं लक्षणं साक्षात्करोतीति तथा च मनसो विषयत्वात्तत्रात्मनः कर्तृत्वशंकेत्यर्थः ननु विश्वस्य न
बाह्येंद्रियजन्यप्रज्ञायास्तैजसस्य मनोजन्यप्रज्ञायाश्चांतःस्थत्वाविशेषादंतःप्रज्ञत्वं न व्यावर्तकमिति तत्राह इंद्रियेति अप
पादित्वाद्विश्वस्य बहिःप्रज्ञत्वे तैजसस्त्वंतःप्रज्ञो विज्ञायते बाह्यानींद्रियाण्यपेक्ष्य मनसोऽन्तःस्थत्वात् तत्परिणामत्वाच्च स्व
प्नप्रज्ञायाः स्त्वाद्वानंतःप्रज्ञो युज्यते किं च मनःस्वभावभूताया जागरितवासना तद्रूपा स्वप्नप्रज्ञेति युक्तं तैजसस्यांतःप्रज्ञत्वमित्य
र्थः स्वप्नाभिमानिनस्तैजसो विकारत्वाभावात्कुतस्तैजसत्वमित्याशंक्याह विषयेति स्थूलो विषयो यस्यां वासनामय्यां प्रज्ञायां ६
न ज्ञायते तस्यां विषयसंस्पर्शमंतरेण प्रकाशमात्रतया स्थितायां आश्रयत्वेन भवतीति स्वप्नद्रष्टा तैजसो विवक्षितः तेजःशब्दे
या नयथोक्तवासनामय्याः प्रज्ञाया निर्देशादित्यर्थः ननु विश्वतैजसयोर विशिष्टः प्रविविक्तभुगिति विशेषणं प्रज्ञायाः भोज्यत्वस
तुल्यत्वान्नैवं तस्या भोज्यत्वाविशेषेऽपि तस्यावांतरभेदात् सविषयत्वाद्धि विश्वस्य भोज्या प्रज्ञा स्थूला लक्ष्यते तैजसे तु प्रज्ञावि
षयसंस्पर्शशून्या वासनामात्ररूपेति विविक्तो भोगः सिध्यतीत्याह विश्वस्येति सप्तांग एकोनविंशतिमुखत्वमित्येतदन्य

दिसुच्यते । पादद्वयमेवं व्याख्याय तृतीयं पादं व्याख्यास्यन् व्याख्यायमानश्रुतौ न कंचनेत्यादिविशेषणस्य तात्पर्यमाह । दर्शने
ति । दर्शनस्य स्थूलविषयस्य वृत्तिरत्रास्तीति जागरितं दर्शनवृत्तिरुच्यते । स्थूलविषयाद्दर्शनादन्यद्दर्शनमदर्शनं वा सनामात्रं तस्य
वृत्तिरत्रास्तीत्यदर्शनवृत्तिः स्वप्नस्तयोः सुषुप्तवदेव स्वापस्य तत्त्वाग्रहणस्य तुल्यत्वात् । यत्र सुप्त इत्युक्ते तयोरपि प्रसक्तौ तद्व्यवच्छेदेन
सुषुप्तस्यैव ग्रहणार्थं यत्र सुप्त इत्यादि वाक्यं न कंचनेत्यादिविशेषणं तद्धि स्थानद्वयं व्यवच्छिद्य सुषुप्तमेव ग्राहयतीत्यर्थः । न कंचन
स्वप्नं पश्यतीत्यनेनैव विशेषणेन स्थानद्वयव्यवच्छेदसंभवाद्विशेषणान्तरमकिंचित्करमित्याशंक्याह । अथवेति । तत्त्वाप्रतिबोधः स्वा
पस्तस्य स्थानत्रयेऽपि तुल्यत्वाज्ज्ञानस्वप्नाभ्यां विभज्य सुषुप्तं ज्ञापयितुं विशेषणमित्यर्थः । एकस्यैव विशेषणस्य व्यवच्छेदकत्वसंभ
वादत्वं विशेषणाभ्यामित्यस्य कः समाधिरित्याशंक्य विशेषणयोर्विकल्पेन व्यवच्छेदकत्वान्नानर्थक्यमित्याह । नहीति । यत्रेत्यस्यापे
क्षितार्थं कथयति । तदेतदिति । [illegible] अन्यथाग्रहणाशून्यत्वं कामस्पर्शविरहितत्वं च विशेषणाभ्यां विवक्षितं । कथमस्य स
द्वितीयस्यैकीभूतत्वविशेषणमित्याशंक्याह । स्थानद्वयस्येति । जागरितं स्वप्नश्चेति स्थानद्वयं तेन प्रविभक्तं यद्द्वैतं स्थूलं सूक्ष्मं च लक्ष
णमनस्पंदितमात्रमिति विवक्ष्यते । तद्यथा स्वकीयरूपमात्मनोऽविभक्तं तथैव तस्यास्त्यागेनाव्याकृताख्यं कारणमापन्नं स्वकीयसर्वविस्ता
रसहितं कारणात्मकं भवति । यथाहि नैश्येन तमसा ग्रस्तमहस्तेनैव व्यवह्रियते । तथेदमपि कार्यं जातं कारणभावमापन्नं कारणमित्य
नैव्यवह्रियते । तस्यां चावस्थायां तदुपाधिरात्मैकीभूतविशेषणभाक् भवतीत्यर्थः । तथापि कारणोपहितस्य प्रज्ञानघनविशेषणम
युक्तं निरुपाधिकस्यैव तथाविधविशेषणासंभवादित्याशंक्याह । अत एवेति । सर्वस्य कार्यप्रपंचस्य समनस्कस्य सुषुप्ते कारणात्मनाऽस्थि
तत्वादेवेत्यर्थः । सुषुप्तावस्थायामुक्तप्रज्ञानामेकमूर्तित्वं न वास्तवं पुनर्यथापूर्वं विभागयोग्यत्वादिति मत्वोक्तमिवेति । सुषुप्तावस्थायाः
की[illegible] बाह्याग्रत्वप्रज्ञानानां तत्रैकीभावात्प्रज्ञानघनशब्दवाच्यत्वेऽस्युक्तमनुवदति । सेयमिति । उक्तमेवार्थं दृष्टांतेन बुद्धा
वाविर्भावयति । यथेत्यादिना । एवकारस्य नायोगव्यवच्छित्तिरित्यर्थः । किंतु अन्ययोगव्यवच्छित्तिरित्याह । एवशब्द इति । प्राज्ञस्यानंदवि
कारत्वाभावे कथमानंदमयत्वविशेषणमित्याशंक्य स्वरूपसुखाभिव्यक्तिप्रतिबंधकदुःखाभावात् प्राचुर्यार्थत्वं मयटो गृहीत्वा वि
शेषणोपपत्तिं दर्शयति । मनस इति । मयटः स्वरूपार्थत्वात् आनंदमयत्वमानंदत्वमेव किं न स्यादित्याशंक्याह । नेत्यादिना । नहि सुषुप्ते नि
रुपाधिकानंदत्वं प्राज्ञस्याभ्युपगंतुं शक्यं तस्य कारणोपहितत्वादन्यथा मुक्तत्वात् पुनरुत्थानायोगात् तस्मादानंदप्राचुर्यमेवास्य
स्वीकर्तुं युक्तमित्यर्थः । आनंदभुगिति विशेषणं सदृष्टांतं व्याचष्टे । यथेति । तथा सुषुप्तोऽपीति शेषः । दार्ष्टांतिकं विवृणोति । अश्नुते
ति ॥३॥ इयं स्थितिरिति सुषुप्तिरुक्ता अनेनेति प्राज्ञोक्तिः । सुषुप्तस्य पुरुषस्य तस्यामवस्थायां स्वरूपभूतानतिशयानंदाभिव्यक्ते

मां०भा०
आ०

रस्ती सुत्र प्रमाणमाह एषोऽस्येति। प्राज्ञस्यैव चेतोमुख इति विशेषणांतरं तद्व्याचष्टे स्वप्नादीति। स्वप्नो जागरितं चेति प्रतिबोधितश्चे
ष्टितं चेतस्तत्प्रतिद्वारभूतत्वं द्वारभावेनास्थितत्वं। नहि तत्स्वप्नस्य जागरितस्य वा सुषुप्तद्वारमंतरेणास्ति संभवोऽस्ति तयोस्तत्कार्य
त्वादतः सुषुप्तोऽपि मानी प्राज्ञः स्थानद्वयमकारवत्त्वाच्चेतोमुखव्यपदेशभागित्यर्थः। अथवा प्राज्ञस्य सुषुप्ताभिमानिनः स्वप्नं जागरि
तं वा प्रतिक्रमात्क्रमान्मात्रपाशयदागमनं तत्प्रति चैतन्यमेव द्वारं नहि तद्व्यतिरेकेण काचिच्चेष्टा सिद्ध्यतीत्यभिप्रेत्य पक्षांतरमाह। बोधेत्यादि
ना॥ भूतभविष्यत्सु विषयेज्ञातृत्वं तथा सर्वस्मिन्नपि वर्तमाने विषये ज्ञातृत्वमस्यैवेति प्रकर्षेण जानातीति प्राज्ञः। प्रज्ञ एव प्राज्ञस्तदेव प्रा
त्प्रपद्य प्रसादयति। भूतेति। सुषुप्ते समस्तविशेषविज्ञानोपरमात् कुतो ज्ञातृत्वमित्याशंक्याह। सुषुप्तोऽपीति। यद्यपि सुषुप्ते तस्याम
वस्थायां समस्तविशेषविज्ञानविरहीभवति तथापि भूतानि ष्पन्ना या जागरिते स्वप्ने सर्वविषयज्ञातृत्वलक्षणा गतिस्तया प्रकर्ष
ता सर्वमासमंतात् जानातीति प्राज्ञशब्दवाच्यो भवतीत्यर्थः। तर्हि प्राज्ञशब्दस्य मुख्यार्थत्वं न सिध्यतीत्याशंक्याह। अयमेवेति। असा
धारणमिति विशेषणद्योतितमर्थं स्फुटयति। इतरयोरिति। आध्यात्मिकस्य तृतीयपादस्य व्याख्यामुपसंहरति। सोयमिति। प्राज्ञ
स्याधिदैविकेनान्तर्यामिणा सहाभेदं गृहीत्वा विशेषणांतरं दर्शयति। एष हीति। स्वरूपावस्थं ब्रह्मानुपाधित्वप्राधान्यमवधूय चैतन्य
प्राधान्यमन्यथास्यात्त्वानुपपत्तेः। नेत्याहि कादप्यस्तु तत्र स्यमीश्वरस्येति तदयुक्तं यस्तु रसामंजस्यादि न्यायविरोधादि
त्याह। नैतस्मादिति। श्रुतिविरोधादपि न तस्यतत्त्वं स्थाने स्थयमित्याह। प्राणेति। प्रकृतमज्ञातं परं ब्रह्म सदाख्यं प्राणशब्दितं
च तद्बंधनं बध्यतेऽस्मिन् पर्यवस्यतीति व्युत्पत्तेः। नहि जीवस्य परस्मात्मातिरेकेण पर्यवसानमस्ति। मनस्तदुपहितं जीवं वे
तन्यमत्र प्राणशब्दस्याध्यात्मिकस्यार्थस्य परस्मिन्प्रयोगात् मनःशब्दितस्य जीवस्य तस्मिन्पर्यवसानाभिधानाद्वस्तुतो भे
दो नास्तीति द्योतितमित्यर्थः। प्राज्ञस्यैव विशेषणांतरं साधयस्यमेवेति। नन्ववधारणं नोपपद्यते व्यासपराशरादीनामन्येषाम
पि सर्वज्ञत्वप्रसिद्धेरित्याशंक्य विशिनष्टि। सर्वेति। अंतर्यामित्वं विशेषणांतरं विशदयति। अंतरिति। अन्यस्य कस्यचिदंतर ७
नुप्रवेशेन नियमने सामर्थ्याभावादवधारणं। उक्तं विशेषणत्रयं हेतुं कृत्वा प्रकृतस्य प्राज्ञस्य सर्वजगत्कारणत्वं विशेषणां
तरमाह। अत एवेति। यथोक्तस्वप्नजागरितस्थानद्वयं प्रविभक्तमित्यर्थः। सभेदमध्यात्माधिदैवाधिभूतभेदसहितमिति याव
त्तन्निमित्तकारणत्वनियमे विप्राचीनानि विशेषणानि निर्वहंतीत्याशंक्य प्रकृतिश्च प्रतिज्ञादृष्टांतानुपरोधादिति न्यायात्त्रिमि
त्तोपादानयोः जगति तन्नभिन्नत्वमित्येवं नियमतः सिद्धमतो विशेषणांतरमित्याह। यत इति। प्रभवत्यस्मादिति प्रभवः। अप्येत्यस्मि
न्नित्यप्ययः। न चैतेषां भूतानामेकत्रोपादानादृते संभावितेत्यर्थः। आचार्यो मांडूक्योपनिषदं पठित्वा तद्व्याख्यानं श्लोकावता

रणमन्त्रेत्यादिना कृत्स्नं तदक्षरेत्यनूद्य भाष्यमाकारो व्याकरोत्येतेनास्मिन्निति | विश्वस्य विभुत्वं | प्रागुक्ताधिदैविकाभेदादवधेयं | त्र
ध्यात्माधिदैवाभेदे पूर्वोदाहृतां श्रुतिं सूचयितुं हि शब्दः | स्थूलसूक्ष्मकारणोपाधिभेदाज्जीवभेदमाशंक्य स्वरूपैक्यं | प्र
स्य तंत्रोपाधिभेदमंतरेणाविशेषणमात्रभेदादित्याशंकाद्देतोक्किरित्याह | एक एवेति | पदार्थोनापूर्वमेवोक्तस्त्वात्तात्पर्यं श्लो
कस्य वक्तुमवशिष्यते तदाह | पश्ययिवोति | यथात्मनश्चैतन्यमिव स्वाभाविकं स्थानत्रयं तर्हि तद्वदेव तं व्यभिचरितुमर्हति |
व्यभिचरति चात्मानं स्थानत्रयं क्रमाक्रमाभ्यां तस्यात्रिस्थानत्वादतस्तद्व्यतिरिक्तत्वमात्म(नै)नः सिद्धं | यः सुप्तः सोऽहं जागर्मि
इत्यनुसंधानादेकत्वं | तस्यावगतमेकत्वेन हि स्मृत्या घटादावेकत्वमिष्यते | धर्माधर्मरागद्वेषादिमलस्यावस्थाधर्मत्वान्नदति
रेके शुद्धत्वमपि सिद्ध्यति | संगस्यवेद्यत्वेनावस्थाधर्मत्वांगीकारात्तदति | रेकिणस्तत्वद्रष्टुरसंगत्वमपि संगतमेवेत्यर्थः | युक्ति
सिद्धेर्थे श्रुतिमुदाहरति | महामत्स्यादिति | महान्नादेयेनमत्स्योतसाः प्रकंप्यगतिरतिबली | तिमिरुभेकूले | नद्याः संचरन्न क्रम
संचरणान्नाभ्यामामितरिष्यते | न च तस्य कूलद्वयगतदोषगुणवत्त्वं | न चासौ क्वचिदपि सज्जते | नैनं चक्रेयेनोवासुपर्णोवानभसि
परिपतन्क्वचिदपि प्रतिहन्यते | तथैवायमात्मावस्थानत्रयं संचरन्नुक्तलक्षणो मुक्तोंऽगीकर्त्तुमित्यर्थः | विश्वतैजसप्राज्ञानां स्था
नत्रयं क्रमेणासंचरतामेकत्वमेव स्तुतो भवतीत्यत्र हेत्वंतरं विवक्षन्नाह | दक्षिणेति | श्लोकस्य तात्पर्यं संगृह्णाति | जागरितेति | नचै
कस्यामवस्थायामेकस्मिन्नेव देहे भिन्नत्वमात्मनस्ताद्दादिभिरपीष्यते जाग्रदवस्थायामिति तु देहे व्यवस्थितत्वोक्त्या विशेषणं
तद्धितत्वमवस्थितत्वं यदात्मनः सर्वगतस्य तदभिमानित्वं | देहाभिमानस्य जागरिते परं संभवति | तेन तस्यामेवावस्थायामेकस्मिन्नेव
देहे त्रयाणामनुभवे तेषां | मिथो भेदो नास्तीति सिद्ध्यतीत्यर्थः | मुखं द्वारं उपलब्धिस्थानं शरीरमात्रे दृश्यमानस्य कथमिदमुपलब्धो
विशेषायतनमुपदिश्यते | स्थानांतरापेक्षया अस्य प्राधान्यादित्याह | प्राधान्येनेति | अनुभूयते ध्यानानिष्ठैरितिशेषः | उक्तेर्थे श्रुतिं संवा
दयति इंधो ह वै नाम बृहदारण्यकश्रुतेरुदाहृतायास्तात्पर्यार्थमाह | इंध इत्यादिना | वैराजस्यात्मनो यथोक्तगुणवत्वे विद्वद्भिरासुप्
स्य किमायतनमित्याकांक्षायामाह | चक्षुषीवेति | अध्यात्माधिदैवयोरेकत्वात्तत्राधिदैविको गुणः चाक्षुषेप्याध्यात्मिके संभवतीत्यर्थः |
उक्तमेकत्वमाक्षिपति | नन्विति | हिरण्यगर्भः सूक्ष्मप्रपंचाभिमानी सूर्यमंडलांतर्गतः समष्टिदेहो लिंगात्मा चक्षुर्गोलकांतर्गत
इंद्रियानुग्राहकः संसारिणोर्थांतरं | विराडात्मापि स्थूलप्रपंचाभिमानी सूर्यमंडलात्मकः समष्टिदेहश्चक्षुर्गोलकद्वयानु
ग्राहकस्ततोर्थांतरमेव | वैश्वानरस्तु व्यष्टिदेहो दक्षिणेचक्षुषि व्यवस्थितः द्रष्टा चक्षुष्मतः करणानां नियंता कार्यकरणस्वामी
ताभ्यां समष्टिदेहाभ्यामन्योभ्युपगम्यते न देवं समष्टिव्यष्टित्वेन व्यवस्थितजीवभेदादुक्तमेकत्वमयुक्तमित्यर्थः | काल्पनिको

जीवभेदो वास्तवो वेति विकल्प्य आद्यमंगीकृत्य द्वितीयं दूषयति नेत्यादिना। एको हि परो देवः सर्वेषु भूतेषु समाप्तत्वेन व्याप्तत्वेन व
समाप्त्वेनास्तिश्रुतीति श्रवणाद्वस्तुतो भेदो नास्तीत्युक्तं हेतुं साधयति एक इति। सर्वेषु क्षेत्रेषु व्यवस्थितं क्षेत्रज्ञं मामपीश्वरं विद्धीति भगव
तो वचनाच्च तात्त्विकभेदासिद्धिरित्याह क्षेत्रज्ञं चेति सर्वेषु भूतेषु क्षेत्रज्ञ एकश्चेदात्मा कथं तर्हि प्रतिभूतं भेदप्रथा इत्याशंक्याह अवि
भक्तं चेति। तत्त्वतोऽविभागेऽपि देहकल्पनया भेदधीरित्यर्थः। ननु करणेषु सर्वेषु विश्वस्याविशेषान्न दक्षिणे चक्षुषि विशेषनिर्देशो युज्यते
यद्यपि करणांतरेभ्यः चक्षुषि प्राधान्यमुक्तं तथापि नार्थो दक्षिणविशेषणेनेति तत्राह सर्वेष्विति। श्रुत्यनुभवाभ्यां निर्देशविशेषसिद्धि
रित्यर्थः। यद्यपि देहे देहभेदे विश्वोऽनुभूयते तथापि कथं जागरिते तैजसोऽनुभूयत इत्याशंक्य द्वितीयं पादं व्याचष्टे दक्षिणेति। यथा
स्वप्ने जागरितवासनारूपेणाभिव्यक्तमर्थजातं द्रष्टानुभवति तथैव जागरिते दक्षिणे चक्षुषि द्रष्टृत्वेन व्यवस्थितः सन्निकृष्टं रू
पं दृष्ट्वा पुनर्निमीलिताक्षो दृष्टमेव रूपं रूपोपलब्धिजनितसमुद्भूतवासनात्मना मनस्यंतरभिव्यक्तं स्मरन् विश्वस्तैजसो
भवतीति तथा च तयोर्भेदाशंका नावतरतीत्यर्थः। स्वप्नजागरितयोर्वैलक्षण्यात्तु द्रष्टुर्विश्वतैजसयोरपि वैलक्षण्यमुचित
मित्याशंक्याह यथेति। जागरिते यथार्थजातं द्रष्टा पश्यति तथैव स्वप्नेऽपि तदुपलभ्यते ततो न तयोर्वैलक्षण्यसिद्धिरित्यर्थः।
द्वितीयपादस्य व्याख्यामुपसंहरति अत इति। स्थानद्वये द्रष्टृभेदाशंकानिरवकाशेति दर्शयितुमेवकारः। तृतीयं पादं व्या
कुर्वन् जाग्रत्स्वेव सुषुप्तिं दर्शयति आकाशे चेति। यो विश्वस्तैजसत्वमुपगतः स पुनः स्मरणाख्यस्य व्यापारस्य व्यावृत्तौ
हृदयावच्छिन्नाकाशे स्थितः सन् प्राज्ञो भूत्वा न खलूपलक्षितो भवति तर्हि तस्य रूपविषयदर्शनस्मरणोपरिहृत्य विशि
ष्टाकाशनिविष्टस्य ग्रहाद्वार्थांतरत्वं अतस्तु सह एकीभूतो विषयविषय्याकाररहितो घनप्रज्ञो विशेषविज्ञानविरहितरू
पांतररहितस्तिष्ठतीत्यर्थः। उक्तमर्थं प्रपंचयन् मनोव्यापाराभावादिति हेतुमुक्त्वा व्याचष्टे दर्शनेत्यादिना। अविशेषेणा
व्याकृतरूपेणेत्यर्थः। अवस्थानं जागरिते सुषुप्तमिति विशेषः। यदुक्तमव्याकृतेन प्राणात्मना हृदयेऽवस्थानमिति तत्र
प्रमाणमाह प्राणो हीति। यो हि प्राणोऽध्यात्मं प्रसिद्धः स वागादीन् प्राणानात्मनि संवृङ्क्ते संहरतीति प्राणस्याध्या
त्मं वागादिसंहर्तृत्वं उक्तमधिदैवं च यो वायुः सूत्रात्मा सोऽग्न्यादीनात्मनि संहरतीत्यग्न्यादिसंहर्तृत्वं वायोरुक्तं
अध्यात्माधिदैवयोरेकत्वात् प्राणस्य वायोर्वागादिष्वग्न्यादिषु संहर्तृत्वेनाव्याकृतत्वस्य संवर्गविद्यायां सूचित
त्वादव्याकृतेन प्राणात्मना सुषुप्ते प्राज्ञस्यावस्थानमिति युक्तमित्यर्थः। पूर्वमेव विश्वविराजोरैक्यस्यानंतरं च
सुषुप्ताव्याकृतयोरेकत्वस्य दर्शितत्वात्तैजसहिरण्यगर्भयोरनुक्तमभेदं वक्तव्यमिदानीमुपन्यस्यति। तैजस इति

तत्र हेतुमाह। मनस्त्वादिति। हिरण्यगर्भस्य समष्टिमनोनिष्ठत्वात्। तैजसस्य व्यष्टिमनोगतत्वात्। तयोश्च समष्टिव्यष्टिमनसोरेकत्वात्त
त्तयोरपि तैजसहिरण्यगर्भयोरेकत्वमुचितमित्यर्थः। किंच हिरण्यगर्भस्य क्रियाशक्त्युपाधौ लिंगात्मतया प्रसिद्धत्वात्तस्य च सामाना
धिकरण्याश्रुत्या मनसा सहाभेदावगमान्मनोनिष्ठस्य तैजसस्य युक्तं हिरण्यगर्भत्वमित्याह। लिंगमिति। किं च पुरुषस्य मनोमयत्वश्र
वणात्पुरुषविशेषत्वाच्च हिरण्यगर्भस्य तत्प्रधानत्वाधिगमात्तन्निष्ठस्तैजसो हिरण्यगर्भो भवितुमर्हतीत्याह। मनोमय इति। प्राप्ता
स्य प्रागुक्तमव्याकृतमाक्षिपति। नन्विति। सुषुप्ते हि प्राणो नामरूपाभ्यां व्याकृतो युक्तस्तद्व्यापारस्य पार्श्वस्थैरतिस्पष्टं दृष्टत्वादित्यर्थः। किं
च तस्यामवस्थायां वागादीनि करणानि प्राणात्मकानि भवंतीति। तेषु तस्यैव सर्वे रूपमभवन्निति श्रुतेरतोऽपि प्राणस्य व्याकृतत्वं युक्त
मित्याह। तदात्मकानीति। उक्तन्यायेन प्राणस्याव्याकृतत्वायोगादव्याकृतेन प्राणात्मना सुषुप्तस्य व्याख्यानमयुक्तमिति निगमयति
कथमिति। एकलक्षणत्वादव्याकृतप्राणयोरेकत्वोपपत्तिरित्युत्तरमाह। नैष दोष इति। अव्याकृतं हि देशकालपरिच्छेदशून्यं। प्राणोऽपि
सौषुप्तदृष्टस्तथा। न हि सौषुप्तदृष्ट्या तत्कालीनस्य प्राणस्य देशादिपरिच्छेदोऽवगम्यते। तथा च लक्षणाविशेषादव्याकृतप्राणयोरे
कत्वमविरुद्धमित्यर्थः। तस्यायं प्राणो ममायमिति देशपरिच्छेदप्रतिभानादेकलक्षणत्वाभावान्न प्राणस्याव्याकृतत्वमित्याशंक्याह
यद्यपीति। परिच्छिन्नाभिमानवतां मध्येऽयं प्रत्येकं ममायमिति प्राणाभिमाने सति प्राणस्य यद्यपि व्याकृतत्वं भवति तथापि सुषुप्त्यव
स्थायां पिंडेन परिच्छिन्नो यो विशेषस्तद्विषयो योऽभिमानस्तस्य निरोधस्तस्मिन्नभवतीति प्राणोऽव्याकृत एवेति। यथा जना
नि वृंदेष्वा विशेषाभिमानविषयत्वेन व्याकृतत्वेऽपि सुषुप्तदृष्ट्या तदुपसंहारादव्याकृतत्वं प्राणस्य विरुद्धमिति भावः। विशे
षाभिमाननिरोधे प्राणाभिमानिनोऽपि तदभिमाननिरोधेनाविशेषापत्तिः सुषुप्तिः तत्राव्याकृतत्वात्प्राणस्य प्रागुक्तं दृष्टांतविशिष्टा ते
प्राणस्याव्याकृतत्वं कुतो दृष्टमित्याशंक्याह। यथेति। परिच्छिन्नाभिमानानां प्राणलयो मरणं। तत्राभिमाननिरोधे प्राणो नामरूपाभ्यामव्या
कृतो यथा दृष्टस्तथैव ॰॰॰ ततो विशेषाभिमाननिरोधे प्राणस्याव्याकृतत्वं सिद्धमित्यर्थः। किंच यथाधिदैविकमव्याकृतं जगत्प्रस
वबीजं तद्वेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्या[क्रि]यत इति श्रुतेः। तथा प्राणाख्यं सुषुप्तं जाग्रत्स्वप्नयोः प्रवृत्तिबीजं
तथा च कार्यप्रतिप्रसवबीजरूपत्वमविशिष्टमुभयोरिति लक्षणाविशेषादव्याकृतप्राणयोरेकत्वसिद्धिरित्याह। प्रसवेति
समानमित्यनुकर्षार्थश्चकारः। उपाधिस्वभावालोचनया सुषुप्ताव्याकृतयोरभेदमभिधायोपाधितत्स्वभावालोचनयापि
तयोरभेदमाह। तदध्यक्षश्चेति। अव्याकृतावस्थः सुषुप्तावस्थश्च तयोराध्यात्मिकाधिदैवयोरेकोऽधिष्ठाता चिद्धातुरतोऽ
पि तयोरेकत्वं सिध्यतीत्यर्थः। सुषुप्ताव्याकृतयोरेवमेकत्वं प्रसाध्य तस्मिन्नव्याकृते सुषुप्ते प्रागुक्तं विशेषणं युक्तमित्याह

भा०आ०
आ०

परिच्छिन्नेति यद्यपि विशेषानभिव्यक्तिमात्रेणैकीभूतत्वादि विशेषणमुपपादितं तथापि परिच्छिन्नाभिमानिनामुपाधिप्रधानानां तत्र
तत्र चाध्यक्षाणां चोपहितानामव्याकृतेनैकत्वमतोऽव्याप्तिः प्रागुक्तविशेषणोपपत्तिरित्यर्थः किं चाध्यात्माधिदैवयोरेकत्वमिति प्रागुक्तहे
तुरस्त्वावाच्युक्तं सुषुप्तप्राज्ञे प्राणात्मन्यव्याकृतेऽध्योक्तं विशेषणमित्याह पूर्वोक्तेति संयमनादिशब्देन सर्वेश्वरत्वादि विशेषणं गृह्यते
प्राणशब्दस्य पूर्वत्र वायुविकारे रूढत्वान्नाव्याकृतविषयत्वं रूढिविरोधादिति शंकते कथमिति अन्यत्र रूढेरपि प्रश्नोऽत्र प्रयोगव
शादव्याकृतविषयत्वं प्राणशब्दस्य युक्तमिति परिहरति प्राणबंधनमिति प्रकरणस्य ब्रह्मविषयत्वाद्ब्रह्मण्येव प्रकृते वाक्ये प्राणशब्द
स्य प्रयोगान्नाव्याकृतविषयत्वं तस्य युक्तं प्रकरणविरोधादिति शंकते नन्विति प्रकरणस्य ब्रह्मविषयत्वेऽपि ब्रह्मणः सत्त्वस्वरूपस्य शब्द
स्वरूपीकारादस्मिन्नपि वाक्ये तत्रैव प्राणशब्दप्रयोगाद्युक्तं तस्याव्याकृतविषयत्वमित्युत्तरमाह नैष दोष इति संग्रहवाक्यं प्रपंचयति भा०
यद्यपीति तत्रेति प्राणबंधनवाक्यं परामृश्यते जीवशब्दः सर्वस्य कार्यजातस्योपलक्षणं प्रकरणवाक्ययोरुभयोरपि परिशुद्धब्रह्म
विषयत्वे का क्षतिरित्याशंक्य परिशुद्धस्य ब्रह्मणः शब्दप्रवृत्तिनिमित्तागोचरत्वात् तत्र शब्दवाच्यत्वानुपपत्तेर्मैवमित्याह यदि हीति न
केवलं निरुपाधिकं निर्विशेषं ब्रह्म वाङ्मनसगोचरमिति श्रुतेरेव निर्धार्यते किंतु स्मृतेरपीत्याह न सदिति किंच कार्यजातं प्रतिबी
जभूताज्ञानरहितया शुद्धत्वेनास्मिन्प्रकरणे ब्रह्म विवक्षितं चेत्तर्हि सता सोम्य तदा संपन्नो भवतीति जीवानां सत्संपत्तिश्रवणात् ब्रह्म
णस्संछिन्नस्य शुद्धत्वे सुषुप्त्यादौ तत्र लीनानामेकीभूतानां जीवानां पुनरुत्थानं नोपपद्यते दृश्यते च पुनरुत्थानं तेन शबलमेव ब्र
ह्मैव ब्रह्मात्र विवक्षितमित्याह निर्बीजतयेति सुषुप्त्यादौ शुद्धे ब्रह्मणि विलीनानामपि पुनरुत्थाने मोक्षानुपपत्तिं दोषमाह मुक्तानां चे
ति ननु तेषामपुनरुत्थानं हेत्वभावादित्याशंक्य सुषुप्तानां प्रलीनानां च न तर्हि पुनरुत्थाने हेत्वभावस्य तुल्यत्वादित्याह बीजाभावेति नन्वना
द्यनिर्वाच्यमज्ञानं संसारस्य बीजभूतं नास्त्येव यद्ब्रह्मणो विशेषणं भवति अग्रहणमिथ्याज्ञानतत्संस्काराणामज्ञानशब्दवाच्यत्वात्त्वा
ह ज्ञानेति अज्ञोऽहमित्यज्ञानमपरोक्षमग्रहणस्य च ग्रहणप्रागभावस्यानापरोक्षत्वसिद्धिप्रसन्निकर्षाभावादनुपलब्धिगम्यत्वाद्वै
भ्रांतितत्संस्कारयोश्चाभावेतर कार्यत्वादुपादानापेक्षणोदात्मनश्च केवलस्यातद्धेतुत्वात्तदुपादानत्वेनानाद्यज्ञानसिद्धिः किंच दे ७
वदत्तप्रमातृनिष्ठप्रागभावातिरिक्तानादिप्रध्वंसनी प्रमात्वात् यज्ञदत्तप्रमावत् नच तदभावे सम्यग्ज्ञानार्थवत्त्वं क्षणिकत्वेन भ्रांतेस्त
स्तदनिवर्त्यत्वात् संस्कारस्य च सत्यपि सम्यग्ज्ञाने क्वचिदनुवृत्तिदर्शनात् नचाग्रहणस्य तन्निवर्त्यत्वं ज्ञानस्य तन्निवृत्तित्वादतो ज्ञा
नदाढ्यं संसारबीजभूतमनाद्यनिर्वाच्यमज्ञानं ज्ञानस्याप्यर्थवत्त्वायास्थेयमन्यथा तदर्शनैर्थक्यप्रसंगादित्यर्थः शुद्धस्य ब्रह्मणो वा
त च्यप्रकरणाभ्यां विवक्षितत्वाभावे फलितमाह तस्मादिति ब्रह्मणः शबलस्यैव प्राकरणिकत्वाद्वाक्यपि तस्मिन्प्राणशब्दाद्युक्तं प्रा

पाशब्दस्याव्याकृतविषयत्वमिति भावः। यतो ऽनाद्यनिर्वाच्याज्ञानशबलस्यैव कारणत्वं ब्रह्मणो विवक्ष्यते अत एव कारणत्वनिषेधे
न परिशुद्धं ब्रह्मेत्युक्तिमुपदिश्यते तेन देतदाह अत एवेति। अक्षरमव्याकृतं तच्च कार्यापेक्षया परं तस्मात्परो ऽयं परमात्मा स हि कार्यकारणा
भ्यामस्पृष्टो वर्तते वा ऽहं कार्यमाभ्यंतरं कारणमिति ताभ्यां सह तत्कल्पनाधिष्ठानत्वेन वर्तमानत्वाद्विद्वानुः तेज आदि समस्तविक्रियाभ्य
स्तत्त्वेन कूटस्थः श्रुतिस्मृत्योरप्युपदिश्यते यतो ब्रह्मणः सकाशाद्वावः सुर्वाः मनसा सह यच्च काशाम अप्राप्य निवर्तंते तद्ब्रह्मानंदरूपं विद्वा
न्न बिभेति नेति नेतीति च वीप्सया सर्वमारोपितमपाक्रियते आदिशब्देनास्थूलादि वाक्यं गृह्यते बीजत्वनिरासेन शुद्धं ब्रह्म व्यप
दिश्यते चेत् बीजत्वशबलस्यैवेति सिद्धमित्यर्थः आचार्येणानुक्तत्वात् न कारणानिरिक्तं शुद्धं ब्रह्मास्तीत्याशंक्य नेतः प्रज्ञामित्या
दिवाक्यशेषान्नैवमित्याह नामिति उक्तन्यायेन वस्तुस्वरूपावस्थायामव्याकृतस्य देहे अनुभवाभावात् त्रिधा देहे व्यवस्थितत्व इति कथमि
कथा त्याह बीजेति विश्वादीनां रूपाणां त्रिधा देहे व्यवस्थितिं प्रतिपाद्य तेषामेव त्रिधा भोगं निगमयति विश्वो हीति भोगप्रयुक्तां तृप्तिं
अधुना त्रेधा विभजते स्थूलमिति उदाहृतश्लोकयोर्व्याख्यानापेक्षां वारयति उक्तार्थाविति प्रकृतभोक्तृभोग्यपदार्थद्वयपरिज्ञा
नस्यावांतरफलमाह त्रिष्विति पूर्वार्द्धं व्याचष्टे जागरादिष्विति भोग्यत्वेनैकत्वे ऽपि त्रैविध्यमवांतरभेदाद्दुर्ज्ञेयं भोक्तुरेकत्वे हेतुमा
ह सोहमिति यो ऽहं सुषुप्तः सो ऽहं स्वप्नं प्राप्तः पश्यः स्वप्नमद्राक्षं सो ऽहमिदानीं जागर्मीति एकत्वं प्रतिसंधीयते न च तत्र बाधकमस्ति
न युक्तं भोक्तुरेकत्वमित्यर्थः किं चाज्ञानं तत्कार्यं च प्रतिप्राज्ञादिषु द्रष्टृत्वस्याविशिष्टत्वात् द्रष्टृभेदे च प्रमाणाभावात् युक्तं च
कत्वमित्याह दृष्टत्वेति द्वितीयार्द्धं विभजते योवेदेति कथमेतावता भोगप्रयुक्तदोषराहित्यं तत्राह भोज्यस्येति यद्यपि भोक्तु
रेकस्यैव सर्वं भोग्यमित्यवगतं तथापि कथं सर्वं भुंजानो भोगप्रयुक्तदोषवान्न भवतीत्याशंक्याह न हीति उक्तमर्थं दृष्टांतेन स्पष्टयति शंका
न ह्यग्निरिति स्वविषयान् काष्ठादीन् दग्ध्वा न हीयते वर्द्धते वा अग्निरिति संबंधः एष योनिरित्यत्र प्राज्ञस्य प्रपंचकारणत्वं प्रति
जातं तत्र स कार्यमत्सत्कार्यं प्रति वा कारणत्वमिति संदेहे निर्द्धारयितुमारभते प्रभव इति तत्रावांतरभेदमाह सर्वमिति पुरुषा ४५
हि सर्वं मूर्च्चेतनं जगदुपाधिभूतं तमःप्रधानं गृहीत्वा जनयति अत एव पुरुषे कारणवाचि प्राणपदं प्रयुज्यते एवं सत्त्वे चैतन्यप्रधाने ऽपि
तेन चैतन्यस्यांशुवदवस्थितान् प्रतिबिंबकल्पान् जीवानाभासभूतानुत्पादयति एवं चेतनाचेतनात्मकमशेषं जगदसंकीर्णं
संपादयतीत्यर्थः न नु सतां भावानां सत्त्वादेव प्रभवो न संभवति असति प्रसंगादित्याशंक्य पूर्वार्द्धमाचष्टे सतामिति स्वेनाधिष्ठाना
त्मना विद्यमानानां मायावाविद्याकृतं मायामयमारोपितं स्वरूपं तेन प्रभवः संभवतीत्यर्थः असज्जन्मनिरसनेन मतं तेरपाकृत्य स
ज्जन्म निर्द्धारयितुं शंक्य मिथ्याशंक्याह वस्तुतीति जन्मनः पूर्वं सर्वस्य सत्त्वे कारणव्यापारसाध्यत्वासिद्धेर्मिथ्यात्वं च कथं स

तामेव प्रभावो भावानामित्याशंक्याह यदि हीति कार्यप्रपंचस्यासत्वे कारणस्य ब्रह्मणः स्वारस्येन च व्यवहार्यत्वाभावात् स्वग्रहणेद्वार
भूतस्या लिंगस्याभावादसत्वमेव प्रसज्येत कार्येण हि लिंगेन कारणं ब्रह्माद्दष्टमपि सदेवावगम्यते तच्चेदसद्भावेन तस्य कारणेन संबंध
श्री ति सदेव कारणमपि स्यादित्यर्थः कार्यकारणयोरुभयोरपि भवत्वसत्वमित्याशंक्याह दृष्टं चेति अविद्ययात्मनाद्यनिर्वाच्यया कृता
श्चैते मायाबीजादुत्पन्नाश्च तेषामविद्यैव मायेत्यंगीकारात्तेषां रज्ज्वादौ कल्पितसर्पादीनामधिष्ठानभूतरज्ज्वादिरूपेणासत्वं दृष्टमि
ति योजना विमतं सदुपादानं कल्पितत्वात् रज्जुसर्पवदित्यर्थः दृष्टांतस्य साध्यविकलत्वशंकां परिहरति नहीति विवक्षितदृष्टां
तमनुक्त्वा दार्ष्टांतिकमाह यथेत्यादिना प्राणशब्दितं बीजमज्ञानं तद्भासकं लक्षणं तदात्मनेतियावत् तदेवमन्वेतनं सर्वं जगत्प्रागुत्पत्ते
बीजात्मनास्थितं बीजात्मा प्राणो व्यवहारयोग्यतया जनयतीत्युपसंहरत्यत इति चतुर्थपादं प्रतीकमादाय व्याकरोति चेतोंशूनित्या
दिना रवेरंशवो यथा वर्तंते तथा पुरुषस्य स्वयं चैतन्यात्मकस्य चेतोरूपाश्चैतन्याभासाः जीवाश्चेतोंशवो निर्दिष्टाः तेतान् पुरुषो जन
यतीत्युत्तरत्र संबंधः तेषां चिदात्मकात्पुरुषात्तत्वतो भेदाभावं विवक्षित्वा विशिनष्टि जलार्केति भेदधीस्तु तेषामुपाधिभेदादित्याह
प्राज्ञ इति पृथगिति स्थितं पुरुषस्य जीवने हेतुं कथयति विषयेति यथाग्निना समानरूपा विस्फुलिंगा जन्यंते तथा चिदात्मना समान
स्वभावा जीवाः स्वेनोत्पाद्यंते विषयविलक्षणत्वात्तु प्राणो न बीजात्मना तेषामुत्पादनं नचोत्पादानां जीवानामुत्पादकाच्चिदात्मनस्त
त्वतो भिन्नत्वं जलपात्रप्रतिबिंबितादित्यानां बिंबभूतात्तत्त्वतो भेदाभावात् तान् विश्वादीन् पुरुषश्चित्प्रधानो जनयतीत्यर्थः
विषयभावेन व्यवस्थितान् पुनर्भावान् प्राणो जनयतीति तृतीयंपादार्थमुपसंहरति इतरानिति चेतनाचेतनात्मकस्य जगतः सर्गप्रस्तुते
स्तोमत विवेचनार्थं मतांतरमुपन्यस्यति विभूतिमिति ईश्वरस्य विस्तारस्वकीयैश्वर्यव्यापनं सृष्टिरिति पक्षे सृष्टेर्वस्तुत्वशंकायां पक्षां
तरमाह स्वप्नेति कुतः सृष्टिचिंतकानामेतन्मतं तत्ववेदिनामेव किं न स्यात्तत्राह नत्विति सृष्टेरपि वस्तुत्वाद्वस्तुचिंतकानामपि तद्वाद
रो भविष्यतीत्याशंक्याह इंद्र इति मायामयी सृष्टिरादरविषया न भवतीत्यत्र दृष्टांतमाह नहीति मायावीत्यादिशब्देन तत्कार्यमु
च्यते दृष्टांतनिविष्टमर्थं दार्ष्टांतिके योजयति तथेति नहि परमार्थचिंतकानां कुत्रादर इत्याशंक्य सदृष्टांतमुत्तरमाह सर्वेस्या
दिना मायाछन्नत्वमदृश्यमानत्वे हेतुः तुर्याख्यं जागरस्वप्नसुषुप्तेभ्यो विश्वतैजसप्राज्ञेभ्यश्चातिरिक्तं तदस्पृष्टमिति शेषः परमा
र्थतत्वचिंता हि सम्यग्धीद्वारा फलवती न सृष्टेस्ततः सृष्ट्यावनादरस्त्वनिष्ठानामित्याह नेति परमार्थचिंतकानां सृष्ट्यावनादरणा
दपरमार्थनिष्ठानामेव सृष्टौ विशेषचिंतेत्युक्तेर्थे द्वितीयार्द्धमवतारयतीत्येतदिति जाग्रद्भुतानाम ध्यानामेव स्वप्नेत्रथनात्तु स
सत्यत्वं मायामायाश्च मध्यमादिलक्षणायाः सत्यत्वांगीकारादनयोर्विकल्पयोः सिद्धांताद्वैषम्यमुन्नेयं सृष्टिचिंतकानामेव सृष्टि

मंत्री

विषये विकल्पांतरमुत्थापयति । इच्छामात्रमिति । ज्योतिर्विदां कल्पनामाह । कालादिति । परमेश्वरस्येच्छामात्रं सृष्टिरित्यत्र हेतु
माह । सत्येति । यथा लोके कुलालादेः संकल्पनामात्रं घटादिकार्यं न तदतिरेकेण घटादिकार्यं सृष्टिरिष्टा नामरूपाभ्यां संनेरे
वकार्यं संकल्प्य बहिस्तन्निर्माणाभ्युपगमात् । तथा भगवतः सृष्टिः संकल्पनामात्रं न तदतिरिक्ता काचिदस्तीति केषांचि
दीश्वरवादिनां मतमित्यर्थः । यथा तथा वास्तु सृष्टिस्तस्यास्तु किं प्रयोजनमिति विकल्प्य द्वयमाह । भोगार्थमिति । सिद्धांतमाह । देव
स्येति । कः स्वभावो नामेत्युक्ते नैसर्गिकोऽपरोक्षो मायाशक्त्यर्थस्तस्येत्याह (तत्र) अयमिति । पूर्वपक्षाणामपवादं सूचयति । आप्त
ति । देवस्य परमेश्वरस्य स्वभावः सृष्टिरिति स्वभावपक्षे नैसर्गिकमायाकृता सृष्टिरिति मतं सिद्धांतत्वेनाश्रित्य चतुर्थपादेन दूष
णमुच्यते पक्षयोरनयोरिति योज्यं । ईश्वरस्येश्वरत्वस्याव्यापनं सृष्टिरित्येकः पक्षः स्वप्रस्वरूपा मायारूपा वा सृष्टिरिति पक्षे
द्वयमीश्वरस्य संकल्पस्य सृष्टिरिति पक्षांतरं कालादेव जगतः सृष्टिर्नेश्वरादीश्वरस्तूदासीन इत्यत्र विकल्पांतरं भोगा
र्थं क्रीडार्थं वा सृष्टिरिति फलगतं विकल्पद्वयं तेषामेतेषां सर्वेषामेव पक्षाणां दूषणं चतुर्थपादेनोक्तमिति पक्षांतरमाह
सर्वेषां वेति । नो खल्वाप्तकामस्य परमात्मनो मायां विना विभूतिख्यापनमुपयुज्यते । न च स्वेन मायाभ्यां सारूप्यमंतरेण मा
व या सृष्टिरंगीक्रियते । अवस्तुनोरेतयोस्तच्छब्दप्रयोगात् न च परमानंदस्वभावस्य परस्य विना मायामिच्छा संगच्छते । न हि तस्य
स्वतोऽविक्रियस्येच्छादिभाक्त्वं युक्तं न च मायामंतरेण भोगक्रीडे तस्योपपद्येते ततो मायामयी भगवतः सृष्टिरित्यर्थः । यदुक्तं का
लात्प्रसूतिं भूतानामिति तत्राह । नहीति । अधिष्ठानभूतरज्ज्वादीनां स्वभावशक्तितः स्वाज्ञानादेव सर्पाद्याभासत्वं तथापरस्य
स्वमायाशक्तिवशादेवाकाशाद्याभासत्वं । आत्मनः आकाशः संभूत इत्यादिश्रुतेर्न तु कालस्य भूतकारणं प्रमाणाभावादि
त्यर्थः । पादत्रये व्याख्याते व्याख्येयत्वेन क्रमप्राप्तं चतुर्थपादं व्याख्यातुमुत्तरग्रंथप्रवृत्तिरित्याह । चतुर्थमिति । ननु पादत्र
यवद्विधिमुखेनैव चतुर्थः पादोऽपि व्याख्यायतां किमिति निषेधमुखेन व्याख्यायते तत्राह । सर्वेति । सर्वाणि शब्दप्रवृत्तौ निमित्ता
नि षष्ठीगुणादीनि तैः शून्यत्वात्तुरीयस्य वाच्यत्वायोगान्निषेधद्वारेणैव तन्निर्देशः संभवतीत्यर्थः । साक्षाद्वाच्यत्वाभावे यथोन २४
लक्षितुं निर्दिदिक्षतीत्युक्तं यदि चतुर्थं विधिमुखेन निर्देष्टुं न शक्यं तर्हि शून्यमेव तदापद्येत तन्निषेधेनैव निर्दिश्यमानत्वात्तथा
विधशास्त्रस्यार्थवत्त्वादिति शंकते । शून्यमेवेति । ननु तुरीयस्य शून्यत्वमनुमातुं युक्तं विमतं सदधिष्ठानं कल्पितत्वात् तथाविधरज
तादिवदित्यनुमानात्तुरीयस्य सत्त्वसिद्धेरित्युत्तरमाह । तत्त्वेति । दृष्टांतं साधयति । नहीति । रजतादीनां सदनुविद्धबुद्धिबोध्य
त्वादवस्तुनस्य दृष्टत्वायोगात्तद्वदेव प्राणादिविकल्पानामपि नावस्त्वास्पदत्वं सिध्यतीत्यर्थः । यद्यधिष्ठानत्वं तुरीयस्येष्टं तर्हि

मा०भा०
व्या०

वाच्यत्वमधिष्ठानत्वात् घटादिवदिति प्रक्रमभंगः स्यादिति चोदयति। एवं न हीति। किं प्रातिभासिकमधिष्ठानत्वं हेतूकृतं किं वा ता-
त्त्विकं नाद्यः तस्य तात्त्विकवाच्यत्वासाधकत्वात् तात्त्विके तु वाच्यत्वप्रक्रमो न विरुध्येत न द्वितीयः शुक्त्यादिषु कल्पितरजतादेरवस्तुत्व-
वत् तुरीयेपि कल्पितप्राणादेरवस्तुत्वात् त्वन्मते यौगिकाधिष्ठानत्वस्य तात्त्विकत्वायोगादिति दूषयति। नप्राणादीति। किं वा वाच्यत्वे तुरी-
यस्य निरूप्यमाणे तत्र शब्दप्रवृत्तौ निमित्तं वक्तव्यं तच्च षष्ठीरूढिर्वा जातिर्वा क्रिया वा गुणो वेति विकल्पप्रथमं दूषयति। नहीति। तु-
रीयातिरिक्तस्यावस्तुत्वात् तस्य तुरीयस्य च वस्तुभूतसं(बं)धासिद्धेर्विषयाभावे कुतः षष्ठीरित्यर्थः। द्वितीयं दूषयति। नापीति। वि-
शिष्टरूपेणाविषयत्वेपि स्वरूपेण निरूपाधिकात्मना तदविषयत्वात् नात्र गवादाविव रूढिरवतरतीत्यर्थः। न तृतीयः गवादाविवाऽ-
द्वितीये तुरीये सामान्यविशेषभावस्याभिधातुमयोग्यत्वादिति मत्वाह। गवादिवदिति। चतुर्थः पाचकादाविवाविक्रिये तुरीये क्रिया-
वत्त्वस्य शब्दप्रवृत्तिनिमित्तस्य वक्तुमयुक्तत्वादित्याह। नाविक्रियावत्त्वमिति। न पंचमः(न) उत्पलादौ नीलादिशब्दवन्निर्गुणे तुरीये गुण-
वत्त्वस्य शब्दप्रवृत्तिनिमित्तस्य वक्तुमयुक्तत्वादित्याह। नापीति। तदेवं तुरीयस्यावाच्यत्वानुमाने शब्दप्रवृत्तिनिमित्तानुपलब्धिबाधितमि-
ति फलितमाह। अनर्थेति। यदि तुरीयस्य नास्ति विशिष्टजात्यादिमत्त्वं तर्हि नरविषाणादिदृष्टेरिव तद्दृष्टेरपि निष्फलत्वं विशिष्टजात्यादि-
मतो रजतादेरूपानस्य फलवत्त्वोपलंभादिति शंकते। शशविषाणादीति। यथा शुक्तिरियमित्यवगमे रजतादिविषयतृष्णानिवृत्तिस्ते
तथा तुरीयं ब्रह्माहमित्यात्मत्वेन तुरीयसाक्षात्कारे सत्यनात्मविषयतृष्णा व्यवच्छिद्यते तदेवमात्मत्वेन तुरीयावगमस्य सर्वार्थकां-
क्षानिवर्तकत्वादनर्थकत्वाशंकानुपयुक्तेति परिहरति। नेत्यादिना। तुरीयस्यात्मत्वावगमे सति सर्वानर्थहेतुतृष्णादिदोषनिवृत्तिलक्ष-
णं फलमुक्तं विद्वदनुभवेन साधयति। नहीति। ननु तुरीयमशेषविशेषशून्यं नात्मत्वेनावगंतुं शक्यते तद्धेत्वभावादिति तत्राह। नवेति।
सर्वोपनिषदामित्युक्तमेवोदाहरणलेशेन दर्शयति। तत्त्वमसीति। निषेधमुखेनैव तुरीयस्य प्रतिपादनं न विधिमुखेनेत्युपपादयन्ना-
नुवादपूर्वकमुपसंहारमवतारयति। सोयमित्यादिना। बीजांकुरस्थानीयमिथोहेतुहेतुमद्भावेन व्यवस्थितमित्यर्थः। अबीजात्म-
कं कार्यकारणविनिर्मुक्तमिति यावत् तत्र हेतुं सूचयति। परमार्थेति। तस्य विधिमुखेन निर्देशानुपपत्तिं प्रागुक्तामभिप्रेत्याह। सर्पादी-
ति। किमुत्तरेण ग्रंथेन तुरीयं प्रतिपाद्यते किं वा तस्य रज्जुतत्त्ववैलक्षण्यं विवक्ष्यते प्रथमे प्रतिपादकस्य विधानाव्यतिरेकादन्य- १२
निषेधानर्थक्यं द्वितीयेपि तदानर्थक्यमापद्येत प्रागुक्तेरेवोक्तादस्यत्वासिद्धिरिति मन्वानः शंकते। नन्विति। न तावत्तुरीयं विधिमु-
खेन बोध्यं तस्य स्वप्रकाशत्वात् तस्मिन् प्रकाशाद्यनुदयात् तथापि समारोपितविश्वादिप्रतिपन्नं तन्निषेधेन बोध्यते तद्विनिषेधेनस्य प-
थावदवधानादतो न निषेधानर्थक्यमिति परिहरति। न सर्पादीति। तुरीयस्य पादत्रयविलक्षणस्यार्थादेव सिद्धत्वात् जीवात्मनः स्वा-

रूपेण

नत्रयविशिष्टस्य तुरीयं ब्रह्मस्वरूपमिति नोपदेशमंतरेण सिध्यतीति तुरीयग्रंथोऽर्थवानित्यर्थः । यथाविधि गुरुवक्त्रात् तेन न तत्त्वमसि वा
क्येन स्थानत्रयसाक्षिणः त्वंपदलक्ष्यस्य तत्पदलक्ष्यब्रह्मतालक्षणः । बोध्यते तथा निषेधशास्त्रेणापि तत्पर्यवृत्त्या जीवस्य तुरीय
ब्रह्मत्वं प्रतिपादयितुं दृष्टांतमाह । तद्वदिति । ननु स्थानत्रयविशिष्टस्यात्मनो नैव तुरीयात्मत्वं तुरीयग्रंथेन प्रतिपाद्यते तुरीयस्य विशि
ष्टाद्विलक्षणत्वेनात्यंतभिन्नत्वात् तत्राह । यदिहेति । प्रातिभासिकवैलक्षण्येपि विशिष्टोपलक्ष्ययोरात्यंतिकवैलक्षण्याभावान्नता
त्त्विकं तुरीयस्य विशिष्टादन्यत्वं अन्यथा अत्यंतभिन्नयोर्मिथः संस्पर्शेनाविरहितयोः रूपायोपेयभावायोगात् तुरीयप्रतिपत्तौ विशि
स्व ६ ष्टस्य द्वारत्वाभावादन्यं च तत्प्रतिपत्तिद्वारस्यादर्शनात्तुरीयाप्रतिपत्तिरेव स्यादित्यर्थः । शास्त्रात्तत्प्रतिपत्तिः स्यादिति चेन्नेत्याह । शा
स्त्रेति । तर्हि विशिष्टमनूद्य विशेषणापोहेन तस्य तुरीयत्वमुपदिशति भेदेऽव्याप्तिकेन तदानर्थक्यान्न शास्त्रात्तत्प्रतिपत्तिरित्यर्थः । मा तर्हि
तुरीयप्रतिपत्तिर्भूदिति चेत्तत्राह । अन्यथेति । विशिष्टस्यैवाप्रतिपत्त्या तुरीयस्याप्रतिपत्तौ प्रतिपन्नस्य विशिष्टादेर्विशिष्टस्य प्रस्तुतत्वादन्य
स्याप्रतिपन्नत्वान्नैरात्म्यधीरेवापद्येतेत्यर्थः । भेदपक्षस्याद्ययोक्तदोषप्रवेशान्न संभवति तर्हि माभूद्भेदपक्षोऽपि कथं निर्वहतीति चेत्तत्र
किं फलं पर्यनुयुज्यते किं वा प्रमाणांतरमथवा साधनांतरमिति विकल्प्याद्यं दूषयति । रज्जुरिवेति । यथा रज्ज्वधिष्ठानभूता सर्पधार
दिभिर्विकल्प्यते तथात्मा एकएवात्मा स्थानत्रयेऽपि पदांतः प्रज्ञत्वादिना विकल्प्यमानो बुद्ध्याभासते तदा तदनुवादेनांतः प्रज्ञत्वादिप्रति
षेधजनितं यत्प्रमाणरूपं विज्ञानं तदुत्पत्त्या समानकालमेवात्मन्यनर्थनिवृत्तिरूपं फलं सिद्धमिति न फलं पर्यनुयोगाऽवकाश इति स
र्थः । शास्त्रस्य संसृष्टपरोक्षज्ञानहेतोरसंसृष्टापरोक्षज्ञानहेतुत्वायोगात् तुरीयज्ञाने प्रमाणांतरमेष्टव्यमिति पक्षं प्रत्याह । तुरीयेति । त
स्य हि साक्षात्कारे न शास्त्रातिरिक्तं प्रमाणमन्वेष्यं शास्त्रस्य विषयानुसारेण प्रमाणहेतुत्वाद्विषयस्य तुरीयस्यासंसृष्टापरोक्षत्वादि
त्यर्थः । तुरीयसाक्षात्कारे प्रसंख्यानाख्यं साधनांतरमेष्टव्यमिति पक्षं प्रतिक्षिपति । साधनांतरं चेति । प्रसंख्यानस्याप्रमाणत्वान्न प्रमा
रूपसाक्षात्कारं प्रति हेतुतेति भावः । यथा रज्जुरियं सर्पो नेति विवेकधीसमुदयदशायामेव रज्ज्वां सर्पनिवृत्तिफले सिद्धे रज्जुसाक्षात्का
रस्य फलांतरं प्रमाणांतरं साधनांतरं वा न मृग्यते कृतत्वात्तथापीत्याह । रज्ज्वेति । विषयगतं प्राकट्यं प्रमाणफलं नाध्यस्तनिवृत्तिरित्या
शंक्याह । येनामिति । स्वविषयाज्ञानापनयाय प्रवृत्तौ प्रमाणक्रियायाः स्वविषये भावरूपमतिशयमाधत्ते वेदनयार्थक्रियात्वाविशेषात्
च्छिदिः छेद्यसंयोगापनयातिरिक्तमतिशयमादध्यात् न च संयोगविनाशातिरिक्ते विभागे संप्रतिपत्तिरस्ति प्राकट्यस्य च प्रकाशत्वेन
न वस्त्वार्थनिष्ठत्वमप्रकाशत्वे तेनार्थेनार्थो नास्तीति भावः । अज्ञाननिवर्तकमेव प्रमाणमिति पक्षे विषयस्फुरणे कारणाभावाद्विष
यसंवेदनं न स्यादित्याशंक्याह । घटेति । घटो हि तमसा समावृतो व्यवहारयोग्यो नास्तीति तस्य तमसो निवृत्त्यस्य व्यवहारयोग्यत्वा
पादने प्रत्यक्षादिप्रमाणं प्रवर्तते तेनज्ञानं नोपादित्सितस्यानिष्पन्नस्याप्रमेयस्य तमसो निवृत्तिलक्षणे पर्यवस्यतीति तदा घट

संवेदनमात्रं विकं प्रमाणफलं न भवति घटाच्छिद्क्रियाछेदस्य तरोरवयवयोर्मिथः संयोगनिरसने प्रवृत्तासती तयोरेव छेद्यावयव
योर्द्वैधीभावे फलपर्यवसायिनी त्वन्यतरावयवे पिच्छिदिक्रिया प्रयते न त्विहापि तमोनिवृत्तौ प्रमाणं निवृत्य पाति घटस्फुरणं त्वापादिकं न चान्त
स्प॰ स्य स्फुरणायित्वं अभिव्यंजकप्रमातृव्यापारस्थिरत्वादित्यर्थः किंच घटादेर्जडस्य संविदपेक्षत्वात्तत्र संविदो मानफलत्वेपि नात्मन्यजडे
संविदेकतानेमानस्यारोपितधर्मनिवर्तकत्वमंतरेण संविज्ञनकत्वं व्यापारः संभवतीत्याह न चेति तुरीयात्मनि संवेदनजननव्यापारो
न प्रमाणस्य कल्पनीयः स्य संविदात्मत्वादारोपितनिवृत्तिव्यतिरेकेण मानजन्यफलं संविदनपेक्षत्वादित्युक्तं तत्रैव हेत्वंतरमाह
अंतःप्रज्ञत्वादीति आश्रयाभावेनाश्रितप्रमाणाभावादनंतरक्षणे तस्य व्यापारानुपपत्तिरित्यत्र वाक्यशेषमनुकूलयति तथा
श्चेति किंच ज्ञानाधीनद्वैतनिवृत्त्यवच्छिन्नक्षणातिरेकेण्यान क्षणांतरे ज्ञानं स्थातुं पारयति न चास्थिरं ज्ञानं व्यापारायपर्याप्तं
तथा च ज्ञानस्य द्वैतनिवृत्तिव्यतिरेकेण नात्मनि व्यापारोस्तीत्याह ज्ञानस्येति ननु द्वैतनिवर्तकमपि स्यात्मानं निवर्तयति निवर्त्यनिवर्त
कभावस्यैकत्र विरोधाद्वैतो यावन्निवर्तकं स्थास्यति तत्राह अवस्थानेवेति निवर्तकस्य ज्ञानस्य द्वैतनिवृत्तेरनंतरमपि निवर्तकांतरस
पेक्षावस्थाने तस्य तस्य निवर्तकांतरस्य सव्यपेक्षत्वादाद्यस्यापि ज्ञानस्य निवर्तकत्वासिद्धिः न च ज्ञानस्य स्वनिवर्तकत्वानुपपत्तिः स्व
परविरोधिनां भावानां बहुलमुपलंभादित्यर्थः ज्ञानस्य जन्मातिरिक्तव्यापाराभावान्न जन्मनश्च द्वैतनिषेधेनैवोपक्षयान्न क्षणांतरे
विषयस्फुरणजननाय नैव स्थानादारोपितानर्थनिवृत्त्यैव ज्ञानं पर्यवसितमित्युपसंहरति तस्मादिति निषेधजनितविज्ञानमेव
प्रमाणं तस्य व्यापारो जन्मैव तेन समानकालैवानर्थनिवृत्तिरिति योजना तत्र हेतुमाह बीजभावेति सुषुप्तं हि स्वप्नजागरितयोः प्रति
बीजभावः तस्य शेषविशेषविज्ञानाभावरूपत्वाद्विशेषविज्ञानानां सर्वेषां घनमेकं साधारणमविभक्तं सुषुप्तमिति तत्प्रतिषेधो
नेत्यादिना संभवतीत्यर्थः युक्तं सर्पादीनां रज्ज्वादौ भ्रांतिप्रतिपन्नानां प्रतिषेधादसत्त्वं आत्मनि तु प्रमाणेनागम्यमानानामंतःप्रज्ञ
त्वादीनां न प्रतिषेधः युज्यते प्रमाणविरोधादिति शंकते कथमिति प्रमाणफलस्यासिद्धत्वाद्युक्तमंतःप्रज्ञत्वादीनामसत्त्वमि
ति परिहरति उच्यत इति विमतमसत्त्वं व्यभिचारित्वात् संप्रतिपन्नवदित्याह ज्ञस्वरूपेति तस्याविशेषेऽव्यभिचारः तत्र रज्ज्वाद
विवेत्युदाहरणमंतःप्रज्ञत्वादीनामितरेतरव्यभिचारे निदर्शनं सर्पधारादीति विमतं सत्यमव्यभिचारित्वाद्रज्ज्वादिवदित्याह सर्वत्रे
ति तस्यैव सत्यत्वे सर्वकल्पनाधिष्ठानत्वसिद्धिरिति भावः अव्यभिचारित्वहेतोरसिद्धिं शंकते सुषुप्त इति न च तत्र चैतन्यस्य व्यभिचा १२
रः सुषुप्तस्य स्फुरणव्याप्ततया साधकस्फुरणस्यावश्यकत्वादित्याह न सुषुप्तस्येति सुषुप्ते साधकस्फुरणसत्त्वे प्रमाणमाह न हि
नि ति निषेधरास्त्रालोचनपौ विशेषत्वं तु शेयस्योक्तं तदेव हेतूकृत्य ज्ञानं द्रिया विषयत्वमाह अत एवेति दृष्टस्यैवार्थक्रियादर्शना
दद्दृष्टत्वादर्थक्रियाराहित्यमिति विशेषणान्तरमाह यस्मादिति अदृष्टमित्यनेनाग्राह्यमित्यस्य पौनरुक्त्यं परिहरति कर्म

द्वैतैरिति अलक्षणमित्युक्तं सत्यं ज्ञानमनंतमित्यादिलक्षणोपलंभादित्याशंक्याह अलिंगमिति कोह्येवान्यात्कःप्राण्यादि
त्यादिलिंगोपन्यासविरुद्धमेतदित्याशंक्याह अननुमेयमिति प्रत्यक्षानुमानाविषयत्वप्रयुक्तं विशेषणांतरमाह अतएवेति मनो
विषयत्वाभावादेव शब्दाविषयत्वं शब्दप्रवृत्तेः सत्त्ववृत्तिपूर्वकत्वादित्याह अतएवेति नहि यथोक्तं वस्तु नास्त्येव प्रमाणाभावादित्या
शंक्याह एकात्मेति परोक्षार्थविषयतया विशेषणं व्याख्यायापरोक्षार्थतयापि व्याकरोत्यथवेति अपरोक्षात्मप्रत्ययोत्मनि प्र स्पा ४
माणत्वेन बृहदारण्यकश्रुतिमुदाहरति आत्मेत्येवेति यद्यात्मेतीत्यादिनापरिपूर्णत्वादिलक्षणात्मावगतो मोक्षः स चावाङ्मनसातीतः
श्रुतिभ्योऽवगतः तमेवैकरसं परमात्मानमस्य सूक्ष्मत्वेन गृहीत्वा तान्निवृत्तिं प्रतीत्यात्मनोऽवस्थात्रयातीतस्यापरोक्षमित्यद्वितीयत्वं श्रुति स्पतुरीय ८
तोऽवगम्यमित्यर्थः विशेषणांतरस्य पुनरुक्तिपरिहारमर्थभेदमाह अंतरिति स्थानिधर्मस्य स्थानधर्मस्य च प्रतिषेधोंतशब्देन परामृश्यते
शांतं रागद्वेषादिरहितमविक्रियं कूटस्थमित्यर्थः शिवं परिशुद्धं परमानंदस्वरूपमिति यावत् यस्माद्द्वैताभावोपलक्षितं तस्माच्चतुर्थ
मित्याह यतइति अद्वैतमित्येतद्व्याचष्टे भेदेति संख्याविशेषविषयत्वाभावे कथं चतुर्थत्वमित्याशंक्याह प्रतीयमानेति चतुर्थं तुरी
यमेवोर्ध्वं व्याख्यानव्याख्येयत्वेनापौनरुक्त्यं तस्योक्तविशेषणत्वेन मम किमायातमित्याशंक्याह स आत्मेति आत्मनि यथोक्तविशेष
णानि न प्रतिभांतीत्याशंक्याह स विज्ञेय इति तदेतद्व्याचष्टे प्रतीयमानेति नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वादित्यादि
वाक्यानि प्रतीकोपादानेन दर्शयति नहि द्रष्टुरिति आत्मन्यव्यवहार्ये कुतो विज्ञेयत्वमित्याशंक्याह भूतपूर्वमविद्यावस्थायां ज्ञेय
त्वेन प्रागतिस्तया इदानीमपि विज्ञेयत्वमुक्तमित्याह भूतेति विद्यावस्थायामेव किमिति ज्ञातृज्ञानज्ञेयविभागो न भवति तत्रा
ह ज्ञानइति ज्ञानेन तत्कारणस्याज्ञानस्यापनीतत्वादित्यर्थः नांतःप्रज्ञमित्यादिश्रुत्युक्तेऽर्थे तद्विवरणरूपान् श्लोकानवतारयति
अत्रेति त्रिविधं स्थानत्रयमस्माद्भवतीति व्युत्पत्त्या तुरीयो विभुरुच्यते नहि तुरीयातिरेकेण स्थानत्रयमात्मानं धारयति सर्वदुःख
नामाध्यात्मिकादिभेदभिन्नानां तद्धेतूनां तदाधाराणामिति यावत् ईशानपदं प्रयुज्य प्रभुपदं प्रयुंजानस्य पौनरुक्त्यमित्याशंक्या
ह ईशान इति तुरीयस्य दुःखनिवृत्तिं प्रति सामर्थ्यस्य नित्यत्वात् न कदाचिदपि दुःखं स्यादित्याशंक्याह नाद्विज्ञानेति संसृष्टरूपेण
व्ययोऽस्तीत्याशंक्य विशिनष्टि स्वरूपादिति तत्र प्रश्नपूर्वकमद्वितीयत्वं हेतुमाह कुत इति अतो द्वितीयस्य व्ययहेतोरभावादि
ति शेषः विश्वादीनां दृश्यमानत्वात्तुरीयस्याद्वितीयत्वासिद्धिरित्याशंक्याह सर्वभावानामिति अवस्थात्रयातीतस्य तुरीयस्यो
क्तलक्षणं विद्वदनुभवसिद्धमिति सूचयति स्मृत इति विश्वादिपृथक्त्वांतरविशेषनिरूपणद्वारेण तुरीयमेव निर्धारयति कार्येति
श्लोकस्य तात्पर्यमाह विश्वादीनामिति विश्वतैजसयोरुभयोर्बद्धत्वं सामान्यं प्राज्ञस्य कारणमात्रबद्धत्वमिति शेषः

श्री

अथेदं निरूपणं कुत्रोपयुज्यते तत्राह तुरीयेति प्राज्ञस्य कारणमात्रबद्धत्वं साधयति तत्त्वाप्रतिबोधेति त्रयाणामवांतरविशे
षोऽस्ति तेन प्रकृते किमायातमित्याशंक्याह तन्न इति तयोस्तस्मिन्न विद्यमानत्वं चिदेकतानेन तयोर्निरूपयितुमशक्यत्वादित्याह
न संभवतः (तुरीये) ति प्राज्ञस्य कारणबद्धत्वं साधयति नात्मानमिति तुरीयस्य कार्यकारणाभ्यामस्पृष्टत्वं स्पष्टयति तुरीय
मिति श्लोकस्य व्यावर्त्यमाशंकामाह कथमिति वाशब्दात्कथमित्यस्यानुवृत्तिः सूच्यते प्रथमबोधोत्तरत्वेन पादत्रयं व्याच
ष्टे यस्मादिति विलक्षणमनात्मानमिति यावत् अनृतमित्यस्य व्याख्यानम् अविद्याबीजं प्रसूतमिति द्वैतं द्वितीयमसत्त्वमित्य
र्थः वैधर्म्योदाहरणं यथेति प्राज्ञस्य विभागज्ञानाभावे फलमाह ततश्चेति यद्योक्ते तमसि कार्यलिंगकमनुमानं सूचयति अ
न७ न्यथेति द्वितीयं बोध्यं चतुर्थपादव्याख्याने प्रत्याह यस्मादित्यादिना सदेव तुरीयपादन्यस्याभावात्तुरीयमेव सर्वं तद्धि सदा दृक्
रूपमिति यस्मात्तस्मादिति योजना नत्वेति परिपूर्णं चिदेकतानं तुरीयं परामृश्यते अतएवेति कारणाभावे कार्यानुपपत्तेरित्य
न९ र्थः तुरीये तत्त्वाग्रहणान्यथाग्रहणयोरसंभवं दृढीकृतं साधयति नहीति यत्तुरीयस्य सदा दृगात्मत्वमुक्तं तत्र प्रमाणमाह नहि द्र
ष्टुरिति च चतुर्थपादं प्रकारांतरेण योजयति अथवेति तत्रापि श्रुतिमनुकूल(तु)यति नान्यदिति अनुमानप्रयुक्तां तुरीयेऽपि कार
णबद्धत्वाशंकां परिहरति द्वैतस्येति श्लोकस्य तात्पर्यं संगृह्णाति निमित्तांतरमिति विमतं कारणबद्धं द्वैताग्रहणत्वात् प्राज्ञव
दित्यनुमानमेव दर्शयन् निमित्तांतरमेव स्फोरयति कथमिति अनुमानकृताशंकानिवर्तकत्वेन श्लोकमवतारयति प्राज्ञेति प्राज्ञ
स्योत्तरभाविप्रबोधादिकार्यापेक्षया नियतपूर्वभावित्वं कारणबद्धत्वप्रयोजकं न तु तुरीयस्य तदस्तीत्यप्रयोजको हेतुरित्याह यस्मा
दिति किंच तुरीयस्याविशुद्धविद्यात्वप्रसाधनप्रमाणबाधात् कालात्ययापदिष्टो हेतुरित्याह सदेति नच पूर्वोक्तोपाधेः साधनव्याप्ति
स्तुरीयस्योत्तरभाविकार्यापेक्षया नियतप्राक्भावित्वाभावादिति मत्वाह तत्त्वेति दोषद्वयवत्त्वेनानुमानस्यामानत्वे फलितमाह
अतो नेति कार्यकारणबद्धौ तावित्यादिश्लोकोक्तमर्थमनुभवावष्टंभेन प्रपंचयति स्वप्नेति ननु तैजसस्यैव स्वप्नयुक्तत्वं युक्तं न तु विश्व
प्र५ स्याबुध्यमानस्य तद्योगो युज्यते अबुध्यमानत्वव्याघातकधर्मविशेषेण विश्वतैजसौ स्वप्ननिद्रायुताविति तत्र स्वप्नशब्दार्थमाह स्व
प्न इति यथा रज्ज्वां सर्पेति ह्रसमायोऽन्यथा गृह्यते तथा आत्मनि देहादिग्रहणमन्यथाग्रहणं आत्मनो देहादिवैलक्षण्यस्य १३
श्रुतियुक्तिसिद्धत्वात्तेन स्वप्नशब्दितेनान्यथाग्रहणेन संस्पृष्टत्वं विश्वतैजसयोर्विशिष्टमित्यर्थः तथा निद्राशब्दस्यैव निद्रायु
क्तान तु प्रबोधवतो विश्वस्येत्याशंक्याह निद्रेति उक्ताभ्यां स्वप्ननिद्राभ्यां विश्वतैजसयोर्वैशिष्ट्यं निगमयति नात्मानमिति
तयोरन्यथाग्रहणाग्रहणेन च वैशिष्ट्यं प्रागपि सूचितमित्याह अत इति द्वितीयपादं विभजते प्राज्ञस्त्विति द्वितीयार्द्ध

व्यावृत्ते नो भयमिति। तुरीये निद्रास्वप्नयोरदर्शने हेतुमाह। विरुद्धत्वादिति। अज्ञानतत्कार्ययोर्नित्यविज्ञप्तिरूपे तुरीये विरुद्धत्वाद
नुपलब्धिरित्यत्र दृष्टांतमाह। सवितरीवेति। तुरीये वस्तुतो नाविद्यातत्कार्ययोः संगतिरस्तीति प्रागपि सूचितमित्याह। अतो नेति
कदा तर्हि स्वप्नो भवतीत्यपेक्षायामाह। अन्यथेति। निद्रा तर्हि कदेति संदिहानं प्रत्याह। निद्रेति। तुरीयप्रतिपत्तिसमयं संगिरते विप
र्यासइति। श्लोकव्यावर्त्यामाशंकां संदर्शयति। कदेति। कदा स्वप्ननिद्रा भवति कदा वा निद्रानिष्ठः स्यादित्यपि द्रष्टव्यं प्रश्नत्रयस्यो
त्तरं श्लोकेन दर्शयति। अन्यथेति। तत्र कदा स्वप्नो भवतीति प्रश्नं परिहरति। स्वप्नेति। अवस्थाद्वये स्वप्नदृष्टरीत्यर्थः। द्वितीयं प्रश्नं स
माधत्ते। निद्रेति। विश्वादिषु त्रिषु तयोरिति द्विवचनं कथमित्याशंक्याह। स्वप्ननिद्रयोरिति। विश्वतैजसावेको राशिः प्राज्ञो द्वितीयः
ततः श्लोके द्विवचनमविरुद्धमित्यर्थः। प्रथमे राशौ विपर्यासद्वयरूपं कथयति। अन्यथेति। द्वितीयराशौ विपर्यासविशेषं दर्शयति
तुरीये त्विति। द्वितीयार्द्धगतान्यक्षराणि व्याकरोति। अत इति। द्विवचनस्योपपन्नत्वाद्विपर्यासस्य च विभागेन निर्द्धारितत्वादित्यर्थः।
तृतीयं प्रश्नं प्रतिविधत्ते। तदेति। तत्त्वप्रतिबोधाद्विपर्यासक्षयावस्थायामित्यर्थः। कदा तत्त्वप्रतिबोधो विपर्यासक्षयहेतुर्भवतीत्यपे
क्षायामाह। अनादीति। प्रतिबुध्यमानं तत्त्वमेव विशिनष्टि। अजमिति। जीवशब्दवाच्यमर्थं निर्दिशति। योयमिति। परमात्मैव जीवभा
वमापन्नः संसरतीत्यर्थः। तस्य कथं जीवभावापत्तिरित्याशंक्य कारणबद्धत्वादित्याह। स इति। परमात्मनो भयलक्षणेन स्वापेन सुप्तो
जीवो भवतीत्यन्वयः। स्वापस्योभयलक्षणत्वमेव प्रकटयति। तत्त्वेत्यादिना। मायालक्षणेनेत्युभयत्र संबध्यते। सुप्तत्वमेव व्यनक्ति
ममेत्यादिना। स्वापपरिगृहीतस्यैव प्रतिबोधनावकाशो भवतीत्याह। यदेति। यदा सुप्तस्तदा प्रतिबुध्यत इति शेषः। प्रतिबोधकं वि
शिनष्टि। वेदांतार्थ इति। कथं प्रतिबोधनं तदाह। नासीति। अनुभूयमानं तत्त्वमेवमित्युच्यते यदोक्तविशेषणेन गुरुणा प्रतिबुध्यमानः
शिष्यस्तदा स एवं वक्ष्यमाणप्रकारेण प्रतिबुद्धो भवतीत्युक्तं तमेव प्रकारं प्रश्नपूर्वकं द्वितीयार्द्धव्याख्यानेन विशदयति। कथमि
त्यादिना। अस्मिन्निति। सप्तम्या बोध्यात्मरूपं परामृश्यते। बाह्यं कार्यमांतरं कारणं तदुभयमिह नास्ति ततो जन्मादिभावविकारस्य
नात्रावकाशः संभवतीत्यर्थः। अवतारितं विशेषणांतरं सप्रमाणं योजयति। सबाह्येति। अजत्वादेवानिद्रं कार्याभावे कारणस्य प्रमा
णाभावेन वक्तुमशक्यत्वादिति मत्वाह। यस्मादिति। अनिद्रत्वे हेतुं कृत्वा विशेषणांतरं दर्शयति। अत एवेति। अग्रहणमन्यथाग्रहणासं
बंधवैधुर्यं हेतुं कृत्वा विशेषणद्वयमित्याह। यस्माच्चेति। तत्त्वमेवंलक्षणमस्त्वात्मनः किमायातमित्याशंक्याह। तुरीयमिति। तदा विशि
ष्टेनान्वार्थेन विशिष्टं शिष्यं प्रति प्रतिबोधनावस्थायामित्यर्थः। तुरीयमद्वैतमित्युक्ते प्रपंचस्य द्वितीयस्य सत्त्वादित्याशंक्याह। प्रपं
च इति। प्रपंचनिवृत्त्या तुरीयप्रतिबोधात्तदद्वितीयत्वमविरुद्धमिति सिद्धांतिकामाशंकां पूर्ववाद्यनुवदति। प्रपंचेति। तर्हि पूर्वं प्र
पंचनिवृत्तेरनिवृत्तस्य तस्य सत्त्वान्नाद्वैतं सेद्धुमर्हतीति पूर्ववाद्येव ब्रवीत्यनिवृत्त इति। सिद्धांती श्लोकेनोत्तरमाह। उच्यत इ मु॰

ति किं प्रपंचस्य वस्तुत्वमुपेत्याद्वैतानुपपत्तिरुच्यते किं वा ऽवस्तुत्वमिति विकल्प्याद्ये द्वैतानुपपत्तिमंगीकरोति। सत्यमिति। अद्वैतं तर्हि क
थमुपपद्यते त्याशंक्य प्रपंचस्यावस्तुत्वपक्षे तदुपपत्तिरित्याह। रज्ज्वामिति। यथा सर्पो रज्ज्वां कल्पितो वस्तुतो नास्ति तथा प्रपंचोपि क
ल्पितत्वान्नैव वस्तुतो विद्यते तथा च तात्विकमद्वैतमविरुद्धमित्यर्थः। उक्तमर्थं व्यतिरेकमुखेन साधयति। विद्यमानश्चेदिति। पृथगात्मनिका
रणाधीनः सन्प्रपंचो विद्येत तदा कृतकस्यानित्यत्वनियमात्तन्निवृत्तिरवश्यंभाविनी कार्यस्य च निवृत्तिर्नाम स्वकारणे संसर्गस्ततः सति
कारणे प्रपंचनिवृत्तेरनात्यंतिकत्वादद्वैतानुपपत्तिराशंक्येत न च कारणाधीनः सन्प्रपंचोऽस्ति तस्य कल्पितत्वेनावस्तुत्वादित्यर्थः। प्रपंच
स्य मायया विद्यमानत्वं न तु वस्तुत्वमित्युदाहरणाभ्यामुपपादयति। नहीत्यादिना। सर्पो हि रज्ज्वां भ्रान्त्या कल्पितत्वेन नायं सर्पो रज्जुरेवे
ति विवेकधिया निवृत्तो नैव वस्तुतो विद्यते बाधितस्य कालत्रयेपि सत्वाभावात्। माया इंद्रजालशब्दवाच्या मायाविना प्रदर्शिता पा
र्श्वस्थानां मायादर्शनवतां चक्षुर्गतस्य यथार्थदर्शनप्रतिबंधकस्यापगमे सति समुत्पन्नसम्यक्दर्शनेन ततो निवृत्ता सती नैव वस्तुतो वि
द्यमाना भवितुमुत्सहते यथोक्तमिदमुदाहरणद्वयं तथा इदं द्वैतं प्रपंचाख्यं मायामात्रं न परमार्थतोऽस्तीत्यर्थः। प्रपंचस्यासत्वे शून्यवादः
स्यादित्याशंक्याह। रज्जुवदिति। प्रपंचस्य कालत्रयेपि सत्वाभावे तात्विकमद्वैतमविरुद्धमित्युपसंहरति। तस्मादिति। प्रकारांतरेणाद्वै
तानुपपत्तिमाशंक्य परिहरति। विकल्प इति। यदि केनचिद्धेतुना तत्वज्ञानेन कार्येण शास्त्रादिविकल्पो हेतुतया कल्पितस्तथाप्य
सौ बाधितो निवृत्ते तेन तु तात्विकमद्वैतं विरोद्धुमर्हति तत्वज्ञानात्प्रागवस्थायामेव तत्त्वोपदेशं निमित्तीकृत्य यतः शास्त्रादिभेदो। नूप
तेउपदेशप्रयुक्ते तु ज्ञाने निवृत्ते न किंचिदपि द्वैतमस्तीत्यद्वैतमविरुद्धमित्यर्थः। श्लोकव्यावर्त्यामाशंकामाह। नन्विति। तदनिवृत्तौ
नाद्वैतसिद्धिः। न च शास्त्रादिभेदस्य कल्पितत्वादविरोधः। तथा सति धूमाभासवन्न तत्वज्ञानहेतुत्वानुपपत्तेरित्यर्थः। धूमाभासस्याप्य
ग्न्यात्तद्धेतुत्वेपि कल्पितस्य शास्त्रादेस्तत्वज्ञानहेतुत्वं प्रतिबिंबादिवदुपपन्नमित्युत्तरमाह। उच्यत इति। शिष्यः शास्ता शास्त्रमित्य
यं विकल्पो विभागः सोपि निवृत्तिप्रतियोगित्वादवस्तुत्वात् ज्ञानबाध्यत्वादद्वैताविरोधीत्यर्थः। शिष्यादिविभागस्य कल्पित
त्वं सदृष्टांतेन स्पष्टयति। यथेति। मायाविना प्रयुक्ता माया यथा कल्पिता इष्यते। यथा च सर्पधारादिर्विकल्पितः तथा प्रपंचः स
र्वोपि कल्पितो वस्तु न भवतीति प्रपंचितं तथैव प्रपंचैकदेशः शिष्यादिरपि ज्ञानात्प्राक् कल्पितः सन् ज्ञानकृतो मिथ्येत्यर्थः।
किमिति ज्ञानात्पूर्वमसौ कल्प्यते तत्राह। उपदेशेति। उपदेशमुद्दिश्य यथोक्तविभागवचनमित्युक्तमुपसंहरति। अत इ १४
ति। उपदेशात्प्रागिवैतस्मादूर्ध्वमपि भेदोनुवर्ततामित्याशंक्याविरोधिसद्भावान्नैवमित्याह। उपदेशेति। तत्वज्ञानसमर्थानामध्य
मानामुत्तमानां चाधिकारिणामध्यारोपापवादाभ्यां पारमार्थिकं तत्वमुपदिष्टमिदानीं तत्वग्रहणासमर्थानां अधमाधिकारि
णामाध्यानविधानाय आरोपदृष्टिमेवावष्टभ्य व्याचष्टे। अभिधेयेत्यादिना। अध्यक्षरमित्येतद्व्याकरोति। अक्षरमिति। अध्यक्ष

रमित्यत्र किंपुनस्तदक्षरमिति प्रश्नपूर्वकं व्युत्पादयति। किंपुनरित्यादिना। तस्य विशेषणांतरं दर्शयति। सोऽयमिति। अत्रात्मा हि पा
दशो विभज्यते मात्राश्च मधिकृत्य पुनरोंकारो व्यवतिष्ठते तत्कथं पादशो विभज्यमानस्याधिमात्रत्वमिति पृच्छति। कथमिति। पादाना
मात्राणां चैकत्वादेतदविरुद्धमित्याह। आत्मन इति। पादानां मात्राणां मध्ये विश्वो [illegible] स्य विशेषस्याकारस्य विशेषत्वेनाम
यति। तत्रेति। विश्वाकारयोरेकत्वे सादृश्यं संपादयितुं शक्यमन्यत्र सत्येव तस्मिन्नारोपसंदर्शनात्तथा च कृतदारोपप्रयोजकं सा
दृश्यमिति पृच्छति। केनेति। सामान्योपन्यासपरां श्रुतिमवतारयति। आप्तेरिति। व्याप्तिमेवाकारस्य श्रुत्युपन्यासेन व्यनक्त्यऽकारेणेति।
अध्यात्माधिदैवयोरेकत्वपूर्वमुक्तमुपेत्य विश्वस्य वैश्वानरस्य जगद्व्याप्तिं श्रुत्यवष्टंभेन स्पष्टयति। तथेति। किंच सामान्यद्वारा वा
च्यवाचकयोरेकत्वमारोप्यते न भवति तयोरेकत्वस्य प्रागेवोक्तत्वादित्याह। अभिधानेति। सामान्यांतरमाह। आदिरिति। तदेव स्फुट
धैवे यति। य[illegible]ति। उकारम कारश्चोभयमपेक्ष्य प्रथमपाठादादिमत्वमकारस्य द्रष्टव्यं विश्वस्य पुनरादिमत्वं तैजसप्राज्ञावपेक्ष्याद्यवस्था २
ने वर्तमानत्वादित्यर्थः। उक्तस्य सामान्यांतरस्य फलं दर्शयति। तस्मादिति। किमर्थं सिद्धं सामान्यद्वारा तयोरेकत्वमुच्यते नहि ज्ञान
स्य फलवत्वादित्याह। तदेकत्वेति। सादृश्यविकल्पादेव फले विकल्पः। द्वितीयपादस्य द्वितीयमात्रायाश्चैकत्वमुपदिशति। स्वप्नेत्यादि
ना यथा प्रथमपादस्य प्रथममात्रायाश्चैकत्वं सामान्यं पुरस्कृत्योक्तं तथा द्वितीयस्य पादस्य द्वितीयमात्रायाश्चैकत्वे सत्येव सामान्यं वक्त
व्यं तदभावे तदारोपायोगादिति पृच्छति। केनेति। सामान्योपन्यासपूर्वकमेकत्वारोपं साधयति। आहेति। अकारस्य सर्ववाग्व्याप
कत्वेनोत्कृष्टत्वस्य स्पष्टत्वात्कथं तस्मादुकारस्योत्कर्षो वर्ण्यते तत्राह। अकारादिति। अकारस्योत्कर्षो बाह्यत्वेपि पाठक्रमादुकारस्य
कारादु उत्कर्षत्वमौपचारिकं इवकारश्चामुमर्थमुपोद्बलयति यथाऽकारस्योत्कर्षो दर्शितस्तथा विश्वात्तैजसस्योत्कर्षो वक्तव्यः सूक्ष्मा
भिमानिनः स्थूलाभिमानिनः सकाशादुत्कर्षस्य युक्तत्वादित्याह। तथेति। उकारतैजसयोर्न प्रत्येकमुभयत्वमेकस्योभयत्वव्याघाता
दित्याशंक्याव्याकरोति। उकारेति। मध्यत्वादुकारतैजसयोरुभयभाक्त्वं सामान्यं तस्मात्तयोरेकत्वं शक्यमारोपयितुमित्याह। अ
तइति। यथोक्तैकत्वविज्ञानं फलवत्वादुपादेयमिति सूचयति। विद्वानिति। ज्ञानसंततेरुत्कर्षो नाम कृत्स्नस्याभेदाविद्वत्वं तस्येष्ट
त्वाभावे कथं फलवत्वमित्याशंक्याव्याचष्टे। विद्वानेति। पक्षद्वयतुल्यत्वमेव प्रकटयति। अत्र द्वेष्य इति। सादृश्यभेदेन फलभेदमावे
दयद्विविधसादृश्यप्रयुक्तैकत्वज्ञानफलमाह। अब्रह्मविदिति। तृतीयपादस्य तृतीयमात्रायाश्चैकत्वमुपन्यस्यति। सुषुप्तेति। पूर्व
वदेकत्वप्रयोजकमत्रापि प्रश्नपूर्वकमुपवर्णयति। केनेत्यादिना। मानमेव विवृणोति। मीयेत इति। ओमित्योंकारस्य नैरंतर्येणोच्चा
रणे सत्यकारोकारौ प्रथमं मकारे प्रविश्य पुनस्तस्मान्निर्गच्छंताविवोपलभ्येते तेन मकारेऽपि मानसामान्यमिति मकेमित्यर्थः।
एकीभावमेव स्फोरयति। ओंकारेति। मकारवत्प्राज्ञेऽपि तदस्ति सामान्यमित्याह। तथेति। उक्तस्य सामान्यस्य फलमाह। अतोवेति।

मां०भा०
आ०
६१

सामान्यद्वारेणाज्ञमकारयोरेकत्वज्ञानंविवक्षितंफलवत्त्वादित्याह।विद्वदिति।अविदुषोपिजगद्विषयज्ञानमस्तीत्याशंक्यविशिन
ष्टि।जगद्याथात्म्यमिति।तद्याथात्म्यंचाव्याकृततत्त्वंप्रलयभवुनमनिष्टत्वान्नफलमित्याशंक्याह।जगदिति।तत्रतत्रैकत्वज्ञानेफ
लकथनाद्रुपासनाभेदमाशंक्यांगेषुफलश्रुतेरर्थवादत्वमुपेत्याह।अत्रेति।पादानांमात्राणांचक्रमादेकत्वविज्ञानेफलकथनंस
र्वान्पादान्मात्राश्चसर्वाःस्वात्मन्यंतर्भाव्यप्रधानस्यप्रध्यानस्यसाधनंयदोंकाराख्यमक्षरंतस्यस्तुतावुपयुज्यतेतेनचतदेवै
कमुपासनमितरस्यतदंगत्वान्नोपास्तिभेदकत्वमित्यर्थः।पादानांमात्राणांचयदेकत्वंसानिमित्तंश्रुत्योपन्यस्तंतत्रश्रुत्यर्थ
विवरणरूपानपूर्ववदेवश्लोकानवतारयति।अत्रेति।प्रथमपादस्यप्रथममात्रायाश्चाभेदारोपार्थमुक्तंसामान्यद्वयंवि
शदयति।विश्वस्येति।उक्तन्यायेनादिरस्येत्यादावितिशेषः।पुनरुक्तिपरिहारोविवक्षितमर्थमाह।अत्वेति।अनुवृत्तिंद्योत १९।
कंदर्शयति।वशाद्यादिति।द्वितीयपादस्यद्वितीयमात्रायाश्चैकत्वारोपप्रयोजकद्वयंश्रुत्युक्तमनक्ति।तैजसस्येति।स्फुट
मितिक्रियाविशेषणंतथाविधमित्यस्यार्थःस्फुटमित्याह।स्फुटमेवेति।उत्त्वविज्ञानेतुल्यस्यव्याख्यानंमात्रासंप्रतिपत्ता
वितितस्यव्याख्यानंसर्वमित्युच्यतेपूर्ववद्दृष्टव्यमित्युच्यतेपूर्ववदिति।तृतीयपादस्यतृतीयमात्रायाश्चैकत्वाध्यासेसा
मान्यद्वयंश्रुत्यादर्शितंविशदयति।मकारेति।अक्षरार्थस्यपूर्ववदेवसुज्ञानत्वात्तात्पर्यार्थमाह।मकारत्वइति।विश्वादीनाम
कारादीनांसामान्यमुक्तंतद्विज्ञानंस्तौति।त्रिष्विति।यथोक्तस्थानत्रयेजागरितेस्वप्नेसुषुप्तेचेतित्रितयेतुल्यंपादानांमात्रा
× चयत्तुल्यं × णांचेतिविशेषः।उक्तसामान्यमाप्तिरुत्कर्षोमितिरित्यादिमहामुनिरित्यस्यार्थमाह।व[illegible]विदिति।पूर्वोक्तसा
मान्यज्ञानवतोध्याननिष्ठस्यफलविभागंदर्शयति।अकारइति।यत्रतुपादानांमात्राणांचविभागोनास्तितस्मिन्नोंकारे
तुरीयात्मनिव्यवस्थितस्यप्राप्तव्यप्राप्तव्यप्राप्तिविभागोनास्तीत्याह।नामात्रइति।ओंकारध्यायिनमकारोविश्वंप्रापयतीत्यु
क्तमयुक्तंविश्वप्राप्तेर्ध्यानमंतरेणासिद्धत्वादकारस्यचध्येयस्योक्तफलप्रापकत्वायोगादित्याशंक्याह।अकारेणेति।तदा
लंबनंतत्प्रधानमितियावत्।अकारप्रधानमोंकारंध्यायतोयथावैश्वानरप्राप्तिस्तथोकारप्रधानंतमेवध्यायतस्तैजसस्याप्ति
रूपयागर्भप्राप्तिर्भवतीत्याह।तथेति।यश्चमकारप्रधानमोंकारंध्यायतितस्यप्राज्ञाव्याकृतप्राप्तिर्युक्तेत्याह।मकारश्चे १५
ति।क्रियापदानुवृत्तिरुभयत्रविवक्षिता।चतुर्थपादंव्याचष्टे।क्षीणेति।स्थूलप्रपंचोजागरितेविश्वश्चेत्युक्तेत्रितयमकारमा
त्रं।सूक्ष्मप्रपंचःस्वप्नस्तैजसश्चेत्युक्तेत्रितयमुकारमात्रं।प्रपंचद्वयकारणंसुषुप्तंप्राज्ञश्चेत्युक्तेत्रितयंमकारमात्रंतत्रा
पिपूर्वपूर्वमुत्तरोत्तरभावमापाद्यतेनैतदेवसर्वमोंकारमात्रमितिध्यात्वावस्थितस्ययदेतावंतंकालमोमितिरूपेणप्रतिपन्नं
तस्याहमद्वयंब्रह्मैवेत्याचार्योपदेशसमुत्थसम्यक्ज्ञानेनपूर्वोक्तसर्वविभागनिमित्ताज्ञानस्यमकारत्वेनगृहीतस्यक्षये

ब्रह्मण्येवाद्वैतेपर्यवसितस्यनकिंचिद्वैतरूपंगम्यतेपरिच्छेदाभावादित्यर्थः।प्रत्यगात्मैवतन्मयमोंकारसंवेदनंत्रिमात्रेणोंकारेणाध्यस्ते
नतोदाहृतत्वादोंकारोनिरुच्यतेतस्यपरेणब्रह्मणैक्यममात्रादिश्रुत्याविवक्ष्यतेतामवतार्यव्याकरोति।अमात्रइत्यादिनाकेवल
त्वमद्वितीयत्वंविशेषणांतरमुपपादयति।अभिधानेति।अभिधानंवागभिधेयंमनस्त्रितातिरिक्तार्थाभावस्याभिधास्यमानत्वा
त्तयोर्मूलाज्ञानक्षयेणक्षीणत्वादितिहेत्वर्थः।अव्यवहार्यश्चेदात्मानास्त्येवेत्याशंक्यविकारजातविनाशावधित्वेनात्मनोविशेषा
न्नैवमित्याह।प्रपंचेति।तस्यैवसर्वानर्थाभावोपलक्षितस्यपरमानंदत्वेनपर्यवसानंसूचयति।शिवइति।तस्यैवसर्वद्वैतकल्पना
धिष्ठानत्वेनावस्थानमभिप्रेत्याह।अद्वैतइति।ओंकारस्तुरीयःसन्नात्मैवेतियदुक्तंतदुपसंहरति।एवमिति।यथोक्तविज्ञानं
पादानांमात्राणांचैकत्वेनचपादामात्राश्चतुरीयात्मन्योंकारेसंतिपूर्वपूर्वविभागश्चोत्तरोत्तरांतर्भावेनक्रमादात्मनिपर्यवस्यतीत्ये
वंलक्षणंतद्वत्ताप्रयुक्तःसन्नोंकारोमात्राःपादाश्चतस्मिन्नंतर्भाव्यावस्थितस्यात्मनोभेदमसहमानस्तद्रूपोभवतीत्यर्थः।उक्तैक्य
ज्ञानस्यफलमाह।संविशतीति।सुषुप्तेब्रह्मप्राप्तस्यपुनरुत्थानवन्मुक्तस्यापिपुनर्जन्मस्यादित्याशंक्याह।परमार्थेति।सुषुप्तस्यपु
नु नरुत्थानबीजभूताज्ञानस्यसत्त्वादुपपद्यतेइहबीजभूतमज्ञानंतृतीयंसुषुप्ताख्यंदग्धमेवतेषामात्मानंतुरीयंप्रविष्टोविद्वान्नासौ
पुनरुत्थानमर्हतिकारणमंतरेणातद्योगादित्यर्थः।तुरीयमेवपुनरुत्थानबीजभूतंभविष्यतीत्याशंक्यकार्यकारणविनिर्मुक्तस्य
तस्यतदयोगान्नैवमित्याह।तुरीयस्येति।मुक्तस्यापिपूर्वसंस्कारात्पुनरुत्थानमाशंक्यदृष्टांतेननिराचष्टे।नहीति।पूर्ववदित्य
विवेकावस्थायामिवेत्यर्थः।तद्विवेकिनांरज्जुसर्पविवेकविज्ञानवतामितियावत्।बुद्धिसंस्कारादित्यत्रबुद्धिरज्ज्वेनसर्पेत्यातिग
द्यते।उत्तमाधिकारिणामोंकारद्वारेणपरिशुद्धब्रह्मैक्यविदामपुनरावृत्तिलक्षणंफलमुक्तमिदानींमंदानांमध्यमानांकथंब्र
ह्मप्रतिपत्त्याफलप्राप्तिरित्याशंक्याह।मंदेति।तेषामपिक्रममुक्तिरविरुद्धेत्यर्थः।तत्रैववाक्यशेषानुकूल्यंकथयति।तथाचेति।
यथापूर्वमाचार्येणश्रुत्यर्थप्रकाशकाःश्लोकाःप्रणीतास्तथात्रापिश्लोकाःश्रुत्युक्तेऽर्थेएवसंभवंतीत्याह।पूर्ववदिति।ओंकारस्यपा
दशोविद्याकीदृशीत्याशंक्याह।पादाइति।पादानांमात्राणांचान्योन्यमेकत्वंकृत्वातद्विभागविधुरमोंकारंब्रह्मबुध्वाध्यायतोनभ
वतिकृतार्थतेतिदर्शयति।ओंकारमिति।तस्मात्पादानांमात्राणामन्योन्यमेकत्वादित्यर्थः।तदेकत्वंपुरस्कृत्योंकारमुपेत्यविभागशू
न्यंब्रह्मबुध्वाजानीयादित्याह।ओंकारमिति।उत्तरार्द्धस्यतात्पर्यमाह।एवमिति।प्रणवानुसंधानकुशलस्यप्रणवज्ञानेनैवसर्वद्वै
तापवादकेनकृतार्थताभवतीत्युक्तमिदानींतदभिज्ञस्यपरोपदेशमात्रेऽशरणस्यध्यानकर्तव्यतांकथयति।युंजीतेति।ननुमनःसमा
धानंब्रह्मणिकर्तव्यंकिमितिप्रणवेकर्तव्यतोच्यतेतत्राह।प्रणवइति।संप्रतिप्रणवेसमाहितचित्तस्यफलंदर्शयति।प्रणवेनित्ये

ति। समाधानविषयमाह। यथेति। तुरीयं रूपं यथोच्यते तत्र हेतुमाह। यस्मादिति। तदेव साधयति। न हीति। तत्र तैत्तिरीयकश्रुत्यनुकूल्यमा
ह। विद्वानिति। कीदृशस्तर्हि प्रणवो मंदानां मध्यमानां चाधिकारिणां ध्येयो भवतीत्याशंक्याह। प्रणवो हीति। उत्तमाधिकारिणां कीदृशस्तर्हि
प्रणवः सम्यग्ज्ञानगोचरो भवति तत्राह। अपूर्व इति। परापरब्रह्मात्मना प्रणवो मंदमध्यमाधिकारिणोर्ध्येयतामुपगच्छतीति पूर्वार्द्धं व्याच
ष्टे। परेति। उत्तमाधिकारिणस्तु सर्वविशेषशून्यमेकरसं प्रत्यक्भूतं यद्ब्रह्म तद्रूपेण प्रणवः सम्यक्ज्ञानाधिगम्यो भवतीत्युत्तरार्धं व्याच
२५ क्षते। परमार्थत इत्यादिना। उक्तेऽर्थे प्रमाणं सूचयति। वाचेति। यदोंकारस्य प्रत्यगात्मत्वमापन्नस्य तुरीयस्यापूर्वत्वमनंतरत्वमित्यादिवि
शेषणमुक्तं तत्र हेतुमाह। सर्वस्येति। यथोक्तविशेषणं प्रणवं प्रत्यंचं प्रतिपद्य कृतकृत्यो भवतीत्याह। एवं हीति। पूर्वार्द्धं व्याकरोति। आदीति।
सर्वस्यैवोत्पद्यमानस्योत्पत्तिस्थितिलयाः यथोक्तप्रणवाधीना भवंतीत्यनंतरस्योक्तं विशेषणं युक्तमित्यर्थः। परिणामवादं व्यावर्त्य विवर्तवा
दं द्योतयितुमुदाहरति। मायेति। यथा मायावी स्वगतविकारमंतरेण मायाया हस्त्यादेरिंद्रजालस्य स्वमायावशादेव हेतुर्यथा च रज्ज्वादयः स्वगतवि
× अनेकोदाहरणमुपपद्यमानस्यानेकविधत्वबोधनार्थं। प्रणवस्य प्रत्यगात्मत्वं प्राप्तस्याविकृतस्यैव स्वमायाशक्तिवशाज्जगद्धेतुत्वमित्यत्र दृष्टांतमाह। यथेति ×
कारविरहिताः स्वाज्ञानादेव सर्पादिहेतवस्तथायमात्मा प्रणवभूतो व्यवहारदशायां स्वाविद्यया सर्वस्य हेतुर्भवति। अतो युक्तं तस्य पारमार्थि
कस्वरूपापि पूर्वोक्तविशेषणत्वमित्यर्थः। द्वितीयार्द्धं विभजते। एवमिति। पूर्वोक्तविशेषणसंपन्नमिति यावत्। ज्ञानस्य मुक्तिहेतोः सहायांतरापेक्षा
नास्तीति सूचयति। तल्लक्षणादेवेति। तदात्मभावमित्यत्र तच्छब्देनापूर्वादिविशेषणं परमार्थवस्तु परामृश्यते। ब्रह्मबुध्याऽप्रणवमभिध्याय
तो हृदयाख्यं देशमुपदिशति। प्रणवमिति। परमार्थदर्शिनस्तु देशाद्यनवच्छिन्नवस्तुदर्शिनो दार्ष्टिकं शोकाभावं तत्र को मोहः कः शोक
इत्यादिश्रुतिसिद्धमनुवदति। सर्वव्यापिनमिति। हृदयप्रदेशे प्रणवभूतस्य ब्रह्मणो ध्येयत्वे हेतुं सूचयति। स्मृतिप्रत्ययेति। बुद्धिमानि
ति विवेकित्वमुच्यते। मत्वेति। साक्षात्कारं संपाद्येति। विवक्षिते विवेकद्वारा तत्त्वसाक्षात्कारे सति शोकनिवृत्तौ हेतुमाह। धीरेति। तस्य
हि निमित्तमात्मज्ञानं तस्यात्मसाक्षात्कारतो निवृत्तौ शोकानुपपत्तिरित्यत्र प्रमाणमाह। तरतीति। आदिशब्देन भिद्यते हृदयग्रंथिरित्या
दिश्रुतिर्गृह्यते। ओंकारं तुरीयभावमापन्नं यः प्रतिपन्नस्तं स्तौति। अमात्र इति। यथोक्तप्रणवप्रतिपत्तिहीनस्तु जननमरणामा
त्रभागी न पुरुषार्थभाक् भवतीति विद्याविरहितं निंदति। नेतर इति। पादविभागस्य मात्राविभागस्य वाऽभावादोंकारस्तुरीयः सन्नमा १६
त्रो भवतीत्याह। अमात्र इति। ननु कथमनंततापरिच्छिन्नत्वमोंकारस्योच्यते नहि तत्र परिच्छित्तिरेवास्तीत्याशंक्याह। अनंतावत्त्वमिति। अन
र्थात्मकद्वैतसंस्पर्शाभावादप्रतिबंधेन परमानंदत्वं तस्मिन्नाविर्भवतीत्यभिप्रेत्याह। सर्वेति। यथाव्याख्यातः पूर्वार्द्धे नोक्तवि
शेषणवानित्यर्थः। ननु यथोक्तप्रणवपरिज्ञानरहितस्यापि शास्त्रपरिज्ञानवत्त्वान्न जन्मोपलक्षितसंसारभाक्त्वं न पुरुषार्थासि

ड्रिः मैवं शास्त्रविदोषितत्वज्ञानाभावे मुख्यपुरुषार्थासिद्धिरित्यभिप्रेत्याह। नेतरदिति। तदेवं प्रपञ्चव्यवहारे पि निरुपाधिकमात्मा
नमनुसंदधानस्य पुरुषार्थपरिसमाप्तिर्नेतरेषां बहिर्मुखाणामिति सिद्धं॥ ॥इति श्रीपरमहंसपरिव्राजकाचार्यश्रीशुद्धानंदपूज्यपा
दशिष्यभगवदानंदज्ञानविरचितायां गौडपादभाष्यटीकायां प्रथमप्रकरणं समाप्तं॥ ॥आगमप्राधान्येनाद्वैतं प्रतिपादयता तत्प्रत्य
नीकस्य द्वैतस्य मिथ्यात्वमर्थादुक्तमिदानीं तन्मिथ्यात्वमुपपत्तिप्राधान्येनापि प्रतिपत्तुं सुशकमिति दर्शयितुं प्रकरणांतरमवतारयन्ना
दौ दृष्टांतसिद्ध्यर्थं तस्मिन्विद्वत्संमतिमाह। वैतथ्यमिति। न केवलमागमोक्तिवशादेव स्वप्नमिथ्यात्वं किं तु युक्तितो पीत्याह। अंतःस्थानादि
ति। पूर्वोत्तरप्रकरणयोः संबंधसिध्यर्थं पूर्वप्रकरणे वृत्तं संक्षिप्यानुद्रवति। ज्ञात इति। आदिशब्देन यत्र हि द्वैतमिव भवतीत्याद्याः श्रुतयो गृह्य
ते। तर्हि द्वैतमिथ्यात्वस्यागमेनैव सिद्धत्वादुत्तरं प्रकरणमनर्थकमित्याशंक्याह। आगमेति। यद्द्वैतमिथ्यात्वं पूर्वमुक्तं तदागममात्रमागमप्र
प्राधान्येनाधिगतं न युक्तितः सिद्धं तस्मिन्नागमतो वगते युक्तिप्राधान्येनापि तन्मिथ्यात्वमवगम्यमिति प्रकरणांतरं प्रारब्धमित्यर्थः।
प्रमाणानुग्राहकत्वात्तर्कस्यानुग्राह्यप्रमाणस्य प्रधानत्वात्तदधीनविचारानंतरं तर्काधीनविचारस्यावकाशत्वाद्युक्तं पूर्वापर्यं पूर्वोत्त
रप्रकरणयोरित्युक्तं संप्रति श्लोकाक्षराणि योजयति। वैतथ्यमित्यादिना। बाह्यघटादयः सुखादयश्चाध्यात्मिका भावाः शरीरांतर्वर्त्ति
नः स्वप्नानां भावानामित्यत्रानुभवं प्रमाणयति। तत्र हीति। तेषामंतरुपलभ्यमानत्वेपि नैव तथात्वं अभिचारादित्याशंकामनूद्य परिहरति। न
न्वित्यादिना हेत्वंतरशंकां वारयति। अंतरिति। यद्यपि देहांतः संकुचिते देशे स्वाप्नाभावास्तथापि कथं तेषां मृषात्वमित्यत आह। नही
ति। श्लोकांतरमित्युक्तं स्फुटयति। संवृतत्वादिति। तमेव संकुचितं देशं विशेषणांतरं स्फोरयति। देहांतर्नाडीष्विति। उक्तमर्थं कैमुतिकन्यायेन
स्फुटयति। नहीति। यदा देहेपि पर्वतादयो न संभाव्यंते तदा तदंतर्वर्तिनीषु नाडीष्वतिसूक्ष्मासु तेषां संभावना नास्तीति किमु वक्तव्यमित्य
र्थः। स्वाप्नाभावाः सत्या न भवंति उचितदेशशून्यत्वाद्रज्जुभुजंगादिवदिति भावः। देहाद्बहिरेव देशांतरं गत्वा स्वाप्नानां भावानामुपलं
भात्तेषां देहांतःसंवृतत्वेन नाडीप्रदेशे दर्शनमसंप्रतिपन्नमित्याशंक्य परिहरति। अदीर्घत्वादिति। बहिःस्वप्नोपलब्धिपक्षे दोषांतरमाह। प्र
तिबुध्यते इति। व्यावर्त्यामाशंकामनुवदति। स्वप्नेति। तेषां देहांतःसंकुचिते नाडीदेशे स्थितिसंदर्शनान्मिथ्यात्वमित्येतदपि न संप्रति
पन्नमित्यत्र हेतुमाह। यस्मादिति। पर्यटन्निवेति स्वप्नदर्शनस्य निरूपणे सत्याभासत्वमिवशब्देन द्योत्यते। एतच्छब्देन वाच्यं परामृश्यते
स्वप्नदृष्टं गत्वा स्वप्नमन्यं पश्यतीत्यत्र हेतुमाह। यस्मादिति। इवशब्दस्तु पूर्ववत्। तथापि कथं बहिः स्वप्नोपलंभो न भवतीति निर्धारित
मित्याशंक्याह। न चेति। स्वप्नो सत्यो न भवति उचितकालविकलत्वात् संप्रतिपन्नवदित्यभिप्रेत्य फलितमाह। अत इति। इतश्च न दे
हाद्बहिर्देशांतरे स्वप्नदर्शनमित्याह। किं चेति। सर्वोपि विप्रकृष्टदेशांतरे स्वप्नानुपश्यन्न कस्मादेव प्रतिबुध्यते न तत्रास्ति किं तु शयनदे
शे वर्तते। तथापि गत्वा स्वप्नदर्शने कानुपपत्तिरित्याशंक्याह। यदि चेति। अंतरेव स्वप्नदर्शनमिति स्थिते स्वप्नमिथ्यात्वमुचितका
लशून्यत्वादित्युक्तं प्रपंचयति। रात्राविति। यद्यपि रात्रौ निद्रामुपगतस्तथापि भावानहनि पश्यन्निव निष्पतति सुप्तः संहतश्च भूर

दिक्रयाणोऽपि पश्यति शयानोऽपि पर्यटनं प्रतिपद्यते यद्यपि सहायविहीनः सुप्तस्तथापि बंधुभिः सहायैः सहितः स्वप्ने नुपलभ्यते त
स्मादुचितस्य कालस्य कारणस्य सहकारिणश्चाभावेऽपि स्वप्नदर्शनात्तन्मिथ्यात्वं सिद्धमित्यर्थः। स्वप्नमिथ्यात्वे हेत्वंतरमाह। येऽपि
ति। स्वदेहदर्शिभिरगृह्यमाणत्वं स्वप्नदृष्टस्य संप्रतिपन्नमित्याशंक्याह। गृहीतश्चेति। पुरुषांतरसंवादादर्शनाद् देशांतरप्राप्तिहीनस्य स्वप्न
दर्शनमिति वक्तुमशक्यत्वादंतरेव स्वप्नदर्शनमित्युचितदेशकालाद्यभावान्मिथ्यात्वं सिद्धमित्युपसंहरति। तस्मादिति। स्वप्नदृ
श्यानां भावानां मिथ्यात्वे हेत्वंतरमाह। अभावाश्चेति। न तत्र रथा न रथयोगा न पंथानो भवंतीत्यादि श्रुत्या स्वप्ने स्वयंज्योतिष्ट्वमात्म
नो दर्शयंत्यां तत्र दृश्यानां रथादीनामभावो योग्यदेशाद्यभावद्योतकन्यायपुरःसरं श्रूयते अतस्तेन न्यायेन प्राप्तमेव स्वप्नदृश्य
भावानाम सत्त्वमिथ्यात्वमन्यपरयापि श्रुत्यानुप्रकाशितमिति ब्रह्मविदो वदंति तथा च स्वप्नभावानां मिथ्यात्वं श्रुतियुक्तिभ्यां सिद्धमित्य
र्थः। हेत्वंतरपरत्वं श्लोकस्य दर्शयति। इतश्चेति। इतः शब्दार्थमेव स्पष्टयति। यत इति। देयाभावे ज्ञानाभावाद्दर्शनात् ज्ञानस्यापि श्रुतमसत्
त्वमिति वक्तुं च शब्दः श्रूयते न तत्र स्याद्यांश्रुतावितिसंबंधः। न्यायपूर्वकमिति व्याचष्टे। युक्तित इति। योग्यदेशाद्यभावो युक्तिः। तर्हि
न्यायसिद्धेऽर्थे किमन्यपरया श्रुत्या क्रियते तत्राह। तेनेति। अंतः शरीरमध्ये स्थानं नाडीलक्षणं तत्रातिसूक्ष्मे संवृतत्वेन संकुचितत्वे
नावस्थानं पर्वतादीनामुपलभ्यते ततश्चोचितदेशाभावो योग्यकालाभावश्चेत्यादिना प्रागुक्तेन हेतुना प्राप्तं स्वप्नदृश्यानां भावानां वैत
थ्यं तदेव तदनुवादिन्या श्रुत्या प्रकाशितमिति ब्रह्मविदः। जाग्रदवस्थायामादित्यादिप्रकाशानां वागादिज्योतिषां च विद्यमानत्वादा
त्मनादिव्यवहारस्य तन्निमित्तत्वसंवादात्मचैतन्यनिबंधनो व्यवहारो न निर्धारयितुं शक्यते स्वप्ने पुनः सूर्याद्यभावेऽपि व्यवहारदर्शना
त्तस्य च निमित्तापेक्षत्वादात्मचैतन्यस्य निमित्तत्वनिर्णयात्तत्रात्मनः स्वयंज्योतिष्ट्वं प्रतिपादयितुं न तत्र रथा इत्याद्या श्रुतिस्तया तत्र स्था
न्यायसिद्धं स्वप्नमिथ्यात्वमनुवदत्यातदप्रतिपादितमपि प्रकाशितं मिथ्यात्वं तथा च श्रुतियुक्तिभ्यां प्रतिपन्नं स्वप्नमिथ्यात्वमिति दृष्टां
तसिद्धिरित्यर्थः। उक्तन्यायेन दृष्टांते सिद्धे फलितमनुमानमाह। अंतःस्थानादिति। भेदानामित्यत्र सूचितमनुमानमारचयति। जा
ग्रदिति। तृतीयेन पादेन पक्षधर्मत्वं व्याप्तस्य हेतोरुच्यते तद्दर्शयति। यथेति। द्वितीयपादेन प्रतिकूलप्रमाणाभावसूचकं प्रतिज्ञो
पसंहाररूपवचनं निगमनं सूचितमित्याह। तस्मादिति। सर्वं द्वैतं वैतथ्यवादिनां केन विशेषेण पक्षसपक्षविभागसिद्धिरित्याशंक्यांत
स्थानात्तु संवृतत्वेनेत्यत्र विवक्षितमर्थमाह। अंतःस्थानादिति। स्वप्नदृश्यानामंतःस्थानं संवृतत्वं च न तथा जाग्रद्दृश्यानां ते
नोचितदेशाद्यभावात्तेषां तेभ्यो वैषम्यं स्फुटं सिद्धं हि योग्यदेशाद्यभावेन स्वप्नस्य मिथ्यात्वमिति सपक्षत्वं जागरितस्य पुनरुचित १७
देशादिसद्भावादस्फुटं मिथ्यात्वमिति पक्षत्वमित्यर्थः। सा हि सर्वथा वैषम्याद्दृष्टांतदार्ष्टांतिकभावासिद्धिरित्याशंक्याह। यथा तत्र ३२
मिति। स्वप्नजागरितस्य मिथ्यात्वे स्वप्न निद्रायुतत्वादि दोषो जागरिते स्वप्नशब्दप्रयोगो युक्तो भवतीत्याह। स्वप्नेति। भयत्रेऽपि कृत्वं
विद्वद्भिर्मतमित्यत्र हेतुमाह। भेदानामिति। भेदा मिथ्या नाभावास्तेषामवस्थाद्वयवर्तिनां ग्राह्यत्वं ग्राहकत्वमविशिष्टं तेन

दृश्यत्वेन हेतुना प्रसिद्धमेव तेषां मिथ्यात्वेन समत्वं तेन स्थानयोरेकरूपत्वं विवेकिनामभिप्रेतमिति यत्पूर्वमनुमानाख्यं प्रमाणं सिद्धं
तस्यैव फलं साधनद्वयाविशेषरूपमनेन श्लोकेनोक्तमिति श्लोकयोजनया दर्शयति प्रसिद्धेनैवेति। जाग्रद्दृश्यानां भावानां मिथ्यात्वमि
त्यत्रानुमानान्तरमाह। आदाविति। यदि जाग्रद्दृश्या भावा मिथ्यात्वेन प्रसिद्धस्वप्नादिभिः समत्वान्मिथ्याकल्पितास्तर्हि तेषां घटः सन्पटः सन्
इत्यमृषात्वेन प्रतीतिः स्यादित्याशंक्याह। वितथैरिति। प्रकृते जाग्रन्मिथ्यात्वे हेत्वन्तरपरत्वं श्लोकस्योपन्यस्यति। इतश्चेति। विमतं मिथ्या आ
दिमत्त्वादन्तवत्त्वाच्च स्वप्नादिवदित्यर्थः। उक्तानुमाने दृष्टान्ते व्याप्तिं कथयति। यदादाविति। यदादिमदन्तवच्च तन्मिथ्या यथा मृगतृष्णिकादी
त्यर्थः। व्याप्तिमतः साधनस्य पक्षधर्मतोपन्यासेन प्रतिज्ञोपसंहारवचनं निगमनं दर्शयति। तथेति। अनुमानस्य घटादिषु सत्त्वग्राहकप्र
त्यक्षविरोधमाशंक्य सद्गन्धर्वनगरमितिवत्तस्यापातिकसत्त्वविषयत्वान्मैवमित्याह। तथापीति। स्वप्नस्य मिथ्यात्वमाद्यन्तवत्त्वान्न भव
ति किंतु फलपर्यन्तत्वाभावाज्जागरितस्य फलपर्यन्तत्वान्न मिथ्यात्वमित्याशंक्याह। सप्रयोजनतेति। फलपर्यन्तताराहित्योपाधेः साध
नव्यापकत्वे फलितमाह। तस्मादिति। जाग्रद्दृश्या भावाः बहुत्यागं हि ते श्लोकस्य व्यावर्त्यामुपाधेः शंकामुत्थापयति। स्वप्नेति। जाग्र
द्दृश्यानामिव स्वप्नदृश्यानामपि तुल्यं सप्रयोजनत्वमित्युपाधेरसंभवमाशंक्याह। नन्विति। अनुमानस्य सोपाधिकत्वेनासाधकत्वे फ
लितमाह। तस्मादिति। हेतोः सोपाधिकत्वं दूषयति तन्नेति। साधनव्याप्त्यादिदोषादिति तेनोपाधिनिरसनं सुशकमित्याह। कस्मादिति।
फलपर्यन्तताविरहित्वोपाधेः साधनव्याप्तिमाह। यस्मादित्यादिना। तामेव विप्रतिपत्तिलिंगकं दर्शयति। जाग्रद्वितथेहीति। उक्तमर्थं दृष्टान्तेन स्प
ष्टयति। यथेत्यादिना। उपाधेः साधनव्याप्तिं निगमयति। तस्मादिति। हेतोः सोपाधिकत्वाभावे फलितमाह। अन्तइति। हेतुद्वयमुपसंहरति।
तस्मादिति। दृष्टान्तस्य साध्यविकलत्वशंकां किल परिहरति। अपूर्वमिति। यथा स्वर्गनिवासिनः शीलादीनामिन्द्रादीनां सहस्राक्षत्वादिधर्मस्त
था यदिदमपूर्वं स्वप्नदर्शनं मन्यसे तदपि स्थानिनः स्वप्नस्थानवतो द्रष्टुरेव धर्मस्तेन दृष्टत्वात्तस्य मिथ्यात्वसिद्धिरित्यर्थः। कथं तेनैव दृष्ट
त्वं तत्राह। तानयमिति। यथैवेह व्यवहारभूमौ सुशिक्षितो देशान्तरप्राप्तिमार्गं ज्ञात्वा तेन मार्गेण देशान्तरं गत्वा तत्रत्यान्पदार्थान्वीक्षते तथा
यं स्वप्नद्रष्टा स्वप्नगतान्पदार्थान्पश्यतीत्यपूर्वपदार्थानुप्रतिपद्यते तत्र स्वप्नस्थानिधर्मत्वाद्रज्जुसर्पादिवन्मिथ्यात्वमित्यर्थः। श्लोकव्या
वर्त्याशंकामुपन्यस्यति। स्वप्नेति। समत्वमाद्यन्तवत्त्वादिति। अनुमानसिद्धस्यार्थस्यानुमानदोषोक्तिमन्तरेणासत्त्वमयुक्तमिति पृ
च्छति। कस्मादिति। व्याप्तिभूमिं दूषयन्व्याप्तिभंगं दोषमाह। दृष्टान्तस्येति। असिद्धत्वं प्रश्नपूर्वकं विशदयति। कथमित्यादिना। अपूर्वद
२३ र्शनमेव विवृणोति। चतुर्दन्तमिति। अन्यदपि त्रिनेत्रत्वादि दृष्टान्तस्य साध्यविकलत्वे सिद्धे प्रागुक्तानुमानानुपपत्तिरिति फलितमाह।
तस्मादिति। दृष्टान्तासिद्धिं दूषयन्ननुमानं साधयति। तन्नेति। तत्किं स्वतः सिद्धं वा किं वा परतो नाद्यो जडस्य तदयोगादित्याह। न त
दिति। द्वितीये तन्मिथ्यात्वसिद्धिरित्यभिप्रेत्य स्वप्नस्यापूर्वकमाद्यपादमवतारयति। किं तर्हीति। तद्भूतान्यसरा कियाकरोति स्था

निन इति। अपूर्वस्य स्वप्रदर्शनस्य स्थानिधर्मत्वं दृष्टांतेन साधयति। यथेत्यादिना। अपूर्वदर्शनं स्वप्नद्रष्टृधर्मोपि चैतन्यवत्। किंन
स्यादित्याशंक्य बाधोपलब्धेर्मैवमित्याह। न स्वत इति। उत्तरार्द्धं विभजते। तानित्यादिना। अपूर्वाणां स्वप्नदृश्यानां स्थानिधर्मत्वे
पि किं मायात्वमित्याशंक्याह। तस्मादिति। स्वप्नदृष्टांतस्य साध्यविकलत्वाभावं निगमयति। अतोनेति। पूर्वस्यापूर्वस्य वा स्वप्नदर्शन
स्य स्वप्नद्रष्टृधर्मत्वेन तदविद्याविलसितत्वाद्दृष्टांते साध्यसंप्रतिपत्तेः तथैव जाग्रद्दृश्यानां मिथ्यात्वं युक्तमित्यर्थः। जाग्रद्दृश्यानां मि
थ्यात्वं तेषु सदसद्विभागप्रतिभानविरुद्धमित्याशंक्य दृष्टांतेन समाधत्ते। स्वप्नवृत्ताविति। श्लोकस्य तात्पर्यार्थमाह। अपूर्वत्वेति। स्वप्नद
दृष्टांतस्यापूर्वदर्शनप्रयुक्तां साध्यविकलशंकां परिहृत्येति यावत्। स्वप्नस्थानेऽपूर्वस्य मिथ्यात्वाविशेषेपीत्यर्थः। असत्त्वे परमार्थसद्वि
लक्षणत्वेन मिथ्यात्वे तत्रापि तर्हि विभागप्रतिभासविरोधात्कुतो मिथ्यात्वमित्याशंक्य बाधाविशेषादित्याह। उभयोरिति। दार्ष्टांतिकमा
ह। जाग्रदिति। युक्तत्वे हेतुमाह। अंत इति। श्लोकस्थानामक्षराणां व्याख्यानमनपेक्षितं व्याख्यातप्रायत्वादित्याह। व्याख्यानमिति। सर्वमिथ्या
त्वे प्रमातृप्रमाणादिव्यवहारानुपपत्त्या विरोधमाशंकते। उभयोरिति। कर्तृकरणकर्मव्यवस्थानुपपत्त्यापि विरोधोऽस्तीत्याह। को वा इति।
विकल्पको निर्मातेति यावत्। श्लोकस्य चोद्यपरत्वं प्रतिजानीते। चोदक इति। अक्षरयोजनया प्रथमार्थापत्तिविरोधं स्फोरयति। स्वप्नेति च
तुर्थपादमवतार्यार्थापत्त्यंतरविरोधं स्फुटयति। को वेतेषामिति। कर्ता हि पूर्वानुभूतं स्मृत्वा तज्जातीयान्निर्मिमीते ते स्मृत्यनुभवाश्रयास्ते २।१
षां कर्तास्येषो विवक्षितस्तथा च कर्त्रादिव्यवहारानुपपत्तिः सर्वमिथ्यात्वे दुर्वारेत्यर्थः। योऽध्यात्मं प्रमाता य आधिदैवं कर्ता ईश्वरस्तावु
भावपि मिथ्येत्यंगीकारात्प्रमात्रादेरसत्त्वमित्याशंक्याह। न चेदिति। यदि प्रमाता कर्ता वा नेष्यते तर्हि नैरात्म्यसिद्धमेवापद्यते न चैतद्दृष्टं इ
ष्यते आत्मनिराकरणस्य दुष्करत्वान्निराकर्तुरेवात्मत्वादित्यर्थः। कर्तृकार्यादिव्यवस्थानुपपत्तिं परिहरति। कल्पयतीति। करणांत
रं व्यवच्छिनत्ति। आत्मनेति। कर्मांतरं व्यावर्तयति। आत्मानमिति। कर्त्रंतरं निवारयति। आत्मेति। तस्य द्योतकांतरापेक्षां प्रतिक्षिप
ति। देव इति। विवर्तवादं द्योतयति। स्वमाययेति। सर्वस्य मिथ्यात्वेपि मायाकल्पितभेदानुरोधेन कर्तृत्वादिव्यवस्था सिध्यतीति भावः।
प्रमातृप्रमाणादिव्यवहारानुपपत्तिं प्रत्याह। स एवेति। एकस्मिन्नेवाद्वितीये प्रतीचि वस्तुनि काल्पनिकभेदनिबंधना सर्वा व्यवस्थेत्यत्र प्र
माणमाह। इति वेदांतेनेति। यथा घटस्रष्टा कुलालोऽधिष्ठाता मृदोऽन्यो दृष्टो न तथेहान्योऽधिष्ठातास्तीत्याह। स्वयमिति। यथा तत्र मृदो रूप ५८
मुपादानमधिष्ठातुरन्यद्दृष्टं न तथान्यदुपादानमस्तीत्याह। स्वात्मानमिति। तत्र स्वघटं कुर्वतो भूभागो भवत्याधारो न तथेहाधारो
ऽन्योस्तीत्याह। आत्मन्येवेति। परिणामवादं व्यावर्त्य विवर्तवादं प्रकटयितुं स्वमाययेत्युक्तं तत्र दृष्टांतमाह। रज्ज्वादाविति। मायाद्वारेण लं
चिदात्मनो जगन्निर्मातृत्वमुक्त्वा तस्यैव बुद्धिप्रतिबिंबितस्य प्रमातृत्वमित्याह। स्वयमेव चेति। न च प्रमातृत्वस्य तात्त्विकत्वं रज्ज्वादौ
सर्पादिदर्शनवदेव मिथ्यात्वनिर्द्धारणादित्याह। तद्वदिति। कर्त्रादिभेदस्य प्रमात्रादिभेदस्य च मिथ्यात्वे नेह नानास्तीत्यादिश्रुतिप्र

माणयतीत्येवमिति। सएवेत्येवकारार्थमाह। नान्योस्तीति। योजगत्तत्स्रष्टायस्थप्रमातातलतोऽन्योज्ञानस्यस्मृतेश्चाश्रयोनास्तिचेत
त्तन्भेदेमानाभावादनुभवस्मृत्योरेकाश्रयत्वस्यप्रसिद्धत्वादित्यर्थः। ज्ञानस्मृत्योराश्रयापेक्षाविषयापेक्षावानास्तीत्याशंक्याबाधि
तप्रसिद्धिविरोधान्नैवमित्याह। नचेति। प्रकृतायांकल्पनायांविवक्षितंक्रममुपन्यस्यति। विकरोतीति। नियतांश्चेति। चकारादनियता
श्चानिविवक्ष्यंते। प्रतिपित्सितंतत्रक्रमप्रतिपत्त्यर्थंपृच्छति। सकल्पयतीति। श्लोकाक्षरयोजनयाबुभुत्सितंक्रमंप्रत्यापयति। अव्यक्तइत्या
दिना। अन्यांश्चेति। द्वितीयानिश्चितावत्चित्तमध्येवासनारूपेणव्यवस्थिताननभिव्यक्तनामरूपत्वेनव्यवहारायोग्यत्वमाह। अव्याकृ
तानिति। कल्पनाकालीनान्विद्युदादीनस्थिरानित्यर्थः। बहिश्चित्तोबहिर्मुखोव्याख्यानव्यवहारयोग्यान्पदार्थान्कल्पयतीति। अंतश्चि
त्तास्तुतेभ्योव्यावृत्तबुद्धिर्मनोरथादिलक्षणानात्मन्यवस्थितान्भावान्व्यावहारायोग्यान्कल्पयित्वापुनर्बहिर्व्यवहारयोग्यमायेक
ल्पयतीत्यर्थः। एतदुक्तंभवति यथालोकेकुलालोवातंतुवायोवाघटंपटंवाकार्यंचिकीर्षुरादौव्यवहारयोग्यंबुद्ध्यावाविभाव्यपश्चा
त्तामेवबहिर्नामरूपाभ्यांसंपादयति। तथैवायमादिकर्ताविमायालक्षणोस्वचित्तेनामरूपाभ्यामव्यक्तेरूपेणस्थितान्सृष्ट्यप
दार्थान्प्रथमंसिसृक्षिताकारेणांतर्विभाव्यपश्चाद्बहिःसर्वप्रतिपत्तसाधारणरूपेणसंपादयतीतिकल्पनायांक्रमोधिगतिरि
तिकल्पितानांकल्पनाकालादन्यस्मिन्कालेसत्वाभावात्जाग्रद्भावानांचकल्पनाकालात्कालांतरेपिप्रत्यभिज्ञयासत्वावगमा
दनुपपन्नंतेषांमिथ्यात्वमित्याशंक्याह। चित्तेति। येकल्पनाकालभाविनोभावामनःस्पंदवर्तितेयेचप्रत्यभिज्ञायमानत्वेनपूर्वापरका
लभाविनोबहिरेवव्यवहारयोग्यादृश्यंतेतेसर्वेकल्पिताःसंतोमिथ्यैवभवितुमर्हंतिप्रत्यभिज्ञायमानत्वस्यस्वरूपोविशेषस्तुनाक
ल्पितत्वप्रयुक्तःकल्पितेपितद्दर्शनादित्यर्थः। श्लोकव्यावर्त्यामाशंकांदर्शयति। स्वप्नवदिति। यथास्वप्नेदृश्यमानंसर्वंकल्पितंमि
थ्यैवेष्यतेतथाजागरितेपिदृष्टंसर्वंचित्तस्पंदितंतेनकल्पितंमिथ्यैवेत्येतन्नाद्यापिनिर्धारितमित्यत्रहेतुमाह। यस्मादिति। आत्मावि
द्याविवर्तेनचित्तेनतावदंतर्विनिर्मितामनोरथरूपामनःस्पंदवर्तमानाःबहिरज्जुसर्पादयश्चतेनचित्तेनैवपरिच्छिद्यंतेतेहिकल्पनाकाल
मात्रभाविनोनप्रतीयंतेतैःसहवैलक्षण्यंमनसोबहिर्जाग्रद्दृश्यमानानांभावानांअन्योन्यपरिच्छेद्यत्वंकालद्वयावच्छिन्नत्वेनप्रत्य
भिज्ञागोचरत्वमितियस्मादुपलभ्यतेतस्माद्युक्तंजागरितस्यस्वप्नवन्मिथ्यात्वमित्यर्थः। श्लोकाक्षरैरुत्तरमाह। सानेति। येमनः
स्पंदमनोरथरूपाःभावास्तेचित्तकालाभवंतीत्यत्रचित्तकालत्वंविशदयति। चित्तेत्यादिना। वाक्यार्थमुक्त्वाविवक्षितार्थमाह। क
ल्पनेति। द्वितीयपादमवतार्यव्याकरोति। द्वयेति। येमनसोबहिरुपलभ्यंतेतेभेदकालाःकालस्यभेदोभेदकालःसयेषांतेतथेति
व्युत्पत्तेः। ततश्चान्योन्येनपूर्वेणान्येनवापरेणपरिच्छेद्याभिन्नकालावच्छिन्नत्वेनप्रत्यभिज्ञायमानाइत्यर्थः। प्रत्यभिज्ञायमानत्वमु
दाहरणनिष्ठतयास्फुटयति। यथेति। आगोदोहनंगोदहनपर्यंतमास्तेदेवदत्तस्तिष्ठतीतिप्रत्यभिज्ञाविषयत्वेनाभिज्ञोदाहर

मविद्याविजृंभितमितिप्रमाणसिद्धमित्यर्थः। अविद्याकल्पिताज्जीवकल्पनेत्यन्वयमुखेनोक्तं तदेवेदानीं व्यतिरेकमुखेन द
र्शयति। निश्चितायामिति। रज्जुरेवेति रज्ज्वां निश्चितायां तदज्ञाननिवृत्तेस्तदुत्थसर्पादिविकल्पः सर्वथा निवर्तते रज्जुमात्रं चाव
शिष्यते तद्वदात्मनि आत्मेति निश्चयो यदा संपद्यते तदा सर्वस्यात्मा। विद्याकल्पितस्य जीवादिविकल्पस्य व्यावृत्तेरद्वैतमेवात्म
तत्वं परिशिष्यते तस्मादात्माविद्याविजृंभिता जीवादिकल्पनेत्यर्थः। दृष्टांतभागं व्याचष्टे। रज्जुरिति। तद्वदित्यादि व्याकरोति। त
दिति। सर्वस्यापि संसारात्मनो धर्मस्यात्मन्यारोपितस्यासत्वावेदकं यन्निषेधशास्त्रं तेन जनितं विज्ञानमेव सूर्यालोकस्तत्कृतो यो
यमात्मविनिश्चयः स एवाद्वितीयः शिष्यते द्वैतं पुनः सर्वमेव व्यावृत्तं भवतीत्यर्थः। आत्मनिश्चयमेव विशिनष्टि। आत्मेति। सर्वमिदमा
त्मैवेत्युक्तं पूर्णत्वं तस्योच्यते पूर्वभाविना कारणेन संस्पर्शशून्योऽपूर्वः पश्चाद्भाविना कार्येण संबंधविधुरोऽनपरः। अंतरं छिद्रं तच्छून्यो
ऽनंतरः चिदेकरसघनस्यैवात्मनस्त्वकमबाह्यत्वं कार्यकारणास्पृष्टमुभयकल्पनाधिष्ठानत्वेन ततोऽपूर्णत्वादित्याह। सबाह्येति। वि
शेषणत्रयं कौटस्थ्यव्यवस्थापनार्थं जन्मादिसंबंधाभावे कारणमविद्यासंबंधराहित्यं दर्शयति। अभय इति। न खल्वविद्यातत्कार त्वं
पात्तेन संबंधमनुभवति तस्य पूर्णत्वेन कारणानपेक्षत्वादित्याह। एक इति। द्वैतव्यावृत्त्यर्थमवधारणं। नन्वविद्याया निराश्रयत्वा
नुपपत्तेराश्रयांतरस्य चासत्वात्तत्रैव सा प्रविष्टेति चेत् सत्यमविद्वद्दृष्ट्या तस्यास्तत्र प्रवेशोऽपि वस्तुदृष्ट्या नासौ तस्मिन्प्रवेष्टुं प्रभ
वतीत्यभिप्रेत्याह। अद्वय इति। आत्मनो द्वितीयत्वकथनमनेकैर्भावैस्तस्य विकल्पितत्वमित्यभिप्रायः प्रतिपत्त्या प्रत्यवतिष्ठते।
प्राणादिभिरिति। सिद्धांती स्वाभिसंधिमुद्घाटयन्नुत्तरमाह। मायेति। चोद्यभागं विभजते। यदीति। उत्तरार्द्धमुत्तरत्वेन व्याकरोति।
मोह्यत इति। मायामेव दृष्टांतेन स्पष्टयति। यथेति। तामेव मायां कार्यद्वारा स्फोरयति। यथेति। यथा लोके कोऽपि मोहितो मोहपरवशो
दृश्यते तथाऽयमात्मा स्वयमेव मायासंबंधान्मोहितो भवति अतो मोहद्वारा तत्रैव मायाधिगतिरित्यर्थः। मायायां मोहहेतुत्वं भ
गवतापि सूचितमित्याह। ममेति। के ते प्राणादयोऽनंता भावा यैरात्मा विकल्प्यते माययेत्यपेक्षायां प्राणादिविकल्पनामुदा
हरति। प्राण इतीति। प्राणो हि हिरण्यगर्भः तटस्थेश्वरो वा स जगतो हेतुरिति प्राणविदो हैरण्यगर्भा वैशेषिकादयश्च कल्पयंति
वी।५ तदिदं कल्पनामात्रं स्वतंत्रस्य हिरण्यगर्भस्य सर्वजगद्धेतुत्वे मानाभावात् पौरुषेयागमस्यापौरुषेयश्रुतिविरोधे स्वार्थमानत्वा
योगात् तटस्थेश्वरवादस्य च प्रामाण्ययुक्तिविहीनस्य प्रतिपत्तुमशक्यत्वादित्यर्थः। कल्पनांतरं दर्शयति। भूतानीति चेति। पृ २०
थिव्यप्तेजोवायवश्चत्वारि भूतानि जगत्कारणानीति लोकायतिकास्तदपि कल्पनामात्रं। न हि भूतानि स्वतः सि
द्धानि जडत्वविरोधात्। नापि परतः सिद्धानि स्वगुणस्यैव तन्मयस्य स्वग्राहकत्वायोगात्। वह्निगतो ह्यस्यादि विषयत्वादृशां य
नादत्तो भूतानि जगत्कारणानीति कल्पनैवेत्यर्थः। सत्वरजस्तमांसि त्रयो गुणाः साम्येनावस्थिता जगतो महदादिलक्षण

मा॰भा॰
टी॰

परीयावता कालेनाऽवच्छिन्नो वर्तते तावता कालेनाऽवच्छिन्नो गोदोहनं निर्वर्तयतीति इत्यनेककालावस्थायित्वेन प्रत्यभिज्ञाविष
यत्वं तस्य दर्शयति। यावदिति। यावता कालेनाध्वर्युर्दोहक्रियां निर्वर्तयितुं शक्नोति तावता कालेनाऽवच्छिन्नः सन्नेव तिष्ठतीत्यु
न्ते ३ दाहरणांतरमाह। तावानिति। पटो सैया स्थितो यावता कालेनाऽवच्छिन्नः स्वकार्यं निर्वर्त्य निर्वृतो स्यात्तावता कालेनाऽवच्छिन्नः सतिष्ठ
तीत्यपरमुदाहरणमाह। एतावानिति। उक्तेन न्यायेन परं परस्परेणैव कालेन परिच्छेद्यत्वं जाग्रद्दृश्यानां भावानामुपलभ्यते कालद्वय
स्य च परिच्छेदकत्वं तथा च ते सर्वे भावा बहिर्दृश्यमानाः द्वयकालेन कालद्वयेन परिच्छेद्याः भवंतीत्यर्थः। तृतीयपादं व्याचष्टे। अंतरि
ति चतुर्थपादार्थमाह। नेत्यादिना। बाह्यो जाग्रद्दृश्येषु बाह्यपदार्थेषु व्यवस्थितो द्वयकालत्वेन कालद्वयावच्छेदकृतः प्रत्यभिज्ञायमा
पि नत्वरूपो विशेषोऽन्यहेतुको न भवति कल्पितेऽपि द्विविधविशेषसंभवादित्यत्र दृष्टांतमाह। अत्रापीहेति। यद्यपि स्वप्ने जाग्रद्दृष्टं जा
तं कल्पितं तथापि तत्र यथोक्तो विशेषः स्फुटः सिध्यति स्वप्ने सर्वस्य भेदजातस्य कल्पितत्वेऽपि प्रत्यभिज्ञायमानत्वाज्जागरितेऽपि
तदुपपन्नमित्यर्थः। स्वप्नजागरितयोरुभयोरपि मिथ्यात्वे स्फुटास्फुटावभासविभागानुपपत्तेर्नाविशेषेण मिथ्यात्वमित्याशंक्या
ह। अव्यक्ता इति। येऽपि नः स्वप्नेऽन्तर्भावरूपत्वादस्फुटा ये च मनसो बहीरूपलभ्यमानाः स्फुटा भवंति ते सर्वे मनःस्पंदमात्रत्वेन कल्पि
ताः मिथ्येति यावत् बहिरिंद्रियभेदनिमित्तः स्फुटत्वास्फुटत्वविशेषः न मिथ्यात्वममिथ्यात्वं वा तत्रोपयुज्यते मिथ्याभूतेष्वपि तद्द
र्शनादित्यर्थः। श्लोकाक्षराणि व्याकरोति। यदपीत्यादिना। मनस्यंतर्मनोरथरूपाणां भावानामव्यक्तत्वमस्फुटत्वं तत्र हेतुमाह। मन
इति। चक्षुरादिग्राह्यत्वेन मनसो बहिर्भावानां स्फुटत्वं दृष्टं तदेषाममिथ्याकृतत्वमिति शंकां वारयति। नासाविति। सर्वस्य प्रतिपन्न
मिथ्यात्वेऽपि स्वप्ने स्फुटत्वास्फुटत्वविशेषप्रतिभानान्नासौ विशेषो मिथ्यात्वममिथ्यात्वं वा प्रयोजयितुं प्रभवतीत्याह। स्वप्नेऽपीति
अयं विशेषस्तर्हि केन सिध्यतीत्याशंक्य चतुर्थपादार्थमाह। किंतर्हीति। मनोमात्रसंबंधादंतर्भावानां वासनामात्ररूपाणामस्फु
टत्वं बहिर्भावानां तु चक्षुरादिबहिरिंद्रियसंबंधायुक्तं स्फुटत्वे तदेष विशेषो मिथ्यात्वेऽपि चेंद्रियविशेषात्सिध्यतीत्यर्थः। स्फुटत्वास्फुटत्व
प्रतिभासभेदस्य मिथ्यात्वेऽपि संभवात् प्रागुक्तमनुमानमविरुद्धमित्युपसंहरति। अत इति। भवतु सर्वस्य कल्पितत्वं स पुनः सर्व
कल्पनाकेन द्वारेणेत्याशंक्याह। जीवमिति। आत्मा हि स्वयं स्वमायावशो न कल्पयन् आदौ चित्स्वरूपे जीवं कल्पयति। तत १०
त्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः स्वयमेव जीवभावमापद्यते तद्द्वारेण पुनर्नानाविधान्भावान्निर्मिमीते ज्ञानस्मृतिविषयस्या
नंतरं कल्पेषु भावेषु वैषम्योपपत्तिरित्यर्थः। श्लोकव्याख्याप्रश्नमुत्थापयति। बाह्या इति। पादार्थाः साध्यसाधनतया स्थिताः व्या
ह्याः सुखं दुःखं च ज्ञानं रागश्चेत्येवमादयस्त्वाध्यात्मिकाः तेषां परस्परनिमित्तनैमित्तिकतास्ति बाह्यान्निमित्तीकृत्याध्या
त्मिका भवंति तान्निमित्तीकृत्येतरे जायंते तदेवमितरेतरनिमित्ततया नैमित्तिकतायां च कल्पनायां मूलं वक्तव्यं निर्मूल

नवि

माणयतीत्येवमिति। सहैवेत्येवकारार्थमाह। नान्योस्तीति। योजगत्स्रष्टा य स्थूलप्रमाता ततोऽन्यो ज्ञानस्य स्मर्तेश्चाश्रयो नास्ति चेत
तनभेदमानाभावादनुभवस्मृत्योश्चैकाश्रयत्वस्य प्रसिद्धत्वादित्यर्थः। ज्ञानस्मृत्योराश्रयापेक्षा विषयापेक्षा वा नास्तीत्याशंक्याव्याधि
तप्रसिद्धिविरोधान्नैवमित्याह। नचेति। प्रकृतायां कल्पनायां विवक्षितं क्रममुपन्यस्यति। विकरोतीति। नियतांश्चेति। चकारादनिपता
श्चेति विवक्ष्यते। प्रतिपित्सितं क्रमप्रतिपत्त्यर्थं पृच्छति। सकल्पयतीति। श्लोकाक्षरयोजनया बुभुत्सितं क्रमं प्रत्यापयति। अव्यतइ ता
दिना। अन्यांश्चेति। द्वीयानि निखावत् चित्तमध्ये वासनारूपेण व्यवस्थिताननभिव्यक्तनामरूपत्वेन व्यवहारायोग्यत्वमाह। अव्याकृ
तानिति। कल्पनाकाले नु विद्युदादीन्नष्टिरानित्यर्थः। बहिश्चित्तो बहिर्मुखो व्याघ्रान् व्यवहारयोग्यान् पदार्थान् कल्पयति। अंतश्चि
तास्तु तेभ्यो व्यावृत्तबुद्धिर्मनोरथादिलक्षणानात्मन्यवस्थितान् भावान् व्यवहारायोग्यान् कल्पयित्वा पुनर्बहिर्व्यवहारयोग्यमापेक
ल्पयतीत्यर्थः। एतदुक्तं भवति यथा लोके कुलालो यातंतुवायो वा घटं पटं वा कार्यं चिकीर्षुरादौ व्यवहारयोग्यां बुद्ध्या वा विभाव्य पश्चा
त्तामेव बहिर्नामरूपाभ्यां संपादयति। तथैवाप्रमादिकर्त्ता विमाया लक्षणोस्य चित्ते नामरूपाभ्यामव्यक्तरूपेणावस्थितान् स्वसृष्टव्यप
दार्थान् प्रथमं सिसृक्षिताकारेणांतर्विभाव्य पश्चाद्बहिः सर्वप्राणिपत्साधारणरूपेण संपादयतीति कल्पनायां क्रमोधिगतिरि
ति कल्पितानां कल्पनाकालादन्यस्मिन्काले सत्त्वाभावात् जाग्रद्द्रावानां च कल्पनाकालात् कालांतरेपि प्रत्यभिज्ञया सत्त्वावगमा
दनुपपन्नं तेषां मिथ्यात्वमित्याशंक्याह। चित्तेति। ये कल्पनाकालभाविनो भावा मनस्यंतर्वर्त्तंते ये च प्रत्यभिज्ञायमानत्वेन पूर्वापरका
लभाविनो बहिरेव व्यवहारयोग्या दृश्यंते ते सर्वे कल्पिताः संतो मिथ्यैव भवितुमर्हंति प्रत्यभिज्ञायमानत्वलक्षणो विशेषस्तु नाक
ल्पितत्वप्रयुक्तः कल्पितेपि तद्दर्शनादित्यर्थः। श्लोकस्यावस्थामाशंकां दर्शयति। स्वप्नवदिति। यथा स्वप्ने दृश्यमानं सर्वं कल्पितं मि
थ्यैवेष्यते तथा जागरितेपि दृष्टं सर्वं चित्तस्पंदितं तेन कल्पितं मिथ्यैवेत्येतन्नास्यापि निर्द्धारितमित्यत्र हेतुमाह। यस्मादिति। आत्माऽवि
द्याविवर्त्तेन चित्तेन तावदंतर्विनिर्मिता मनोरथरूपा मनस्यंतर्वर्तमानाः बहिः रज्जुसर्पादयश्च तेन चित्तेनैव परिच्छिद्यंते तेहि कल्पनाकाल
मात्रभाविनो न प्रतीयंते तैः सहैव लक्षण्यं मनसो बहिर्जागरे दृश्यमानानां भावानां अन्योन्यपरिच्छेद्यत्वं कालद्वयावच्छिन्नत्वेन प्रत्य
भिज्ञागोचरत्वमिति यस्मादुपलभ्यते तस्माद्युक्तं जागरितस्य स्वप्नवन्मिथ्यात्वमित्यर्थः। श्लोकाक्षरैरुत्तरमाह। सा नेति। येमन
स्यंतर्मनोरथरूपाः भावास्ते चित्तकालका भवंतीत्यत्र चित्तकालत्वं विशदयति। चित्तेत्यादिना। वाक्यार्थमुक्त्वा विवक्षितार्थमाह। क
ल्पनेति। द्वितीयपादमवतार्य व्याकरोति। द्वयेति। ये मनसो बहिरुपलभ्यंते ते भेदकालाः कालस्य भेदो भेदकालः स येषां ते तथेति
व्युत्पत्तेः ततश्चान्येन पूर्वेणान्येन वापरेण परिच्छेद्या भिन्नकालावच्छिन्नत्वेन प्रत्यभिज्ञायमाना इत्यर्थः। प्रत्यभिज्ञायमानत्वमु
दाहरणनिष्ठतया स्फुटयति। यथेति। आगोदोहनं गोदोहनपर्यंतमास्ते देवदत्तस्तिष्ठतीति प्रत्यभिज्ञाविषयत्वेनाभिज्ञोदाहर

स्यकारणमिति सांख्यास्तदपि कल्पनामात्रं साम्येन स्थितानां कारणत्वे प्रलयाभावप्रसंगाद्वैषम्यभजनस्य निर्हेतुकत्वे सदा
तदापातात् सहेतुकत्वे हेतोर्नित्यत्वे प्राचीनदोषानुषंगात् अनित्यत्वे हेत्वंतरापेक्षायामनवस्थानादित्याह॥ गुणा इतीति। कल्प
नांतरमाह॥ तत्त्वानीति चेति। आत्मा विद्या शिवा इति संक्षेपतः त्रीणि तत्त्वानि सर्वजगत्प्रवर्तकानीति शैवा मन्यंते तदपि कल्पनामा
त्रं आत्मनो भिन्नत्वे शिवस्य घटादितुल्यत्वप्रसंगादभिन्नत्वे तत्त्वानां त्रित्वव्याघातादित्यर्थः॥९ कस्यात्मनो विश्वादयः पादाः स
र्वस्य व्यवहारहेतवो भवंतीत्यपि कल्पनामात्रं निरंशस्यात्मनोंऽशभेदानुपपत्तेरित्याह॥ पादा इतीति। वात्स्यायनप्रभृतीनां कल
नोकथयति। विषया इतीति। शब्दादयो विषया भूयो भूयो भुज्यमानास्तत्त्वमिति विभ्रममात्रं विषयस्य विषयाणां चदूरमत्यंत
मंतरमुपभुक्तं विनश्यंति विषयास्मरणादपीति विषयानुसंधानस्यानिर्दितत्वात्तेषां पारमार्थिकतत्त्वाभावानुपपत्तेरित्यर्थः॥ भु
र्भुवः स्वरिति त्रयो लोकाः वस्तुभूताः संतीति पौराणिकास्तदपि कल्पनामात्रं स्थानभेदेन त्रित्वे न तदानंत्यस्य दुरुत्तरत्वा
न्नस्थानत्रयस्य चासिद्धत्वादित्याह॥ लोका इति। अग्निइंद्रादयो देवास्तत्फलदातारो नेश्वरस्तथेति देवताकांडीयास्तदपि कल्पना
मात्रं अस्मदादिवत्प्रयत्नमपेक्ष्य फलदातृत्वे तेषां कृत्स्नेभ्यो विशेषाभावप्रसंगात् स्वातंत्र्येणोपकारकत्वे तदाराधनवैयर्थ्यप्र ना
संगात् तद्भक्तानामपि विप्रतिपत्तिदर्शनात् प्रसादस्य किंचित्करत्वादित्याह॥ देवा इति चेति। ऋग्वेदादयो वेदाश्चत्वारस्तत्त्वानीति याठ
काः वदंति [illegible] तदपि कल्पनामात्रं नहि वेदाः लौकिकवर्णव्यतिरिक्ता दृश्यंते क्रमवतामेव वर्णानां वेदशब्दवाच्य
त्वांगीकारात् क्रमश्चोच्चारणोपलक्ष्योऽन्यतरगतो वर्णेष्वारोप्यते तथा च तथाविधक्रमवतां वर्णानामारोपितरूपेण वेदशब्दवाच्यत्व
त्वात् नो वेदानां पारमार्थ्यमित्याह॥ वेदा इतीति। ज्योतिष्टोमादयो यज्ञा वस्तुभूताः फलं ददतीति बोधायनप्रभृतयो याज्ञिका मन्यंते तदपि भ्रां
तिमात्रं यज्ञस्याखंडस्याभावात् द्रव्यं देवता त्यागश्च त्रयाणामेकैकस्मिन् यज्ञत्वविज्ञानाभावात् समुदायस्य चावस्तुत्वादित्याह॥ यज्ञा इति चेति। भो
क्तैवात्मा न कर्तेति सांख्यास्तत्र भोगो यदि विक्रियात्मा स्यात् क्रियते न हि कथं नानित्यत्वादिप्रसंगः स्वभावत्वे सदा स्यादिति विषयसन्निधौ
भोक्तृत्वं भ्रांतिरित्याह॥ भोक्तेति चेति। सूपकारास्तु भोज्यं वस्तु इति प्रतिजानते तदपि न मधुरादिरसव्यंजकव्यंजनादस्तदेवान्यथात्व
दर्शनादेकरूपासंभवादित्याह॥ भोज्यमिति चेति। आत्मा सूक्ष्मोऽणुपरिमाणः स्यादिति केचित् तत्र युगपद् शेषशरीरव्यापिवेद
नानुसंधानासिद्धेरित्याह॥ सूक्ष्म इतीति। स्थूलो देहो हि प्रत्यक्षात्मेति लोकायतमेदस्तच्च न मृतसुप्तयोरपि संघाताविशेषाच्चेतन्य
प्रसंगात् एकैकस्य च भूतस्य चेतन्यादर्शनात् संघातस्य चावस्तुत्वादित्याह॥ स्थूल इति चेति। मूर्तिरस्ति स्थूलादिधारी महेश्वरस्य काचि
धारि वा परमार्थो भवतीत्यागमिकास्तदपि भ्रांतिमात्रं अस्मदादिशरीरवत् पांचभौतिकत्वाद्धीलाविग्रहकल्पनं च विग्रहाभावे लीला
लायोगादयुक्तमित्याह॥ मूर्त इति। अमूर्तः सर्वाकारशून्यो निःस्वभावः परमार्थः इति शून्यवादिनस्तदपि कल्पनामात्रं परमार्थो

निःस्वभावश्चेति व्याघातादित्याह। अभूतेइतिचेति। कालः परमार्थ इति ज्योतिर्विदस्तन्न कालेक्षणमुहूर्त्तादिव्यवहारायोगात्तन्ना
नात्वेन स्यात्तेऽमन्यविषयत्वेन प्रतीतेरुदयकालइत्यादिना क्रियाधर्मत्वेन प्रतीतेः स्फुटत्वात् न च क्रियाधर्मत्वं कालेपि तदुत्पत्तिदर्शनाद
न्यथा कालानवच्छिन्नत्वेन क्रियानिस्सत्वापातादित्यादित्याह। कालइतीति। स्वरोदयविदस्तु दिशः परमार्थ इत्याहुः तदपि भ्रांतिमात्रं तद्दिशा
मपि पराजयदर्शनादित्याह। दिशइतिचेति धातुवादः मंत्रवादश्चेत्यादयो वादा वस्तुभूता भवंतीति केचित्तदपि कल्पनामात्रं ताम्रादिस्वभावे
स्थितेन स्वर्णकनकादिस्वभावासंभवात् मंत्रवादेपि कालदष्टो न जीवतित्र कालदृष्टस्तु स्वयमेवाहत्य स्पनीत्यमुग्धाभाह्या मोहमात्रमित्य
हा। वादाइतीति। भुवनानि चतुर्दश वस्तूनीति भुवनकोशविदस्तदपि विकल्पनाम्नात्रं तेषामदृष्टत्वात् न च तेभ्यस्तादृशं दर्शनं तेषां मिथ्या विप्रतिपत्ति
दर्शनादित्याह। भुवनानीति। मनएवात्मेति लौकायतिकास्तदपि भ्रांतिमात्रं तस्य स्यात्तं चेत् केशप्राप्त्यनुपपत्तेः अस्यात्तं चेत् घटवद्दनात्म
त्वात्करणत्वाच्च दीपवदात्मत्वायोगादित्याह। मनइति। बुद्धिरेवात्मेति बौद्धास्तेषामपि भ्रांतिमात्रमेव वनस्पतिषु व्यभिचारात् वैधस्य
न्यघटवदतिरिक्तवैयर्थ्यादित्याह। बुद्धिरितिचेति। चित्तमेव बाह्याकारशून्यं विज्ञानं तदेवात्मेत्यपरे तत्रापि प्रागुक्तन्यायाविशेषात्तुल्यभ्रां
तित्वमित्याह। चित्तमिति। धर्माधर्मौ विधिनिषेधचोदनागम्यौ परमार्थाविति मीमांसकास्तदपि कल्पनामात्रं देशकालादिषु धर्माधर्मयो
र्विप्रतिपन्नदर्शनादित्याह। धर्मेति। प्रधानं मूलप्रकृतिर्महदहंकारस्तन्मात्राणीति सप्त प्रकृतिविकृतयः पंचज्ञानेंद्रियाणि पंचकर्मेंद्रि
याणि पंचविषयाः मनश्चैकमिति षोडश विकाराः पुरुषस्तु दृशिस्वभाव इति पंचविंशतिसंख्याकः प्रपंचो वस्तुत इति सांख्यास्तच्च कल्प
नामात्रं पंचविंशतिविशेषणस्याव्यावर्तकत्वे वैयर्थ्यात् व्यावर्तकत्वे च व्यावर्त्यप्रमित्यप्रमित्योरनुपपत्तेरित्याह। पंचविंशकइति। पातंज
लाः पुनरीश्वरमधिकं पश्यंतः षड्विंशतिः पदार्था इति कल्पयंति तदयुक्तं ईश्वरस्य पुरुषांतर्भावादधिकत्वानुपपत्तेरित्याह। षड्विंशइति
चेति। पाशुपतास्तु रागाविद्यानियतिकालकलामायाधिकास्त्वेकत्रिंशत्पदार्था इति ब्रुवते तन्नांतः क्लेशत्वेपि रागाविद्ययोरवांतरभे
दवदस्मितादेरपि तद्भेदत्वेन संख्यातिरेकात् तस्य रागोपलक्षितत्वेन स्यादिति अविद्योपलक्षितत्वेन न्यूनतापातादविद्यामाययोश्चैकत्वा
दवांतरभेदे च नियतावपि तदुपपत्तौ संख्यातिरेकतादवस्थ्यं कालकलासु च तत्प्रसिद्धेरित्याह। एकत्रिंशकइति। अनंतपदार्थभेदो
ननियतो नास्तीति केचित्तदपि न वादिनां विवाददर्शनात् विवादस्य चाज्ञानमूलत्वादित्याह। अनंतइति। लोकानुरंजनमेव तत्वमितित्व
लौकिकास्तदपि विभ्रममात्रं लोकस्य भिन्नरुचित्वात्तदनुरंजनस्येश्वरेणापि कर्तुमशक्यत्वादित्याह। लोकानिति। दक्षप्रभृतयस्त्वा २१
श्रमाः परमार्था इति समर्थयंते तदसत् वेषस्याश्रमशब्दार्थत्वे शूद्रादेरपि प्रसंगाज्ज्ञाते श्रद्धविवेचनत्वात्तन्मूलस्याश्रमस्य दर्शयि
तुमशक्यत्वात् संस्कारस्य च देहसमवायित्वे पारलौकिकत्वायोगाद संगे चात्मनि तदसमवायादित्याह। आश्रमइतीति। वैयाक
रणास्तु स्त्रीपुंनपुंसकशब्दजातं तत्वमिति वर्णयंति तदप्ययुक्तं स्त्र्यादेः शब्दस्वभावत्वे सर्वादीनां त्रिलिंगत्वायोगादेकस्याने

रनंतमपि चघटवदनीश्वरत्वप्रसंगा ८

करत्वभावत्वासंभवादौपाधिकधर्मत्वे च तस्यावस्तुत्वप्रसंगादित्याह। स्त्रीपुंनपुंसकमिति। देहभ्रमणीवेदितव्ये परं चैवापरं चेति केचि
न्तृतत्त्वं न परिच्छेदकं क्वचिदपि ... योगाद्वस्तुतो परिच्छिन्नस्य तद्भावादित्याह। परापरमिति। सृष्टिर्वा लयो वा स्थितिर्वा तत्त्वमिति पौराणि
कास्तदपि कल्पनामात्रमित्याह। ससृष्टौ स्थित्यादिभावस्य वक्ष्यमाणत्वादिति विवक्षित्वाह। सृष्टिरित्यादिना। यथोक्तकल्पनानामधिष्ठानं सूच
यति। सर्वे चेति। उदाहृतानामनुदाहृतानां च कल्पनाभेदा यावंतो विद्यंते ते सर्वे प्रकृतात्मन्येव कल्पना वस्तुतो यत्कल्प्यते नात्मनः कल्पितत्वं
सर्वस्य कल्पितत्वे नाधिष्ठानत्वायोगादित्यर्थः। प्राणादिश्लोकेषु प्राणशब्दार्थमाह। प्राण इति। तस्यैव बीजात्मनो विकारविशेषत्वादितरेषां
नततोऽस्यंतभिन्नतेत्याह। तत्कार्यैरिति। अन्यानिमं पदार्थं स्फुटयति। अन्ये चेति। कुलधर्मो ग्रामधर्मो देशधर्मश्चेत्येते सर्वशब्देन गृह्यंते तेषामा
त्मनि तदज्ञानादेव कल्पितत्वं सदृष्टांतं स्पष्टयति। रज्वामिति। आत्मनोऽधिष्ठानत्वयोग्यतार्थं कल्पनाशून्यत्वमाह। तच्छून्य इति। कि
मितिसमुदायार्थः। श्लोकानामुच्यते श्लोकांतरैः षड्विधमत्येकं पदार्थव्याख्यानमेव तेषु किं तत्स्यादित्याशंक्याह। प्रत्येकमिति। लौकि
कानां परीक्षकाणां च कतिपयकल्पनाभेदानुदाहृत्यानंतत्वेषामुदाहरणे अशक्यत्वं द्योतयन्नाक्षेपमात्रमाचष्टे। संभावमिति। पादत्रयं विभ
जते। किंबहुनेत्यादिना। तमेव भावं विशिनष्टि। योदर्शीलइ इति। सकथं तद्रूपं रक्षतीत्यपेक्षायामाह। असाक्षीति। साधकपुरुषतादात्म्य
मापाद्येत्यर्थः। रक्षणप्रकारं प्रकटयति। स्वेनेति। साक्षादसाधारणरूपत्वेन तत्रैव निष्ठामापादितेनान्यत्र प्रवृत्तिमुपासकस्य निवारय
तीत्यर्थः। चतुर्थपादमाचष्टे। तस्मिन्निति। एतेनान्यत्र प्रवृत्तिनिरोधहेतुरुक्तः। तर्हि प्राणादीनामात्मवद्देवतात्विकत्वं प्राप्तमित्याशंक्याक
ल्पितानामधिष्ठानातिरेकेणावस्तुत्वान्नैवमित्याह। एतैरिति। उक्तं ज्ञानस्तुत्यर्थमाह। एवमिति। पूर्वार्द्धं व्याकरोति। एतैरिति। कल्पितानाम
मधिष्ठानातिरेकेणासत्त्वात्स्फुरणयोरभावात्तद्वारेणात्मनि भेददर्शनमविवेकिनामस्तु तदन्येषां कथमसुपस्थितिरित्याशंक्याह। विवेकि
नां त्विति। प्राणादीनामात्मव्यतिरेकेणासत्त्वे प्रमाणमाह। इदमिति। उत्तरार्द्धं योजयति। एवमिति। तत्त्वेनात्मवेदनोपायं सूचयति। तत्त्वेनेति
स्वप्नदृश्यवज्जाग्रद्दृश्यानां मिथ्यात्वसाधको दृश्यत्वादिहेतुरत्र युक्तिरित्युच्यते यथोक्तविज्ञानवान्वेदकिं करो न भवति किंतु स्वयं वेदा
र्थश्रुतेः सत्य एव तदर्थो भवतीत्यर्थः। विभागतो वेदार्थव्याख्यानमभिनयति। इदमिति। ज्ञानकांडं साक्षादद्वैतवस्तुपरं कर्मकांडं तु साध्य
साधनसंबंधबोधनद्वारा परंपरया तस्मिन्पर्यवसितं सर्वे वेदा यत्पदमामनंतीति श्रुतेरर्थः। आत्मविदो वेदार्थवित्त्वमुक्तं व्यनक्ति नही
ति। तदेव हि वेदार्थत्वं यत्प्रत्यगात्मरूपं अत आध्यात्मविदेव याथात्म्येन तत्त्वज्ञानेऽधिभवतीत्यर्थः। उक्तेऽर्थे स्मृतिमुदाहरति। नहीति कि
याशब्देन प्राणमुच्यते तत्फलं तत्त्वज्ञानं अग्निहोत्रादिक्रियायाश्च बुद्धिशुद्धिद्वारा तस्मिन्पर्यवसानादित्यर्थः। याभिर्युक्तिभिरस्मिन्प्रक
रणे द्वैतमिथ्यात्वं कथ्यते तासां प्रमाणानुग्राहकत्वादनाभासत्वमवसेयमित्याह। स्वयमिति। श्लोकस्य तात्पर्यमाह। यदेतद्द्वैतस्य पं॰२
ति। असत्त्वे सत्त्ववस्तुतिभानं कथमित्याशंक्य श्लोकाक्षराणि व्याचष्टे। स्वप्नश्चेति। प्रसारितानि तानि तत्र तत्र प्रकटितं प्रापितानि

मा॰ भा॰ प्रकरणेति। कोसौ प्रकरणार्थस्तस्य वा संग्रहे किंसि ते। इत्यत आह। यदेति। व्यवहारमात्रस्याविद्याविषयत्वेपि किं स्यादिति चेत्तदाह। तदेति। चतुर्थपादार्थमाह। ८
श्रा॰ पण्यानि क्रयविक्रयद्रव्याणि तेषामापणेषु प्रसारितपण्यापण्यास्तैश्च गृहाश्च प्रासादाश्च स्त्रीपुंजनपदाश्च तेषां व्यवहारास्तैराकीर्ण
मिति योजना। दृष्टांतत्रयमनूद्य दार्ष्टांतिकमाह। यथा चेति। नेह नानास्ति किंचनेत्यादयो वेदांताः द्वैतस्य वस्तुतोऽसत्त्वे स्मृतिमपि दर्श
यति। तम इति। तमस्यस्मिन्मंदांधकारे रज्ज्वामधिष्ठाने भूच्छिद्रमिति यद्भ्रांत्या भाति तन्निभं तत्तुल्यं विवेकिभिर्विश्वं दृष्टं तच्चातीव चंचलमा
लक्षितं नान्नप्रायं वर्तमानकाले पितृप्रायतासत्त्वान्नैव च द्वैतं कदाचिदपि सुखकरमुपलभ्यते दुःखाकीर्णं तं तु दृश्यते तच्च नाशग्रस्त
नाशादूर्ध्वमसत्त्वमेवावगच्छति। ननु तर्हि तस्य परमार्थत्वं प्रमाणाभावादित्यर्थः। प्रमाणयुक्तिभ्यां द्वैतमिथ्यात्वं प्रसाध्य नेनाद्वैतमेव पार
मार्थिकमिति स्थिते निर्द्धारितमर्थं संगृह्णाति। नेत्यादिना। श्लोकस्य तात्पर्यार्थमाह। अत्रेति। उक्तमेवार्थं प्रश्नप्रतिवचनाभ्यां प्र
पंचयति। कथमित्यादिना। द्वैतासत्त्वे श्रुतस्य वष्टंभेन स्पष्टयति। यत्र हीति। द्वैतस्यासत्त्वे कथमुत्पत्तिप्रलयौ न स्यातामित्याशंक्य कि
द्वैतस्य तौ किं वा द्वैतस्येति आद्यं विकल्पं दूषयति। सतो हीति। द्वितीयं प्रत्याह। नापीति। व्यावहारिकद्वैतांगीकारान्न स्यैवोत्पत्तिप्र
लयौ इत्याशंक्याह। यस्त्विति। विमतस्तत्त्वतो नोत्पत्तिप्रलयवान् कल्पितत्वात् रज्जुसर्पवदित्यत्र दृष्टांतासिद्धिमाशंक्य रज्जुसर्पस्य रज्ज्वा
मुत्पत्तिप्रलयौ मनसि वा द्वयोर्वेति विकल्प्य प्रथमं प्रत्याह। नहीति। रज्जुपरूपत्वे सर्वेषामुपलब्धिप्रसंगादित्यर्थः। द्वितीयं दूषयति। नचे
ति। बहिरुपलब्धिविरोधात् इत्यर्थः। तृतीयं निरस्यति। नचेति। उभयतो मनोरज्जुलक्षणान्नारज्जुसर्पस्योत्पत्तिप्रलयौ युक्तौ द्व्याधार
त्वानुपलंभादित्यर्थः। रज्जुसर्पवत् द्वैतस्य मानसत्वाविशेषान्न तत्त्वतो जन्मविनाशौ दर्शयितुं शक्याविति दार्ष्टांतिकमाह। तथेति। द्वै
तस्य न कुत्रास्ति नाशिकौ जन्मविनाशाविति विशेषः। मानसत्वासिद्धिमाशंक्याह। नहीति। अन्वयव्यतिरेकाभ्यां द्वैतं मनोविकल्पनामात्रमि
ति निगमयति। अत इति। न च मनो द्वैतस्य दर्शनमात्रे निमित्तमिति युक्तं भ्रमसिद्धस्याज्ञानसत्तायां प्रमाणाभावादित्यभिप्रेत्य प्रकृतमु
पसंहरति। तस्मादिति। निरोधाद्यभावस्य परमार्थत्वे तत्रैव शास्त्रव्यापारादद्वैते तद्व्यापारादभावबोधने व्यापृतस्य भावबोधने व्या
पारविरोधादद्वैतमप्रामाणिकं प्राप्तमिति शंकते। यद्येवमिति। अद्वैतस्य प्रामाणिकत्वाभावे किं स्यादित्याशंक्याह। तथाचेति। अद्वैतस्या
प्रामाणिकत्वेपि कुतः शून्यवादो द्वैतस्यासत्त्वादित्याशंक्याह। द्वैतस्य चेति। प्रामाणिकः शून्यवादो युक्तो यथा रज्ज्वामारोपितसर्पादे रज्जु
रधिष्ठानं न हि निरधिष्ठानो भ्रमोऽस्ति तथाद्वैतकल्पनाया निरधिष्ठानत्वाऽ(ना)योगात्तदधिष्ठानत्वेनाद्वैतमास्थेयमित्योंकारप्रकरणेपरि २२
हृतमेतच्चोद्यं कथमुद्भावयसीति सिद्धांतवाद्याह। नेत्यादिना। तत्र शून्यवादी स्वमतानुसारेण दृष्टांतासंप्रतिपत्त्या चोदयति। आदेति।
स्वमतसमतस्यैव दृष्टांतत्वे सनियमात् प्रसिद्धिमात्रेणापरं प्रति बोधनसंभवात् भ्रमबाधे परिशिष्यमाणस्यावधिः सत्यता या रज्ज्वादौ
दृष्टत्वात् द्वैतभ्रमबाधसाक्षितया स्फुरतश्चैतन्यस्याकल्पितत्वादेव सत्त्वान्न शून्यताप्रसक्तिरित्युत्तरमाह। नेत्यादिना। अद्वैतमसद
प्रामाणिकत्वाद्रज्जुसर्पवदिति न दके कल्पितत्वासिद्धिं शंकते। रज्ज्वेति। रज्जुसर्पस्यासत्त्वे भ्रांतिविषयत्वं प्रयोजकमात्मनस्तु तन्नमसासि

त्वान्निषमेन भ्रमाविषयत्वान्नासत्वमित्युत्तरमाह। नैकांतेनेति। अप्रमाणिकत्वे हेतोरनैकांतिकत्वदोषांतरमाह। अविकल्पिते
ति। नायं सर्पो रज्जुरेषेति सर्पाभावविज्ञानपूर्वकं पुरोवर्त्तिनारज्जुनिश्चयात् प्रागवस्थायां प्रामाणिकत्वाभावेपि सन्नेवाज्ञात रज्ज्वं
शोभ्युपगम्यते तथा सद्वैतप्रामाणिकत्वाभावेपि सन्नेवात्माभविष्यतीत्यर्थः। आत्मनोऽसत्वाभावे हेत्वंतरमाह। विकल्पयितुश्च
ति। आत्मनो द्वैतभ्रमाधिष्ठानत्वेन संभावितत्वात् बाधसाक्षित्वेन परिशिष्टत्वात् सर्वभ्रमोत्पत्तेः स्वतःसिद्धत्वाच्च प्रमाणाविषय
त्वेपि नास्ति शून्यतेत्युक्तमिदानीं प्रमितधर्मिणि प्रतिषेधदर्शनादात्मनः प्रमितत्वे तत्र द्वैताभावप्रमापकं शास्त्रमयुक्तमिति शं
कते। कथमिति। प्रतिपन्ने धर्मिणि प्रतिषेधात्प्रमितप्रतियोगिधस्य विशेषणावैफल्यादेवानभ्युपगमादात्मनश्च सर्वकल्पनाधिष्ठान स्व६
कारणास्फुरणांगीकारान्नास्मिन्प्रतिपन्ने द्वैतप्रतिषेधसंभवतीति परिहरति। नेषदोषइति। भ्रमाविषयस्यात्मनोध्यासानुगतया
स्फुरणमघटमानमित्याक्षिपति। कथमिति। स्वप्रकाशत्वेन स्वतो निर्विकल्पकस्फुरणेपि सविकल्पकव्यवहारे समारोपितत्वस्
ष्टीकारेण भ्रमविषयत्वमविरुद्धमित्याह। सुखव्यहमित्यादिना। उक्तन्यायेनात्मप्रतीतेः सिद्धत्वात्तन्निपन्नेतस्मिन् द्वैतप्रतिषेधस्य सु
करत्वेति फलितमाह। यदा वेति। नुकेवलमारोपितविशेषणो विशेष्यस्यात्मनः स्वरूपस्फुरणस्यासिद्धत्वादेवन शास्त्रेण कर्तव्य
त्वमनुवादत्वेनाप्रामाण्यप्रसंगाच्चेवमित्याह। अकृतेति। स्फुरत्यात्मनि द्वैतनिषेधकत्वेपि शास्त्रस्य फलाभावादप्रमाण्यं तदवस्थ
मित्याशंक्याह। अविद्येति। प्रतिषेधशास्त्रादपनीतप्रतिबंधस्वरूपावस्थानं फलतीत्यर्थः। निःशेषदुःखनिवृत्तिर्निरतिशयानंद
वाप्तिश्चपरं श्रेयोनस्वरूपावस्थानमित्याशंक्याह। स्वरूपेति। इति प्रसिद्धमोक्षशास्त्रेप्वितिशेषः। द्वैतनिवर्तकत्वे शास्त्रस्य कारक
त्वस्यादित्याशंक्याह। सुखित्वादीति। असुखित्वादेः स्वाभाविकत्वादात्मनि स्फुरति अस्फुरणमनुपपन्नमित्याशंक्य भ्रमविषय
शुक्तीदमंशादिश्च स्वाभाविकोपि रजतादिभेदो दोषमाहात्म्यात् घष्यानप्रतिभातीति तथाऽसुखित्वाद्यविद्याप्रभावादात्मनि स्फुरत्य
पिसुखित्वाद्यध्यासविरोध्यसुखित्वादिरूपेणास्फुरणमविरुद्धमित्याह। आत्मेति। विपक्षे भ्रमानुपपत्तिरित्याह। यदीति। उक्तमर्थ
संक्षिप्य निगमयति। तस्मादिति। असुखित्वादेरकल्पितत्वमसिद्धमाशंक्य निरस्यति। यतइति। अस्थूलमशोकांतरमित्यादिवा
क्यं शास्त्रशब्देनोच्यते उक्तं षड्विधतात्पर्यसमर्पितमाह। सिद्धेत्विति। अहमादिपदानां व्युत्पत्त्यभावेपि सिद्धमेव शास्त्रस्य प्रामाण्य
मभावबोधनं व्युत्पन्नेन तत्पदसंसृष्टैः स्थूलादिव्युत्पन्नपदैः स्वाभाविकद्वैताभावबोधनेनाध्यस्तनिवर्तकत्वादिति सूत्रार्थः
यद्युक्तं निरोधाद्यभावस्य परमार्थतेति तदयुक्तं सामान्यविशेषात्मकं वस्तु नानारसमिति मते निरोधादेः सुसाधत्वादित्याशंक्या
ह। भावेति। भावाः व्यावृत्ताः विशेषास्तेच व्यभिचारित्वादसंतो रज्जुसर्पवत् अद्वयमनुवृत्तं सामान्यं विशेषाकारेण वस्तु स्व
तेः सामान्याकारेण चेतादृशेनायमव्यावृत्तानुगतपूर्णसन्मात्रचिदेकतानः सन्नात्मैवमूढैर्मोहमाहोस्मात् कल्प्यतेन वस्तु

तः सामान्यविशेषभावोऽस्ति परस्परानाश्रयादित्यर्थः। विशेषाणामसत्त्वे कथं सत्त्वेन व्यवहारः स्यादित्याशंक्य सन्मात्रतादात्म्ये
न कल्पितत्वात्तेषां सत्त्वेन व्यवहारोपपत्तिरित्याह। भावा इति। अनुगतेन सदाकारेण कल्पिताः सत्त्वव्यवहारं भजंतीति शेषः।
सामान्यविशेषभावस्य कल्पितत्वादद्वयंचैकरसत्वे वस्तुनः सिद्धे निरोधादेः दुःसाधनत्वमुचितमिति फलितमाह। तस्मादिति।
श्लोकतात्पर्यं दर्शयति। पूर्वेति। निरोधादि सर्वविशेषाभावोपलक्षितं वस्तु वस्तुभूतमिति पूर्वश्लोकस्यार्थस्तस्य सामान्यविशेष
त्मके वस्तुनि विशेषाणां। अस्य निरोधादेः सुसाधनत्वादसत्त्वमाशंक्य तेन तस्य साधनापेक्षायां तत्प्रदर्शनपरोयं श्लोक इ
त्यर्थः। तत्र पूर्वार्द्धं गतान्यक्षराणि दृष्टान्तावष्टंभेन व्याचष्टे। यथेत्यादिना। संसृष्टरूपेणारोपितत्वेऽपि स्वरूपेणानारोपितत्वा
द्रज्ज्वाद्यस्य व्यावहारिकसत्यत्वमुक्तं यथा विद्यमानैः यमात्मा कल्प्यते न परमार्थतस्तेषां सत्यत्वमिति शेषः। कथं प्राणा
दीनां परमार्थतो ऽसत्त्वमित्याशंक्य अन्वयव्यतिरेकाभ्यां तेषां मनःस्पंदिमात्रत्वप्रतीतेर्मृषात्वं स्वप्नवदित्याह। नहीति। आ
त्मपरिणामत्वान्मनःस्पन्दनमेतत्। केनापि प्राणादिभावानां परमार्थतः सत्त्वमित्याशंक्याह। नचेति। नहि विभोरात्मनो नभो
वत्स्पन्दनं वास्तवमवकल्पते। नचलद्भावो निरवयवस्य परिणामसंभावनेत्यर्थः। प्राणादीनामात्मपरिणामत्वासंभवे फलित
माह। अचलितस्येति। अगतं चलितं यस्य तथा कूटस्थस्यैवात्मनो भासमाना भावाः न परमार्थसंतो भवितुमुत्सहंते। दृश्यत्वज
५८ डत्वादिना स्वप्नवन्मिथ्यात्वसिद्धेरित्यर्थः। एवं प्राणादिभावानां मिथ्यात्वे प्रसाध्य फलितं दर्शयन् पूर्वार्द्धाक्षराणि व्याख्यानमु
पसंहरति। अत इति। अद्वयस्य परमार्थत्वात्तदात्मना कथमात्मा कल्पितः स्यादित्याशंक्य स्वरूपेण कल्पितत्वेऽपि तस्य
संसृष्टरूपेण कल्पितत्वमिष्टमित्याह। परमार्थसत्तेति। अविद्यावशादिष्टा कल्पना न स्वभाववशादित्याह। सदेति। प्राणादी
२७ नामसत्त्वे कथं सत्त्वेन व्यवहारगोचरत्वमित्याशंक्य तृतीयपादार्थमाह। तेनेति। कल्पितानां प्राणादिभावानामधिष्ठानसत्
तयासत्त्वेन [illegible] न सत्ता अवकल्प्यते तेषामधिष्ठानापेक्षानियमाभावादित्याशंक्याह। नहीति। सर्वविकल्पनास्पदाधिष्ठाने
वस्तुन्यतेनवास्ततोऽधिष्ठानत्वमारोपितानुवेधाभावात्तदनुवेधानुसृतोऽधिष्ठानत्वमेष्टव्यं तथा च प्राणादिभावानां वस्तुतोऽस
त्त्वेऽपि सति कल्पितानां सत्त्वेन व्यवहारसिद्धिरित्यर्थः। चतुर्थपादार्थमाह। अद्वयेति। स्वेनेति विशेषणांसंसृष्टरूपेणाव्यभिचा २३
रांगीकारार्थं कल्पनाराहित्यदशायामेवाद्वयतः शिवत्वेत्याशंक्य कल्पमात्रस्याशिवत्वान्मैवमित्याह। कल्पनेति। त्रासादी
त्यादिशब्देन हर्षशोकादयो गृह्यंते यद्वा क्रममद्वयताशिवत्वे तदुपपादयति। अद्वयतेति। किं च किमिदं नानाभूतं द्वैतं आत्मत
तादात्म्येन वा सिध्यति स्वातंत्र्येण वेति विवेक्तव्यं नाद्य इत्याह। नात्माभावेनेति। इदं हि नानाभूतं द्वैतं नात्मतादात्म्येन सेद्धुम

मर्हतीति।जडाजडयोर्विरुद्धस्वभावत्वात्तादात्म्यायोगात्‌भेदादिशून्यात्मतादात्म्येन वद्वैतस्य नानात्वासिद्धेरित्यर्थः।द्वितीयं दूषयति।न
त्वेनेति।स्वेन सत्ताप्रतीत्योरन्यानपेक्षतालक्षणस्वातंत्र्येणापि नेदं द्वैतं सेद्धुं पारयति तथा स्वातंत्र्ये सत्यात्मत्वप्रसंगादनात्मनो द्वैत
त्वाघातादित्यर्थः।किंचाकिमिदं द्वैतमन्योन्यं पृथगपृथग्वेति विवक्ष्यं नाद्य इत्याह।नपृथगिति।नहि किंचिदपि द्वैतं परस्परं पृथगेव
सिध्यति पृथक्त्वस्य धर्मिप्रतियोगिरूपावच्छिन्नत्वेनान्योन्याश्रयत्वात्‌धर्मत्वस्वरूपत्वयोर्दुर्वचत्वादित्यर्थः।नापि किंचिदन्योन्यमपृथ
क्भूत्वा सिध्यति घटपटादिद्वैतानां पर्यायत्वप्रसंगाद्व्यवहारलोपापातादित्याह।नापृथगिति।अतो वास्तवाकारेण सर्वथा निरूपणासह
मेव द्वैतमिति फलितमाह।इति तत्त्वेति।यदुक्तमद्वयतात्त्वेवेति तत्र हेत्वंतरोपन्यासपरत्वं श्लोकस्य दर्शयति।कुतश्चेति।तदेव स्फुटयति
नानाभूतमित्यादिना।नानाभूतमित्यस्य पर्यायोपादानं पृथक्त्वमिति।तस्यैकारणत्वं प्रकटयत्यन्यस्येति।व्याघ्रचोरादाविति यावत्‌।भयका भ५
रणं भेददर्शनमद्वये वस्तुनि नास्तीत्याह।नहीति।अध्यस्तमधिष्ठानरूपेण तत्त्वतो निरूप्यमाणं असदेव भवतीत्यत्र दृष्टांतमाह।यथे
ति।प्रदीपप्रकाशेनाधिष्ठानमात्रतया समारोपितः सर्पो यदा निरूप्यते तदा नासौ तद्व्यतिरेकेणासिध्यति तथा जगदपीदमात्मरूपेण निरू
प्यमाणं नान्यत्वेन सिध्येदित्यर्थः।एवं प्रथमपादं व्याख्याय द्वितीयपादं व्याचष्टे।नापीति।कदाचिदपीति कल्पनावस्थायां प्रागूर्ध्वं चेत्यर्थः।
मो नपृथगित्यस्यार्थमाह।पृथगिति।पृथक्त्वस्यान्याश्रयत्वेन दुर्वचनत्वाद्द्वैधर्म्योदाहरणं तु प्रातीतिकं पृथक्त्वमधिकृत्य विरुद्धं।नापृथगित्या
द्विधाकरोत्य नचेति।द्वैतस्य प्रागुक्तन्यायेनासत्तान्न तदन्योन्यं वा परेणात्मना वा सहापृथग्भूत्वा सेद्धुमर्हत्यतो दुर्निरूपत्वान्न किंचिद्द्वैतं ना
स्तीति कृत्स्नविदां मतमित्यर्थः।दृष्टं हि द्वैतं भयहेतुः तदस्पृष्टं पुनरद्वैतमभयमेव वस्तु उपसंहरति।अतइति।किमिति यथोक्तमद्वैतं सर्वेषां
न प्रतीतिगोचरतामाचरतीत्याशंक्याह।वीतेति।रागादिप्रतिबंधविधुराणामेव यथोक्तमद्वैतदर्शनं न सर्वेषामित्यर्थः।श्लोकस्य तात्प
र्यमाह।तदिति।स्तुतिश्च तदुपायप्रवृत्तावुपकरोतीति शेषः।आदिपदेन सम्यक्‌दर्शनप्रतिबंधकाः सर्वदोषाः संगृह्यंते रागादिविमु
क्तायदा कदाचिदनधिकारिणामपि संभवति अतो विशिनष्टि।सर्वदेति।सदा रागादिव्यावृत्तौ विवेकं हेतुं प्रपंचयति।मुनिभिरिति।विवेके
नपदशास्त्रैर्वाक्यतात्पर्यस्य च परिज्ञानं कारणमित्याह।वेदेति।एवं सम्यग्ज्ञानाधिकारिणो साधनचतुष्टयसंपन्नमुक्त्वा तद्विषयं निरूप
२५ यति।निर्विकल्पक इति।आत्मैश्वाभ्युपेत्यत्वशंकां वारयति।उपलब्ध इति।द्विशब्दोऽस्यार्थमाह।वेदांतेति।सर्वविकल्पशून्यत्वम
नः स्फुरयितुं प्रपंचोपशम इति विशेषणं अभावत्वं बुद्धिहिपात्रस्तु द्रष्टुते हेतुहेतुमद्भावेन पुनरुक्तिं विशेषणयोर्बोधय
ति।अत एवेति।सम्यग्दर्शनाधिकारिणो दर्शितानुपसंहरति।विज्ञातेति।अनधिकारिणो दर्शयन्‌ वैशेषिकादेवैनाशिकादिशा
स्त्राभिज्ञानामपि तदंतर्भावं सूचयति।नान्ये इति।मिथ्याज्ञानप्रचयसंस्काराद्द्वैतार्थतास्त्यर्थवृत्तीनां पंडितानामपि नाद्वैतप्र
त्ययदार्ढ्यं सिध्यतीत्याह।तस्मादिति।शास्त्रादद्वैतमवगम्य स्मृतिसंततिं कुर्वतो लोकानुवर्तनेऽपि विधिनियममाह।आदे

तेति। तस्मादित्यस्यार्थमाह। यस्मादिति। एवमिति निर्विकल्पत्वादिपरामर्शः। विदित्वा ज्ञात्वेतोऽवगम्येत्यर्थः। अद्वैतेनावगतिद्वार्थं
स्मृतिसततिकर्तव्यताया नियमविधिमभ्यनुजानाति। अद्वैतेति। अद्वैतेनेत्युत्तरार्द्धं विभजते। तत्त्वेति। जडसदृशस्य कथं लोका-
चरणमबुद्धिपूर्वकारित्वादित्याशंक्याह। सर्वलोकेति। लौकिकव्यवहारानतीत्य विदुषो जडवदाचरणं कीदृशमित्यपेक्षायां चतुर्थ-
पादमनूद्य तात्पर्यमाह। जडवदिति। एवंविधोऽहमित्यात्मानं विद्याभिजनादिभिरख्यापयन् जडवदेव विद्वान् लोकमाचरेत् इति योजना।
ननु परापरदेवतयोः स्तुतिपूर्वकप्रणामस्य श्राद्धादिक्रियायाश्च कर्तव्यतयाप्रतिबंधात्कथं विदुषो जडवदाचरणमिति तत्राह। निस्तु-
तिरिति। तथापि जीवनात्क्वापि स्थातव्यत्वादाश्रममुद्दिश्य प्रवृत्तेरावश्यकत्वात्कुतो जडसादृश्यमित्याशंक्याह। चलेति। चलं चा-
चलं च चलाचले। चलेते निकेतो यस्याश्रयः स तथेति यावत्। तथापि कौपीनाच्छादनाशनपानादिदेहस्थितिप्रयोजकापेक्षया प्रवृत्तिर्ध्रौ-
व्यात्कथं विदुषो जडतुल्यतेत्याशंक्याह। यतिरिति। आकांक्षापूर्वकं पूर्वार्द्धाक्षराणि व्याचष्टे। कयेत्यादिना। यदा आत्माभिमानवतस्तत्तल्लभमस्तु २८
वर्तमानस्य कथमिदं विशेषणमित्याशंक्याह। स्वकेति। पारमहंस्यपारिव्राज्यं प्रतिपत्तुमशक्यमप्रामाणिकत्वादिति चेन्मैवं श्रुतिस्मृ-
तिसिद्धत्वादित्याह। एतमिति। विदित्वेत्यापातिकवेदनं व्युत्थानहेतुत्वेनाम्नाते। तस्मिन्नेव परस्मिन्वस्तुनि विषयांतरेभ्यो व्यावृत्ता
बुद्धिरेषामिति तन्निष्ठा। तदेव परं वस्तु आत्मा निरूपचरितं स्वरूपं येषां ते तथोक्ताः। ते तस्मिन्नेव च परस्मिन्नात्मनि निष्ठा निश्चयेन स्थितिर्येषां
ते तत्परायणा इत्याह। तन्निष्ठा इति। तदेवात्मभूतं परं वस्तु परमयनं परा गतिर्येषां ते तथेत्याह। तत्परायणा इति। आदिशब्देन सर्वकर्माणि मन-
सेत्यादि वाक्यं गृह्यते। कदा पुनः स्थूलदेहो विदुषो निकेतो भवतीत्यत्राह। यदेति। अविवक्षिते हि कालविशेषे विवक्षितमवहा-
रं निमित्तीकृत्यात्मस्थितिमुक्तविशेषणावतो विस्मृत्याहंकारममकारपरवशो यदा विद्वान्वर्तिष्यते तदा इति योजना। स्वभा-
वतस्त्वचलमात्मस्वरूपमेवास्य निकेतनं चलं पुनः शरीरमुपदर्शितविस्मृत्युपचारेणेति निगमयति। सोयमिति। अत्र विदुषो विशे- २
षाभ्यावर्त्यकीर्तयति नपुनरिति। चतुर्थपादार्थमाह। सर्वेति। अहमेव परं ब्रह्म न मत्तोऽन्यदस्ति किंचिदिति स्मृतिसंततिक-
करणमपि न कालविशेषनियतं किंतु निरंतरं तदेव कर्तव्यमित्याह। तत्त्वमिति। आध्यात्मिकं शरीरादि कल्पितं तत्त्वमधिष्ठानमा- २४
त्रं दृष्ट्वा बाह्यतो देहाद्बहिः स्थितं पृथिव्यादि च कल्पितत्वेनावस्तुत्वादधिष्ठानमात्रमेवेत्यनुभूय स्वमपि दृष्ट्वा परमार्थवस्तुस्व-
७४ भावमापन्नस्तत्त्वाद्वाचलेतः बाह्येभ्यो विषयेभ्यो व्यावृत्तबुद्धिस्तस्मिन्नेतत्त्वे परमार्थभूते प्रतिष्ठितः स्याद्दर्शननिष्ठः स्यादित्यर्थः।
पृथिव्यादेर्देहादेश्च प्रत्येकं परमार्थत्वसंभवे कथमद्वैतनिष्ठासिद्धिरित्याशंक्य व्याचष्टे। बाह्यमित्यादिना। किं तदुभयोस्तत्त्वं
तत्राह। रज्जुसर्पवदिति। उक्तस्य विकारजातस्यासत्त्वे प्रमाणमाह। वाचारम्भणमिति। द्रष्टुरात्मनोऽपि दृश्यप्रतियोगित्वात्तुल्य-
वाचारम्भणत्वमित्याशंक्याह। आत्मा चेति। भवतु परस्यात्मनस्तत्त्वदागमवचनेन निर्देशाद्दुरूहलक्षणत्वं तथापि द्रष्टुरात्मनो यथोक्त-

रूपत्वमित्याशंक्याह। तत्त्वस्यामिति। विशेषणानि तु प्राचीनानि तत्त्वदागमोपात्तानि अपुनरुक्तानि। द्वितीयार्द्धं व्याचष्टे। तस्यैवमिति। आत्मा
रामत्वं कथमित्याशंक्य बाह्यविषयासक्तिं त्यक्त्वा प्रत्यगात्मन्येव परितृप्तत्वादित्याह। न बाह्येति। तत्त्वादप्रच्युतो भवतीत्येतद्व्यतिरेक
मुखेन व्याकरोति। चलेत्यादिना। अतत्त्वदर्शीति छेदः। आत्मविदो नाबस्वस्थितेन आत्मदर्शनमित्यत्र हेतुमाह। आत्मन इति। सति स्वरूपे
स्वरूपात्प्रच्युतेरप्रसक्तत्वात्तत्प्रतिषेधो युक्तो न भवतीत्याशंक्याह। सदेति। वस्तुनः सदैकरूपत्वे स्मृतिमुदाहरति। श्रुतिश्चेति। समदर्शिनः
ग्र५ सदैकरूपवस्तुदर्शिनः एवं पंडिता नान्ये तथेत्यर्थः। स्वरूपाच्यवने च स्मृतिं दर्शयति। सममिति। तत्र हि हि विनश्यत्स्वविनश्यंतमिति स्फु
न६ पाप्रच्यवं मुक्तेः॥ ॥इति श्रीशुद्धानंदपूज्यपादशिष्यभगवदानंदज्ञानविरचितायां गौडपादभाष्यटीकायां द्वितीयप्रकरणं समाप्तं॥ ॥
तर्कावष्टंभेन द्वैतवैतथ्यं निरूपयन्नुपरि समाप्याद्वैतमार्थिकमपि तर्कतः संभावयितुं प्रकरणांतरं प्रारिप्सुरुपास्योपासकभेददृष्टिं तावद कृ०७
पवदति। उपासनेति। देहधारणादिधर्मो जीवो भूतसंघातो कार्यकारणजाते ब्रह्मणि तदभिमानित्वेन वर्तते स प्रागुत्पत्तेरजं सर्वमित्येवं का
वच्छिन्नं वस्तु मन्यते स पुनरुपासनां पुरुषार्थसाधनत्वेनाश्रितः सन्नेव ब्रह्म प्रतिपत्स्ये शरीरपातादूर्द्ध्वमित्येवं यतो मिथ्याज्ञानवान्
वर्तिष्यते तेनासौ कृपणोऽल्पको ब्रह्मविद्भिः स्मृतश्चिंतित इत्यर्थः। प्रकरणांतरमवतारयन्वृत्तमनुद्रवति। ओंकार इति। तस्य हि निर्णये
प्रथमे प्रकरणे प्रपंचोपशमः शिवोऽद्वैत इति विशेषणैरात्मप्रतिज्ञामात्रेणाद्वितीयो व्याख्यात इत्यर्थः। द्वितीयप्रकरणार्थं संक्षिप्यानुवदति।
ज्ञात इति। तत्रैवाद्ये प्रकरणे ज्ञाते द्वैतं न विद्यत इत्यत्र प्रतिज्ञामात्रेणाद्वैताभाव उक्तः स तु द्वितीयेन प्रकरणेन हेतुदृष्टांतात्मकेन तर्केणाप्र
तिपादितो नात्र प्रतिपादयितव्यमवशिष्टमस्तीत्यर्थः। तृतीयं प्रकरणमाकांक्षापूर्वकमवतारयति। अद्वैतमिति। नैषा तर्केण मतिरापे
नेयेति श्रुतेरद्वैतं कथं तर्केण ज्ञातुं शक्यमित्याक्षिपति। तत्कथमिति। स्वतंत्रतर्कप्रवेशाविषयत्वेऽप्यस्मिन्नागमिकतर्कस्य सहकारित
यासंभावनाहेतुत्वात्तर्केणापि ज्ञातुं शक्यमिति व्यवहारोपपत्तेरिति मत्वाह। अद्वैतेति। यदि तर्केणाद्वैतं संभावयितुं प्रकरणमारभ्य
ते तर्हि किमित्युपासकनिंदा प्रथमं प्रस्तूयते। तत्राह। उपास्येति। उक्ष्यमाणविरोधादुपासकस्य तन्निंदा प्रकृतोपयोगिनीत्यर्थः
कथं तर्हि तत्र तत्राजत्वमात्मनो दर्शयंती श्रुतिर्घटिष्यते तत्राह। प्रागिति। प्रागवस्थायां सर्वमिदमजमहं चेति यस्तूपासको यतो
मन्यते अतस्तत्प्रागवस्थब्रह्मविषयो भविष्यत्यजत्वश्रुतिरित्यर्थः। कार्यस्थितस्यावस्थायां यदि ब्रह्मत्वमात्रमिष्टं तर्हि किमुपासनया प्र
सन्नमित्याशंक्याह। यदात्मक इति। इदानीमुत्पत्त्यवस्थायां जातो जाते ब्रह्मणि स्थितस्यावस्थायां वर्तमानोऽहं प्रागुत्पत्तेर्यदात्मकः सन्न
सं तदेव पुनः प्रलयावस्थायामुपासनया प्रतिपत्स्ये तत्र श्रुतेरन्यथा यादिति संबंधः। तलवकाराणां शाखायामुपास्यस्य ब्रह्मत्वनिषेध
दर्शनाच्चोपासकनिंदा युक्तेत्याह। यद्वाचेति। अनभ्युदितमनभिप्रकाशितं अभ्युद्यते अभिप्रकाश्यते उपासते वा चाविषयी
कुर्वतीत्यर्थः। आदिशब्देन यन्मनसेत्यादि गृह्यते। भेददर्शिनमुपासकमद्वैतविरोधिनं निंदित्वा संप्रति अद्वैतेन प्रतिज्ञां प्रकरोति

अत इति। जातिजन्म तद्रहितमजातिं तत्र हेतुमाह। समन्तादिति। जन्मराहित्यं साधयति। यथा नेति। अतःशब्दार्थमाह। सबाह्येति। प्रतिज्ञां
विभजते। अकृपणो ऽ ईति। तदेव व्यतिरेकमुखेन स्फोरयति। तद्धीति। दर्शनादिव्यवहारगोचरीभूतं कार्यजातं परिच्छिन्नं नाशि योऽयं ते न तदेव कृ
पणत्वात्कृपणमित्यर्थः। तच्च मिथ्याभूतमित्यत्र प्रमाणमाह। वाचारंभण (विशेष) मिति। कार्यप्रपंचमुक्त्वा तदभावरूपमकार्पण्यं प्रकटयति। त
द्विपरीतमिति। प्राप्यज्ञात्वेति यावत्। द्वितीयं पादं व्याचष्टे। तदजातीत्यादिना। सर्वात्मना साम्यं निर्विशेषत्वं गतमित्यत्र हेतुं पृच्छति। कस्मा
दिति। निर्विशेषत्वे हेतुमाह। अवयवेति। हेतुमेव प्रकटयन्नव्यतिरेकमुखेन जन्म प्रपंचयति। यद्धीत्यादिना। समन्तत इति पूर्णत्वसंकीर्तनं
द्वितीयार्धं व्याचष्टे। यथेत्यादिना। यथा रज्ज्वां सर्पभ्रान्त्या जायते तथा सर्वभ्रान्तिदृष्ट्या जायमानत्वेन भासमानमपि यथा येन प्रकारेण वस्तु
तो न जायते किंतु सर्वतो देशतः कालतो वस्तुतः पूर्णं कूटस्थमेव वस्तु तथा तं प्रकारमिति संबंधः। प्रतिज्ञावाक्ये ब्रह्मशब्देन परमात्मा प्रकृ
तः स कीदृगित्यपेक्षायामाह। आत्मा हीति। जीवभेदं जनीति तर्हि कृपणमित्याशंक्याह। जीवैरिति। यथाकाशो विभुत्वादिधर्मः स्वगतना
त्विकभेदवान् न भवति तथा परमात्मा विशेषाभावाद्यथा व्यमहाकाशो घटाद्याकाशकारेण प्रतीयते तथा परमात्मा नानाविधाकारेण जी
कारेण प्रतीतिगोचरो भवतीत्यर्थः। कथं संघातानां परस्मादुत्पत्तिरित्याशंक्याह। घटादिवदिति। यथा मृत्स्नाशाद्घटादयो जायन्ते तथा प
मात्मनो व पृथिव्यादिसंघाता कारणाज्जायते इत्यर्थः। यदात्मनो जीवादीनामुत्पत्तिरिष्टा तदा तस्यामुत्पत्तौ दृष्टान्तवचनमेतदित्याह। जाता
विति। श्लोकस्य वृत्तानुवादपूर्वकं तात्पर्यमाह। अजातीत्यादिना। प्रथमपादस्याक्षरार्थमाह। आत्मेत्यादिना। विमतः स्वगतनानात्वभेद
ऽद्वि शून्यः सूक्ष्मत्वान्निरवयवत्वादाकाशवत् न च परमाणुवादो सूक्ष्मत्वादेर्व्यभिचारस्तस्यैवासंमतत्वात् क्वचिदपि नात्विकभेदासंप्रति
३ पत्तेश्चेत्यर्थः। जीवैरित्यादि व्याचष्टे। जीवैरिति। जीवाकारेण परमात्मैवोक्तः 'क्षेत्रं चापि मां विद्धी'ति स्मृतेरित्यर्थः। उदितशब्दस्य
दुत्कार्थस्तर्हि परस्यैवात्मनः संघातरूपेणोत्पत्तेः स प्रपंचत्वं प्रसज्येतेत्याशंक्याह। अथवेति। तर्हि नात्माश्रुतेरिति न्यायविरोध
स्यादित्याशंक्याह। जीवात्मनामिति। तृतीयं पादं व्याचष्टे। तस्मादेवेति। उक्तेऽर्थे वाक्यमवतारयति। अत इति। आकाशस्यावका
शप्रदानेन घटाद्युत्पत्तौ कारणत्वं निर्विकारस्यैव दृष्टमिति द्रष्टव्यं। जातावित्यादेरर्थमाह। यदेति। अद्वैतस्य जीवसृष्टिश्रुति
विरोधं परिहृत्य तस्यैव जीवप्रलयश्रुत्या विरोधमाशंक्य परिहरति। घटादिष्विति। औपाधिकौ जीवानामुत्पत्तिप्रलयौ न
स्वाभाविकौ तथा चोत्पत्तिश्रुत्या विरोधाभाववदद्वैतस्य प्रलयश्रुत्यापि न विरोधोऽस्तीति श्लोकाक्षरव्याख्यानेन प्रकटयति। य २५
थेत्यादिना। इदानीमद्वैतस्य व्यवस्थानुपपत्त्या विरोधमाशंक्य परिहरति। यथेति। उक्तदृष्टान्तवशादेकस्मिन् जीवे सुखादिसं
न्ने सत्यपरे जीवास्तैरेव सुखादिभिर्न संयुज्यन्ते औपाधिकभेदादित्याह। तद्वदिति। श्लोकव्यावर्त्यमाशंकां दर्शयति। स
र्वदेहेष्विति। एकात्मकत्वे कस्मिन्कर्तारः सर्वे भोक्तरि चैकस्मिन्भोक्तारः सर्वे भवेयुरित्यव्यवस्थोत्तरमाह। क्रियेति। व्यव

स्थानुपपत्त्याहेतमेष्टव्यमितिवदंतंप्रत्युत्तरत्वेन श्लोकमवतारयति। नान्यत्रेतीति। किमिदमेकात्म्यं सांख्यैः किमेकस्मिन्
जीवे व्यवस्थितेन सुखादिना जीवांतराणां तद्वत्त्वं स्यादित्युच्यते किं वा सर्वोपाधिष्वात्मैक्यात्तस्य स्वरूपेण सर्वसुखादिमत्त्वे
स्यादित्यापाद्यते वा तत्राद्यं प्रत्याह। तद्वदिति। आत्मनः सर्वत्रैकत्वात्तस्य स्वरूपेण सुखादिमत्त्वमिति द्वितीयपक्षं विवक्षन्ना
शंकते। नन्विति। सर्वत्रात्मैकत्वमुक्तमंगीकरोति। बाढमिति। तदेकत्वमुपपत्तिशून्यं कथमंगीकृतमित्याशंक्याह। नन्विति
यदि सर्वत्रैकत्वं नियतमिष्यते तर्हि तत्र तत्र सुखित्वदुःखित्वे च तस्यैकस्य प्राप्नुत इति न व्यवस्थासिद्धिरिति चोदयति। यद्ये
कत्वेति। आत्मस्वरूपस्य सर्वत्रैकत्वेपि कल्पितभेदात् व्यवस्थासिद्धिरित्यभिप्रेत्य किमिदं सांख्यचोद्यं किं वा वैशेषिका
देरिति विकल्प्याद्यं प्रत्याह। नन्वेदमिति। किं चैकात्म्यं दूषयता सांख्येन तद्धेतोऽभ्युपगम्यते स च नाभ्युपगंतुं शक्यो तेन चासा
नाभावादित्याह। नचेति। प्रधानं हि कस्यचिद्भोगमपवर्गं चैकस्य विदधत्पुरुषविशेषमिष्यते तच्च पुरुषभेदाभावेनोपपद्यते तेना ४८
र्थापत्त्या पुरुषभेदः सिध्यतीति शंकते। भेदेति। अर्थापत्तेरनुदयं वदन्नुत्तरमाह। नेत्यादिना। संक्षिप्तमेवोक्तं विवृणोति। यदी
तीति। प्रधानस्य पारार्थ्यसामर्थ्यादेव पुरुषेषु कश्चिदतिशयो भविष्यतीत्याशंक्यापसिद्धांतप्रसंगान्नैवमित्याह। निर्विशेषादिति।
किं च प्रधानस्य पारार्थ्यपरं शेषिणमपेक्षते न तस्मिन् भेदमपि काक्षंति अतो न्यथाप्युपपत्तिरित्याह। अतइति। जन्ममरणादि
व्यवस्थानुपपत्त्या पुरुषभेदकल्पनमपि न युक्तं व्यधिकरणत्वादिति मत्वाह। नचेति। न केवलं प्रमाणशून्या पुरुषभेदकल्पना कि
तु प्रयोजनशून्या चेत्याह। परेति। ननु न पुरुषसत्तामात्रं निमित्तीकृत्य प्रधानं प्रवर्तते किं त्वीश्वराधिष्ठितमिति सेश्वरवादिमत
माशंक्य तस्यापि पुरुषत्वाविशेषादुपलब्धिमात्रत्वमुपेत्याह। परस्येति। वेदार्थो वेदप्रतिपाद्यमद्वैतं द्वितीयमुत्थापयति। यत्त्वि
ति। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारा नव विशेषगुणास्तेव प्रत्येकमात्मसु व्यवस्थया समवेताः स्वीक्रियंते
तेषां व्यवस्थानुपपत्त्या प्रतिदेहमात्मभेदसिद्धिरित्यर्थः। किं बुध्यादयो रूपादिवदात्मसमवायिनः किं वा संयोगाद्दिवदे
कदेशवृत्तयो नाद्यः ज्ञानादिगुणानामाश्रयस्यापि नामाश्रयसंयुक्ते सर्वस्मिन्नपर्यायेण ज्ञाततादिव्यवहारजनकत्वप्रसं
गादित्याह। तद्वदिति। द्वितीये त्वेकदेशाः सत्यो ऽसत्यो वा प्रथमे घटादिवदात्मनः सत्यैकदेशवत्त्वात्कार्यत्वादिप्रसंगः
द्वितीये कल्पितैकदेशानामेव ज्ञानादिगुणवत्त्वे आत्मनस्तु न तद्वत्त्वं सिध्यतीत्याह। स्मृतीति। स्मृतिहेतवः संस्काराः भावना
ख्यास्तेषां ग्रहणमितरेषामुपलक्षणार्थं। तेषामात्मनि समवायाभावात्परस्य सिद्धांतासिद्धिरिति शेषः। किं चात्ममनःसंयो
गात्समवायिकारणात् ज्ञानानामुत्पत्तिरिष्टा तथा च सति गृहणसमये स्मृतिर्न संभवत्येवेति नियमो नोपपद्यते गृहणाकाले
पि संयोगेनैव स्मृतिसंभवादित्याह। आत्मेति। किं चात्ममनसोः संयोगादेकस्मादेकस्याः स्मृतेः समुत्पत्तिसमये स्मृत्यंतरा
णामपि समुत्पत्तेरसमवायिकारणस्य तुल्यत्वान्न च समुद्बुद्धसंस्कारायोगपद्याद्युगपदनुत्पत्तिः तेषां तदुद्बोधस्य च

मा०भा०
आ०

त्मनिप्रतिपन्नत्वेनस्मृतिसामग्र्यंतर्भावासंभवादित्यभिप्रेत्याह।युगपदेति।किंचसमानजातीयानांस्पर्शादिमतांचपरसंबंधोदृष्टो।
यथामल्लानांमेषाणांरज्जुघटादीनांचतदुभयाभावादात्मनांमनःआदिभिःसंबंधासिद्धेर्नोक्तादसमवायिकारणात्बुध्यादिगुणो स्प०
त्पत्तिःसिध्यतीत्याह।नचेति।गुणादीनांसाजात्यस्यस्पर्शादिमत्त्वस्यवाभावविद्रव्येणसंबंधवदात्मनोमनआदिभिःसंबंधःसिध्येदिति
त्वेनेत्याह।नचेति।स्वतंत्रंसन्मात्रंद्रव्यशब्देनात्रविवक्षितंनततोभेदेनगुणादयोवेदांतिमतेविद्यंतेशुक्लःपटःखंडोगौरित्यादिसामा
नाधिकरण्यदर्शनात्द्रव्यमेवकल्पनयातत्तदाकारेणभातीत्यभ्युपगमाद्दृष्टांतासंप्रतिपत्तिरित्यर्थः।विपक्षेदोषमाह।यदिही
ति।गुणादयोद्रव्यादत्यंतभिन्नाहिमवद्विंध्ययोरिवयदिस्युःयदिह्यात्मनःसकाशादिच्छादयोऽत्यंतभिन्नाभवेयुःतदागुणादीनांद्रव्येण
तद्वदेवसंबंधानुपपत्तेरिच्छादीनांचात्मनातद्योगात्पारतंत्र्यासिद्धिरित्यर्थः।अत्यंतभिन्नानामपिसमवायसंबंधात्पारतंत्र्योपपत्ति
रितिशंकते।अयुतेति।किमिदमयुतसिद्धत्वंकिमपृथक्कालत्वंकिंवापृथग्देशत्वंउतापृथक्स्वभावत्वंमहो।संयोगविभागायोग्यत्वं
नाद्योविकल्पासहत्वात्किमिच्छाद्यपेक्षयाःपृथक्कालत्वंकिंवात्मापेक्षयाइच्छादीनामितिविकल्प्याद्यंदूषयति।नेत्यादिना।य
द्यात्मनासहापृथक्कालत्वमिच्छादीनांतदात्मनोःनादित्वात्तन्नतमहत्त्ववन्नित्यत्वंतेषामापततीत्याह।आत्मनेति।प्रसंगस्येष्टत्वमा
शंक्यनिराचष्टे।नचेति।नचापृथग्देशत्वमयुतसिद्धत्वंतंतुपटादीनांपृथग्देशानामयुतसिद्ध्यभावप्रसंगात्नचापृथक्स्वभाव
त्वमयुतसिद्धत्वंभेदपक्षपरिक्षयात्।नचसंयोगविभागायोग्यत्वमयुतसिद्धत्वंदेवदत्तस्यहस्तादीनांचायुतसिद्ध्यभावापातादि
त्याभिप्रेत्यसमवायस्यद्रव्यत्वादनन्यत्वेतावन्मात्रत्वेनतत्संबंधत्वं।व्याघातात्ततोन्यत्वेनसंबंधांतरमस्तिवानवेतिविकल्प्या
द्येस्यादनवस्थेतिमत्वाऽह।समवायस्येति।द्वितीयंशंकते।समवायइति।नवाच्यंसंबंधांतरमितिशेषः।समवायस्यनित्यसंबं
धत्वेसमवायवतांद्रव्यगुणादीनामविनष्टत्वात्भेदस्यकदाचिदप्यनुपलंभात्पृथक्प्रथानुपपत्तिरितिदूषयति।तथा
स्येति।संयोगस्यापिसमवायसाम्यंचकारेणासूच्यते।समवायस्यसमवायिभिर्गुणादीनांचद्रव्येणात्यंतभेदेहिमवद्विंध्ययोरि
रिवसंबंधानुपपत्तेस्तेषुपरतंत्रताव्यवहारासिद्धिरित्याह।अत्यंतेति।किंचेच्छादयोनात्मगुणाःउपजनापायवत्त्वात्रूपादिवत्
महाऽत्मानानित्यगुणवान्नित्यत्वात्व्यतिरेकेणदेहादिवदित्याह।इच्छादीति।नकेवलमात्मनोऽनित्यगुणवत्त्वेऽनित्यप्रसक्ति
रवदोषः।किंत्वन्यदपिदोषद्वयंदुःपरिहारमितिबोधकांतरमाह।सावयवत्वमिति। यद्यात्मनोनेच्छादि
गुणवत्त्वंतदातस्यसंबंधाभावान्मोक्षोनस्यादतोबंधमोक्षव्यवस्थानुपपत्त्याप्रतिदेहंसुखदुःखादिविशिष्टात्मभेदसिद्धि २६
रित्याशंक्याह।यथात्विति।अवस्तुत्वादविद्यायास्तत्कृतव्यवहारायोगाद्व्यवहारस्यचाभ्युपगमासिद्धिरित्याशंक्या रु
हा।सर्ववादिभिरिति।अविद्याकृतमनुष्यत्वाध्यारोपेणलौकिकवैदिकव्यवहारःसर्ववादिभिरिष्यतेतत्कृतश्चव्यव
स्थास्थीयतेतस्मादस्माकमपितथैवसर्वमविरुद्धमित्यर्थः।परमार्थेचमोक्षेकेनापिवादिनाव्यवहारोनाभ्युपगम्यते

तथा च मोक्षे परेषां व्यवहारस्यैवाभावात्तन्निर्वाहकपरमार्थिकभेदाभ्युपगमो वृथेत्याह। पारमार्थ्येति। कल्पितभेदवशादपि पूर्वोक्त
सर्वव्यवस्थासौस्थ्यात् पारमार्थिकात्मभेदकल्पना प्रमाणप्रयोजनशून्येत्युपसंहरति। तस्मादिति। अद्वैतस्य श्रुत्यादिविरोधा
भावेपि अनुमानविरोधमाशंक्यानेकांतिकत्वेनानुमानं दूषयति। रूपेति। श्लोके व्यावस्थामाशंकामाह। कथमिति। यथा आत्म
भेदवादे तद्वदनिमित्तो रूपादिव्यवहारस्तथैकस्मिन्नेवात्मन्यात्मैकपक्षे रूपादिभेदव्यवहारो नोपपद्यते तथा च विमता जीवात्म
नो भिद्यंते भिन्ननामकत्वात् भिन्नकार्यकरत्वात् भिन्नरूपत्वाच्च घटपटादिवदित्यनुमानविरुद्धमद्वैतमित्यर्थः। घटाकाशादिष्व
नैकांतिकत्वं विवक्षितं श्लोकाक्षराणि व्युत्पादयति। उच्यत इत्यादिना। शयनादिभिर्भिद्यत इति संबंधः। तत्कृतास्त्येत्यत्र नच्छेदेन
कल्पितो घटाद्याकाशभेदो गृह्यते चकारोवधारणार्थः। घटाकाशादीनामुक्तहेतुमत्त्वे पि विपक्षत्वाभावे कथमनेकांतिकत्वमित्या
शंक्याह। सर्वोयमिति। उक्तेर्थे तृतीयं पादं विभजते। न चेति। परोपाधिसंश्लेषेण घटकरकादिरूच्यते दृष्टांतमनूद्य दार्ष्टांतिकं व्या
चष्टे। यद्वेतदित्यादिना। घटाकाशादीनां विपक्षत्वाभावमाशंक्य परिहरति। नेत्यादिना। घटाकाशादेराकाशस्य विकारो वयवो वा वि
द्वैधीकारात्तत्रापि भेदस्य तात्त्विकत्वान्न विपक्षतेति श्लोकस्य व्यावर्त्यं चोद्यमुत्थापयति। नन्विति। आकाशस्य निर्विकारत्वं
निरवयवत्वं च लोकासिद्धं गृहीत्वा परिहरति। नैतदस्तीति। तत्र वैधर्म्योदाहरणद्वयमाह। यथेति। घटाकाशादेराकाशस्य
स्य महाकाशस्यावयवो न भवतीत्यत्र व्यतिरेकदृष्टांतमाह। यथा वृक्षस्येति। उक्तदृष्टांतानीदार्ष्टांतिकमाह। न तथेति। घटाका
शस्य महाकाशं प्रति विकारत्वमवयवत्वं च नास्तीत्युक्तदृष्टांतत्वेनानूद्य दार्ष्टांतिकं दर्शयन्नुत्तरार्द्धं व्याकरोति। यथेत्यादिना
अनैकांतिकत्वेनानुमानस्याप्रामाण्ये स्थिते फलितमाह। अत इति। जीवो ब्रह्मणो नांशो न विकारः अपि तु ब्रह्मैवापाद्यमनुप्रवि
ण: ष्टं जीवशब्दितमित्युक्तं तदयुक्तं ब्रह्मभिन्नत्वाज्जीवस्य रागादिमलत्वादेकत्वायोगादित्याशंक्य परमार्थतो जीवस्याविनाशि
मलवत्त्वमित्याह। यथेति। श्लोकस्य तात्पर्यमाह। तस्मादिति। घटाकाशो महाकाशः सर्वोपाशाकाशश्चेति। उपाधिनिमि
त्तो भेदस्तद्विषया बुद्धिस्तत्प्रयुक्तो रूपभेदो र्थक्रियाभेदो नामभेदश्चेति व्यवहारो न भवतीति यथोपलभ्यते तथा देहाद्युपाधिभे
दप्रयुक्तो जीवभेदस्तत्कृतो जननमरणसुखदुःखादिव्यवहारो अवस्थितो य स्मादाख्यायते तस्मात्तेनाविद्याविद्यमानेन कर्म
मवात्मनो रागादिमलवत्त्वं न वस्तुतो ऽस्तीत्येतमर्थं दृष्टांतद्वारा प्रतिपिपादयिषुर्बालादौ दृष्टांतमाह इति योजना। दृष्टांतभा
गं निदिष्टान्यक्षराणि व्याचष्टे। यथेत्यादिना। दार्ष्टांतिकभागगतानामक्षराणामर्थमाह। तथेति। यो हि प्रत्यगात्मा विज्ञाता सोपि
अबुद्धानां मलिनो भवतीति संबंधः। अबुद्धानामित्येतद्व्याचष्टे। प्रत्यगात्मेति। अविवेकिभिरध्यारोपिते पि प्रत्यगात्मनो मल
वत्त्वे मलप्रयुक्तं फलं तत्रैवास्त्वेवं भविष्यतीत्याशंक्याह। नहीति। ननु जीवो मरणानंतरं धर्मानुरोधेन स्वर्गं गच्छतीत्यत्र धर्मव

मा०भा० १४ प्रकरणाविच्छेदनार्थं प्रकरणमनुसंधत्ते। तस्मादिति। प्रकृतस्यात्मनः श्रौतत्वफलितमाह नेत्यादिना =
श्रा० शास्त्रं नरकं प्रतिपद्यते धर्माधर्मयोश्च भोगेन क्षये पुनरागत्य योनिविशेषं संभवति तत्र यावद्भोगं स्थित्वा पुनरपि परलोका
यं प्रतिपद्यते एवमिह लोकपरलोकसंचरणव्यवहारविरुद्धमद्वैतमिति तत्राह। मरणादीति। श्लोकस्य तात्पर्यमाह। पुनरपीति। आत्म
नि सर्वो व्यवहारोऽविद्याकृतो वास्तवो नेत्युक्तोऽर्थः। आत्मनो हि गगनोपमस्य गत्यादेर्वस्तुतोऽसंभवादविद्याकृतस्तस्मिन् गत्यादिरि
त्यर्थः। ननु संघातशब्दितानामुपाधीनां सत्यत्वात्तत्प्रयुक्तभेदस्यापि तथात्वादद्वैतानुपपत्तिस्तादवस्थ्यमिति चेत्तत्राह। संघाता इति।
देवादिदेहानां पूज्यत्वमन्येषां नाधिक्याभ्युपगमात्तत्सिद्धिरित्याशंक्य देहभेदेषु केषुचिद्विद्याधिक्यमूढदृष्ट्या कल्पितेति विवेकि
दृष्ट्या सर्वदेहानां पंचभूतात्मकत्वाविशेषादशेषसाम्ये वस्तुतः स्वीकृते नास्ति संघातेषु सत्त्वे काचिदुपपत्तिरित्याह। आधिक्य इ
ति। पूर्वार्द्धाक्षराणि योजयति। घटादीति। मंत्रादिरूपां मायामिंद्रजालप्रयोजकभूतां व्यावर्तयति। आविद्येति। विमता देहा न सत्या
देहत्वात्संप्रतिपन्नवदित्यर्थः। ब्रह्मादिदेहानामुत्कृष्टत्वान्नाविद्याकृतत्वमित्याशंक्याह। द्वितीयाद्वै स्याच्चक्षे। यदीत्यादिना। जीवस्या
द्वितीयब्रह्मत्वमुपपत्त्या वर्षं भेनोपपादितं। इदानीं तत्रैव तैत्तिरीयश्रुतेस्तात्पर्यमाह। रसादयो हीति। श्लोकस्य तात्पर्यमाह ख
त्मादीति। अक्षरार्थं कथयति। रसादय इति। आदिशब्देन मनोमयविज्ञानमयआनंदमयाः गृह्यन्ते खड्गादेर्यथा कोशोऽसि
दपेक्षया बहिर्भवंति तद्वदेते पंचकोशा व्यपदिश्यन्ते। तत्र हेतुमाह। उत्तरोत्तरस्येति। पूर्वपूर्वस्यान्नमयादेरुत्तरोत्तरप्राणमया
पेक्षया बहिर्भावात् ब्रह्म सर्वान्तरं प्रतिष्ठाभूतमपेक्ष्यानंदमयस्यापि बहिर्भावाविशेषाद्विशिष्टं पंचानामपि कोशत्वमित्यर्थः। अ
वशिष्टान्यक्षराणि व्याचष्टे। आरभ्येत्यादिना। तत्र जीवशब्दप्रवृत्तिं व्युत्पादयति। सहीति। विशिष्टं जीवशब्दार्थमाकाशादा
व्यावर्तयति। कोऽसावित्यादिना। मनुष्योऽहं प्राणोऽहं प्रमाताहं कर्ताहं भोक्ताहमिति पंचानां यदेकं स्वरूपमनुगतं प्रत्यक्चैतन्यं तद्ब्रह्मैवे
ति जीवपरयोरैक्यं तैत्तिरीयश्रुतेस्तात्पर्यमुक्त्वा तत्रैव बृहदारण्यकश्रुतेरपि तात्पर्यमाह। द्वयोरिति। मधुब्राह्मणोक्तद्विपर्याये पुअ
धिदैवाध्यात्मविभक्तयोः स्थानयोरयमेव स इति परं ब्रह्म प्रत्यग्भूतं प्रकाशितमतोऽस्मिन्बृहदारण्यकश्रुतेरपि ब्रह्मात्मैक्ये तात्पर्य
मित्यर्थः। तत्र दृष्टांतमाह। पृथिव्यामिति। न केवलमैक्यं तैत्तिरीयश्रुतेरेव तात्पर्यं किंतु बृहदारण्यकश्रुतेरपीत्याह। किंचेति। अधिदै
दाव वं पृथिव्यां धर्मात्मं च शरीरे तेजोमयोऽमृतमयः पुरुषः तस्य प्रधानो। भूतसमयो। मरणधर्मा पुरुषः पूर्णः पृथिव्यादौ शरीरे चांतर्गतो यो विज्ञा
ला४ तासपरत्वात्मा तेन सविज्ञानं सर्वं पूर्णमपरिच्छिन्नं ब्रह्मैवेति परं ब्रह्म प्रकाशितमिति संबंधः। अपवादावस्थायामध्यारोपासंभवात्तद्द्वयो
र्द्वयोरैक्यमुच्यते तत्राह। आ द्वैतक्षयादिति। द्वैतक्षयपर्यंतं ब्रह्मप्रकाशितं द्वयोर्द्वयोरिति पुनरनुवादमात्रमित्यर्थः। मधुज्ञानेन मध्वेव ब्र २७
कारान्तेन ब्रह्मेत्याशंक्य मधुज्ञानशब्दार्थं व्युत्पादयति। केत्यादिना। शब्दस्य कचिदाश्रितत्वं रूपवदनुमीयते तच्च शब्दाधिकरणं सामा
न्यतः सिद्धं पारिशेष्यादाकाशं मिस्युत्तेराद्ये व्याचष्टे। कामिवेत्यादिना। इतश्चैकत्वे श्रुतीनां तात्पर्यमित्याह। जीवात्मनोरिति। अभेदेन
१४ मिति सिद्धमिति तच्चेल्लाघवादेकमेवेति गम्यते तथा च बहिरंतश्चैकमेवाकाशमनुमानप्रमाणाधिगतं तथाधिदैवमध्यात्मं च ब्रह्मप्रत्यग्भूतं सिद्ध ७
द

कृत्स्नवेदवृत्त्यैव भवतीत्यादिना । कृत्स्नभावफलवादेनेत्यर्थः । यत्स्वशास्त्रे तद्विधेयमित्यादिन्यायादेकत्वदर्शने फलवादोपपत्त्युपलंभा
देकत्वं प्रकृतत्वाद्विवक्षितमिति भावः । यत्त्वानेकत्वं सर्वप्राणिसाधारणं तन्निंद्यमानं दृश्यते यन्निंद्यं तत्तन्निषिध्यते इति न्यायात्त्रा
शं० नात्वं शास्त्रार्थो न भवतीत्याह । नानात्वमिति । तदुभयात्मकत्वप्रसक्तं नानात्वनिंदनं चैकत्वमेव हि शास्त्रीयमभ्युपगमे सति युक्तमिति
फलितमाह । तदेवं हीति । श्लोकार्थं संगृह्य व्याचष्टे । यदीति । अनन्यत्वाभावशंकां व्यावर्त्यैकरसत्वं दर्शयति । अभेदेनेति । तत्रशास्त्र
नेशास्त्रेणेति तत्स्वरूपमादाय व्याख्येयं शास्त्रेणाभेदवेदनेन फलवादेनेत्यर्थः । व्यासपराशरादिभिश्च वेदार्थं व्याचक्षाणैरेकत्वेन
यते वासुदेवः सर्वमिति स महात्मा सुदुर्लभः । अहं हरिः सर्वमिदं जनार्दनो नान्यत्ततः कारणकार्यजातमित्यादिवाक्यैरित्याह ।
व्यासादिभिश्चेति । द्वितीयार्धं विभजते । यद्वेति । तन्निंद्यत इति यच्छब्देनोपक्रमाद्धृत्यं । अविद्यामोहितात्मानः पुरुषा भिन्नदर्शि
नः । किं तेन न कृतं पापं चौरेणात्मापहारिणेत्यादिवाक्यैर्व्यासादयो विद्वेतदर्शनं निंदंतीत्याह । अन्यैश्चेति । एवमनेकत्वदर्शनस्यानि
दितत्वेन निषिद्धत्वान्नानेकत्वं शास्त्रीयमित्युक्त्वा चतुर्थपादार्थमाह । यद्वेति दिति । विषयभेदेन प्रशंसनं निंदनं चेत्यर्थः । एवं हीति द्वैत
स्याशास्त्रीयत्वमद्वैतस्यैव तात्पर्यगम्यत्वमित्यंगीकारे सतीत्यर्थः । भेददृष्टीनामपि न्यायत्वाद्विशेषात् भेददर्शनानिंदस्य कुतोन्या
यत्वमित्याशंक्याह । याश्चेति । याः वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः । सर्वास्ताः निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः इति
१२म मनुवचनादित्यर्थः । न्यायविशेषादविभेदवादानामसमंजसत्वमित्याह । निरूप्यमाणा इति । वैशेषिकवैनाशिकादिकल्पनाभेदा
नुसारिण्यो भेदस्य परस्पराश्रयतादिदोषदूषितत्वेन प्रमीयते तेन भेदवादानामुत्प्रेक्षामूलानामसमंजसत्वमित्यर्थः । न भेदवादानामु
त्प्रेक्षामात्रमूलत्वं श्रुतिमूलत्वमित्याशंक्योपरिहरति । जीवात्मनेति । उत्पत्तिः व्युत्पत्तिः सम्यक्ज्ञानं तद्धेतुरुपनिषदः श्रवणस्य
पक्षया प्राकृ प्रवृत्तकर्मकांडेन मृत्यरापरमेनानात्वमुक्तं तद्वोदनं प्रवतीति भविष्यद्वस्ता तं दुलेखोदनत्ववत् गौणमेव न मुख्यमभे
दार्थत्वं श्रुतेर्दृश्यते भेदस्यापूर्वत्वपुरुषार्थत्वयोरभावादित्यर्थः । श्लोकव्यावर्त्यशंकामाह । नन्विति । न केवलमस्माभिरुत्प्रेक्षि
तमिदं किंतु श्रुत्यापि दर्शितमित्यपेरर्थः । भेदं वदंत्याः श्रुतेस्तात्पर्यलिंगमभ्यासं सूचयति । अनेकश इति । कर्मकांडेनुत्तत्कामे
नाभेदेन नियोज्यभेदसिद्धावपि कथं जीवपरयोर्भेदः सिध्यति परस्परत्रानुकृत्वादित्याशंक्याह । परश्चेति । हिरण्यगर्भः समवर्त
तेति प्रकृते हिरण्यगर्भः सर्वनाम्नापरामृश्यते स हीमां पृथिवीं द्यामेधं तं यान्नन्यथागुरुत्वात्पारवस्थानायोगात् न च हिरण्य पि०
गर्भातिरिक्तमीश्वरं परे वृध्यंते मंत्रवर्णेश्च परः प्रकीर्तितः इति संबंधः । कर्मकांडार्थं ज्ञानकांडेनापबाध्य ज्ञानकांडार्थस्यैव
एकत्वस्यासामंजस्यमवधार्यमित्याशंक्य बाध्यबाधकभावनिर्धारणे कार्यकारणानवधारणान्नैवमित्याह । तत्रेति । श्लोका
कारेरुत्तरमाह । अत्रेत्यादिना । पृथक्त्वस्यागौणत्वप्राप्तमुक्तमेव दृष्टांतमाह । महीकाशेति । तत्रैव श्लोकसूचितमुदाहरणमाह ।

खं१

यथेति। मुख्यमहीत्यादिमाचष्टे। नहीति। भेदस्यापूर्वत्वाभावान्नवाक्यानां तत्परत्वं तत्परात्तत्परयोश्च तत्परं वाक्यं बलवदिति न्यायादखंड
वाक्यार्थस्यैव सामंजस्यमित्यर्थः। अद्वैतवाक्यानामपि कथमद्वैते तात्पर्यमित्याशंक्यापूर्वार्थत्वादुपपत्तिमत्त्वाच्चेत्याह। इहैवेति
अद्वैततावन्मानांतरागोचरत्वादपूर्वमेकमेवाद्वितीयमिति प्रागवस्थायां ब्रह्माद्वितीयं श्रुतं तदेवेदं सृष्ट्वा तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेर
नुप्रविष्टं जीवो भिद्यते तेन जीवस्य ब्रह्मता संभवतीत्युपपत्त्यापि श्रुतेरद्वैतार्थत्वं गम्यते सृष्ट्यादिश्रुतीनामद्वैते तात्पर्यं न सृष्ट्यादावित्यनंतर
५श्रुते मेव वक्ष्यते तस्मादद्वैते तात्पर्यान्न द्वैतस्यैव तात्त्विकतेत्यर्थः। न केवलमुपपन्नैरेवाद्वैते श्रुतेस्तात्पर्यं किंतु नवकृत्वोभ्यासादपीत्याह। तत्त्वमिति।
भेददृष्टेरपवादाच्च श्रुतेरद्वैते तात्पर्यं प्रतिभातीत्याह। अन्योसाविति। आदिशब्देनाद्वैतवादीनि द्वैतनिषेधीनि च वचनांतराणि गृह्यंते। एकत्वमे
व प्रतिपादयिषितमिति पूर्वेण संबंधः। एकत्वे श्रुतितात्पर्ये सिद्धे तृतीयपादावष्टंभेन फलितमाह। अत इति। श्लोकस्य साध्याहारं व्याख्यानां
तरमा[illegible]ह। अथवेत्यादिना। सृष्ट्यादिश्रुतिषु शब्दशक्तिवशादेव सृष्ट्यादिभेददृष्टेरद्वैतानुपपत्तिरित्याशंक्याह
मृल्लोहेति। सृष्ट्यादिश्रुतीनां स्वार्थनिष्ठत्वमुपेत्य व्यावर्त्यं चोद्यमुत्थापयति। नान्यथेति। तासां स्वार्थनिष्ठत्वाभावान्निरवकाशं चोद्यमिति प
रिहरति। मैवमिति। परिहृत्य चानेदं चोद्यं सावकाशमिति नेत्याह। पूर्वमपीति। यदि प्रकृतोत्पत्त्यादिश्रुतिभ्यः सकाशादुपक्रमोपसंहारैकरू
प्यं तात्पर्यलिंगमाकृष्य द्वाभ्यामपि सृष्ट्यादिश्रुतेः स्वार्थपरत्वं परिहृतं तर्हि पुनरुपन्यासो वृथा स्यादित्यध्याहृत्याशंकते। अत एवेति। उत्प
त्त्यादिश्रुतीनां मिथ्यासृष्टिपरत्वं पूर्वमुक्तमिह तु तासां ब्रह्मात्मैक्ये तात्पर्यप्रतिपादनेच्छया पुनरुपन्यासः सिध्यतीत्युत्तरमाह। इह पुनरिति
पादत्रयगताक्षराणि योजयति। मृदित्यादिना। यः शब्दशक्त्या प्रतीयते न स श्रुत्यर्थो भवति किंतु तात्पर्यगम्यस्यैव श्रुत्यर्थतेत्यत्र दृष्टांत
तमाह। यथेति। वागादीनां प्राणानामहं श्रेयानहं श्रेयानिति मिथः संघर्षः संवादस्तत्राख्यायिका श्रूयते नासौ श्रुत्यर्थो भवति वागादीना
मचेतनत्वात्तथा सृष्ट्यादिश्रुतिरपि न स्वार्थे तात्पर्यवतीत्यर्थः। उदाहरणांतरं सूचयति। वागादीति। देवासुरसंग्रामे देवास्तावदसुरानभिभवि
तुमुपचक्रमिरे वागादींश्चोद्गातृत्वेन वव्रिरे तांश्च वागादीन् कल्याणासंगजेन पाप्मनासुरा विविधुरित्याख्यायिका च न यथाश्रु
तार्था वागादीनां वागभावेनोद्गातृत्वासामर्थ्यात् किंतु असुरैर्धर्षितत्वात्प्राणोत्क्रांतौ देहपातप्रसिद्धेश्च प्राणश्रेष्ठो भवतीति प्राणवैशि
ष्ट्यनिश्चये बुध्यवतारस्योपायत्वेन सा कल्पिता। तथैव प्रकृतेपि सृष्ट्यादिश्रुतेः स्वार्थे तात्पर्याभावात्तत्कार्यस्य तद्व्यतिरेकेणाभावात्तदेवा
स्तीत्यद्वैतबुध्यवतारोपायत्वेन सृष्ट्यादिप्रक्रिया कल्पितेत्यर्थः। देवैः शब्दप्रयोगाच्चेतनत्वं वागादीनामिति मुख्यार्थत्वे संवादादिश्रवणा २८
स्यात्तोऽसिद्धमुदाहरणमिति शंकते। तदपीति। संवादविसंवादयोरस(ता)तोः श्रुतेर्थे प्रामाण्यमर्थवादानामित्यंगीकारादविरोधापेक्षमेवा
र्थवादप्रामाण्यमिह तु परस्परव्याहतिदर्शनान्न प्रामाण्यमिति परिहरति। न शाखाभेदेष्विति। प्राणादीत्यादिशब्देन मुख्यप्राणातिरिक्ता वागा
दयो गृह्यंते उक्तमेव समाधानं व्यतिरेकमुखेन विवृणोति। यदीहेति। कश्चिद्विवदमानानां प्राणानां स्वरूपमेव निर्णेतुमशक्तानां प्रजापतिमुपग

तानांमस्मिन्नुत्क्रांते शरीरमिदं पापिष्ठतरमिव तिष्ठति स वः श्रेष्ठो भवतीति तेनोत्क्रांतो प्रवासः श्रूयते कश्चित्तु स्वातंत्र्येण यस्मिन्नुत्क्रांते श
रीरमिदं पतति स नः श्रेयानित्यालोच्य प्रवासो व्यपदिश्यते क्वचित्तु नः वाक्चक्षुःश्रोत्रमनांसि इति मुख्यप्राणातिरिक्ताश्चत्वारः श्रूयंते।
क्वचित्त्वगादयोपीत्येवं विरुद्धानेकप्रकारप्राणसंवादश्रवणमस्तीत्याह। श्रूयत इति। प्राणसंवादश्रुतीनां मिथो विरोधान्नास्ति स्वार्थे प्रमाण
मित्युपसंहरति। तस्मादिति। उक्तदृष्टांतानुरोधादुत्पत्तिवाक्यान्यपि न विवक्षितार्थानि क्वचिदाकाशादिक्रमेण सृष्टिः क्वचिदग्न्यादिक्रमे
ण क्वचित्प्राणादिक्रमेण क्वचिदक्रमेणोत्पत्त्येवं परस्परपराहतिदर्शनादित्याह। तथेति। प्रतिकल्पं सृष्टिभेदस्य दृष्टत्वादुक्तश्रुतीनां अपि प्र
तिसर्गमन्यथात्वाद्व्यवस्थया यथार्थवत्त्वं स्यादिति शंकते। कल्पेति। सिद्धे प्रामाण्ये व्यवस्थाकल्पनं तदेव नाद्यापि सिद्धमित्युत्तरमाह। नेत्या
दिना। तासां प्रयोजनवत्त्वं त्वयापि स्वीकृतमित्याशंक्याह। यथोक्तेति। प्रयोजनान्तराभावं प्रकटयति। नहीति। प्राणादिभावप्राप्तये ध्यानार्थं
प्राणादिसंकीर्तनमिति शंकते। तथात्वेति। तं यथा यथोपासते तदेव भवतीति श्रुतेर्न्यायसाम्यात्कलहादिध्यानात्तत्प्राप्तिः फलं स्यात्तच्चानिष्ट
मिति परिहरति। नेत्यादिना। प्राणसंवादश्रुतीनां प्राणवैशिष्ट्यावबोधावतारार्थत्वमुपपाद्य दार्ष्टांतिकमुपसंहरति। तस्मादिति। उत्पत्त्यादिश्रु
तीनामुत्पत्त्यादिपरत्वाभावे फलितं चतुर्थपादावष्टंभेन स्पष्टयति। अन इति। उत्पत्त्यादिश्रुतिविरोधमद्वैते परिहृत्योपासनविध्यनुपपत्तिवि
रोधं परिहरति। आश्रमा इति। आश्रमिणो वर्णिनश्च कार्यब्रह्मोपासकाः हीनदृष्टयः कारणब्रह्मोपासका मध्यमदृष्टयः अद्वितीयब्रह्मदर्श
नशीलास्तूत्तमदृष्टयः एवमेतेषु त्रिविधेषु मध्ये मंदानां मध्यमानां चोत्तमदृष्टिप्रवेशनार्थं दयालुना वेदेनोपासनोपदिष्टा तथा चोपासनानु
ते॥ ष्ठानद्वारेणोत्तमामेकदृष्टिं क्रमेण प्राप्यात्मन्येवांतर्भविष्यंतीत्यर्थः। श्लोकव्यावर्त्यामाशंकामाह। यदीति। तस्यैव परमार्थतः सत्त्वप्रमाण
माह। एकमेवेति। द्वैतप्रतीतेर्मिथ्याद्वैतविषयत्वेनाविरोधमाह। असदिति। अद्वैतस्यैव वस्तुत्वे ध्यानविधिविरोधमाह। किमर्थेति। उपासनोप
देशमेव विशदयति। आत्मेति। तत्र हि निदिध्यासितव्य इत्युपासनोपदिश्यते य आत्मेत्यादौ तु स विजिज्ञासितव्य इति ध्यानविधिः स कथमित्यत्र
सन्नाद्वेन शमादिमानधिकारी परामृश्यते अद्वैतस्यैव वस्तुत्वे कर्मविधिविरोधोऽपि प्रसरतीत्याह। कर्मणि चेति। किमर्थान्युपदिष्टानीति
संबंधः अद्वैताधिकारिणोऽधिकार्यंतरं प्रति विधिद्वयस्यावकाशमिति परिहरति। अपि चेति। तत्रेत्युपासनोपदेशः कर्मोपदेशश्च गृह्यते।
तदेव कारणमक्षरयोजनया प्रकटयति। आश्रमा इति। आश्रमशब्देनाश्रमिणो गृह्यंते वर्णिनस्तु कथं गृह्येरन्नित्याशंक्याह। आश्रमेति।
शूद्रांतव्यावर्त्यत्रैवर्णिकानामेव ग्रहणार्थं मार्गगा इति विशेषणं। त्रैविध्यमेवाकांक्षाद्वारा स्फोरयति। कथमित्यादिना। कार्यब्र
ह्मविषयत्वान्निकृष्टत्वं मध्यमत्वं कारणब्रह्मविषयत्वादुत्कृष्टमद्वैतविषयत्वादिति द्रष्टव्यं। एवं पूर्वार्द्धं व्याख्यायोत्तरार्द्धं व्या
करोति। उपासनेति। कर्मोपदेशस्यापि तदर्थत्वमाह। कर्माणि चेति। व्यावर्त्यामाशंकां दर्शयति। नचेति। वेदेनोपासनाद्युपदेशो
मंदानां मध्यमानां च कथमनुग्रहः सिध्यति। इत्याशंक्याह। मार्गगा इति। आनुमुरित्युपासनोपदिष्टा कर्माणि चेति पूर्वेण संबं
धः उपास्यं ब्रह्मैव न भवतीति प्रतिषेधान्मंदमध्यमदृष्टिविषयत्वमुपासनस्य प्रतिभातीत्याह। यन्मनसेति। अद्वैतदृष्टीनां

सं०भा०
श्रा०

तु वर्णाश्रमभेदाभिमानाभावाद्देवनोपासनं कर्म वा संभवतीत्याह। तत्त्वमसीति। अद्वैतदर्शनस्योपासनादिविरोधाभावेपि मतांत-
रैर्विरोधोस्तीत्याशंक्य तेषां भ्रांतिमूलत्वान्मैवमित्याह। स्वसिद्धांतेति। श्लोकस्य तात्पर्यं वक्तुं भूमिकां करोति। शास्त्रेति। तद्व्याख्या-
त्वादित्यत्र तच्छब्देन शास्त्रोपपत्ती गृह्येते। द्वैतदर्शनस्य मिथ्यादर्शनत्वे हेत्वंतरपरत्वमवता। इति स्य श्लोकस्य दर्शयति। इतश्चेति। इतः
शास्त्रार्थमेव दर्शयति। द्वैतिनामिति। आदिशब्देन मदमानादयो गृहीताः स्वीयं स्वीयं सिद्धांतं व्यवस्थापयितुं तत्त्वज्ञानमधिकृत्य प्र-
वृत्तानां वादिनां कुतो दोषास्पदत्वमित्याक्षिपति। कथमिति। श्लोकाक्षरयोजनया परिहरति। स्वसिद्धांते मा। निश्चयमवस्फोरयति। दिनाय
एवमपि। रागास्पदत्वेपि तेषां दोषास्पदत्वं कथमित्याशंक्याह। प्रतिपक्षमिति। उत्तरार्द्धं विभजते। स्वसिद्धांतेति। यद्विवादिनां प्रत्येकं स्व-
सिद्धांतत्वेनोपसंगृहीतं दर्शनं तन्निर्धारणार्थमन्योन्यं वादिनो विरोधमाचरंते। हृदयं तेन च तेरद्वैतदर्शनं विरुध्यमानमध्यवसायते। प-
क्षास्तु स्वकीयकरचरणादिभिराघाते कदाचिदाचरितेपि द्वेषो नोपजायते परबुद्ध्यभावात्। तेष्वद्वैताभिमानिभिरुपद्रवेषु कृतेपि नाद्वैत-
दर्शिनस्तेषु द्वेषो जन्यते सर्वानन्यत्वात् परबुद्ध्यभावादित्यर्थः। अद्वैतदर्शनस्य सम्यग्दर्शनत्वं प्रतिज्ञातं कथं प्र[...] दर्शितं वा प्रक्रिय-
याप्रतिपन्नमित्याशंक्याह। एवमिति। द्वैतपक्षैरद्वैतपक्षस्य विषयहारकैर्विरोधाधिगम्यमानेकुधमविरोधवोवायुक्तिरित्याशंक्य स्वमतपर्या-
लोचनया तावदविरोधमाह। अद्वैतमिति। मिथ्याभूतेन द्वैतेनाद्वैतस्याविरोधेपि परमार्थभूतेन विरोधः स्यादित्याशंक्य तथाविधं द्वै-
तमेव नास्तीतिमत्वाह। तेषामिति। द्वैतिनां परमार्थेनापरमार्थत्वेन च द्वैतमेव व्यवहारगोचरीभूतं तच्च संप्रतिपन्नद्वैतवन्मिथ्यात्वे-
न व्यवस्थितेनाद्वैतेनाद्वैतस्याविरोधः शंकाशंको भवतीत्यर्थः। श्लोकप्रतिषेध्यं प्रकरोति। केनेति। श्लोकाक्षराणामर्थमाच- श्र
क्षाणो हेतुमाह। उच्यत इति। द्वैतस्याद्वैतकार्यत्वे प्रमाणमाह। एकमेवेति। श्रुतिप्रामाण्यात् द्वैतस्याद्वैतकार्यत्वावगमात् का-
व र्यस्य कारणाद्भेदेन सत्त्वनिषेधात्तत्सत्यमित्यवधारणाच्चाद्वैतदर्शनं द्वैतदर्शनेन न विरुद्धमित्यर्थः। अद्वैतदर्शने द्वैतदर्शनेऽवि-
रुद्धमित्यत्रैव युक्तिमाह। उपपत्तेश्चेति। तामेवोपपत्तिं संक्षिप्य दर्शयति। स्वप्नवितेति। सुषुप्त्याद्यवस्थायां स्वकीयचित्तस्पंदना-
भावेपि मायाज्ञानोपरमे सति द्वैतदर्शनाभावादद्वैतसिद्धं। ततश्च स्वप्नजागरद्वैतदाना। मु[illegible]स्यान्निर्दर्शनादिस्युपपत्तेः साविद्वैतमद्वै-
तकार्यं। न च कारणं कार्यप्रतिभासे विरुध्यते। कार्यस्य वाचारंभ(ण)मात्रत्वात् कारणातिरेकेणाभावादित्यर्थः। तेषामित्यादि- २९
भागं विभजते। द्वैतानां त्विति। परमार्थद्वैतांशेनाद्वैतविरोधमाशंक्य द्विधाव्यवहारोपि विमर्शस्य द्वैतस्याद्वैतत्वादेव संप्रतिपन्नवत् मिथ्या-
त्वसिद्धेर्न तेन विरोधोऽद्वैतस्येति मन्वानः सन्नाह। यद्वेति। भ्रांतिमूले द्वैतसंदर्शनेऽद्वैतदर्शनं प्रमाणमूलमविरुद्धमित्येतद्दृष्टां-
तेनोपपादयति। यथेत्यादिना। कार्यकारणभूतयोर्द्वैताद्वैतयोरविरोधे सिद्धे फलितमाह। तेनेति। अद्वैतिनां द्वैतिनां च प्राति-
स्विकपक्षपर्यालोचनया नो द्वैतपक्षैरद्वैतपक्षानाविरोधो भवतीति फलितमुपसंहरति। तेनेति। अद्वैतमेव द्वैतात्मनापरि-

णामनेवेतद्वैतमस्ति नास्तिकं स्यादित्याशंक्याह। माययेति। विवर्तवादानंगीकारे दोषमाह। नत्वत इति। पूर्वार्द्धं व्यावर्त्यां शंकामाह। द्वैतमि
ति। तत्र पूर्वार्द्धाक्षराण्यवतार्य व्याकरोति। अनेनाहेति। विमतो भेदो मिथ्या भेदत्वाच्चन्द्रादिभेदवदित्यर्थः। विमतं तत्त्वतो भेदरहितं नि
रवयवत्वान्निस्पन्दत्वादजत्वाच्च व्यतिरेकेणामृषादिवदित्याह। नेत्यादिना। निरवयवत्वेऽपि वस्तुनः स्फुटत्वधर्मत्वमाशंक्याह। कावेयवं
हीति। तत्क्रममनुमानं निगमयति। तस्मादिति। तात्त्विकपारमार्थिकत्वेनेत्यर्थः। पुनर्नञनुकर्षणमन्त्यपार्थे' कार्यत्वधर्मत्वां इत्यादि दृ
ष्टान्तप्रकारेणाभिमतः। विपक्षे दोषं वदन्नुत्तरार्द्धं विवृणोति। नत्वत इति। प्रसंगस्येष्टत्वमाशंक्य निराचष्टे। नचेति। विवर्तवादमुपसंहरति
अजमिति। स्थिते विवर्तवादे फलितमाह। तस्मादिति। स्वपक्षमुक्त्वा स्वयूथ्यपक्षमनुभाष्य दूषयति। अजातस्येति। अनुवादभागं विभ
जते। वादिन इति। स्वभावत एवाजातस्य स्वभावत एवामृतस्य चात्मतत्त्वस्य परमार्थत एव जातिमुत्पत्तिं ये स्वयूथ्याः स्वीकुर्वन्तीत्यर्थः। जा
तस्य हि कुतो मृत्युरिति तस्यायमेन दूषयति। तथामिति। अजातो हीत्याद्यक्षराण्युक्तेऽर्थे योजयति। स्वभावेति। पदार्थानां स्वभाववैपरीत्यमाम
च नमनुपपन्नमित्युक्तं प्रपञ्चयति। न भवतीति। तत्र पूर्वार्द्धं हेतुत्वेन व्याचष्टे। यस्मादिति। उत्तरार्द्धं हेतुमत्त्वेन योजयति। नत इति। यथाग्नेः
स्वभावभूतस्यौष्ण्यस्यान्यथात्वं शैत्यगमनमयुक्तं तथान्यत्रापि स्वभावस्यान्यथात्वमनुचितं स्वरूपनाशप्रसंगादित्यर्थः। ननु क
स्य कारणरूपेणात्रागुत्पत्तेरमृतमपि कार्यात्मकारेणोत्पत्तेरकालं मर्त्यतां गमिष्यतीति नेतो रूपभेदादुभयमविरुद्धमिति तत्राह। स्वभा
वेनेति। पूर्वार्द्धं साध्याहारं योजयति। यस्येति। प्रागवस्थायामपि कारणस्यैव कार्यात्मकारेण जन्मयोग्यता मर्त्यत्वावगमान्नस्यैवजातिति
स्यादित्यर्थः। कथं तर्हि तस्य प्रतिज्ञायुक्तेत्याशंक्य कृतकेनामृतस्य विलयेनामृतत्वस्य वादिनः स कारणात्मत्वाभावो भवतीति प्रतिज्ञायु
क्तेत्याह। कथमित्यादिना। भवतु प्रलयावस्थायाममृतावस्था परिणामेनामृतत्वं ततो वा किं स्यादित्याशंक्याह। कृतकेनेति। कृतक
त्वस्य पक्षे कृतकेऽतिदर्शनमिति विनाशित्वेन व्याप्तत्वादित्यर्थः। किं च सृष्टामवस्थायां कार्यमात्रं वास्तवत्वेऽजं ब्रह्माऽस्मीति ज्ञानाभावान्
मोक्षो न स्यादित्याह। आत्मेति। परिणामवादस्य सृष्टिश्रुत्यनुसारत्वात्स्वीकार्यत्वमाशंक्य निरस्यति। भूतत इति। परिणामवादे वि
वर्तवादे च सृष्टिश्रुतेरविशेषाददैतानुरोधिश्रुतियुक्तिवशाद्विवर्तवादस्यैव स्वीकर्तव्यत्वेति भावः। सृष्टिश्रुतेरद्वैतानुगुणत्वे प्रमाण
युक्त्यनुगृहीतमद्वैतमेवाभ्युपगन्तव्यमिति फलितमाह। निश्चितमिति। श्लोकव्यावर्त्यां शंकां दर्शयति। नन्विति। यद्यात्माकार्यो
कारणानजायते तर्हि सृष्टिश्रुतिरश्लिष्टा स्यादित्यर्थः। सृष्ट्यनुवादिनी श्रुतिरस्तीत्यंगीकरोति। बाढमिति। तस्या मिथ्यासृष्ट्य
नुवादित्वेन कथमुपपत्तिरित्याशंक्याह। सा त्विति। कथमद्वैतपरत्वेन सृष्टिश्रुतेरुपपत्तिरित्याशंक्याह। उपाय इति। यदि सृष्टिश्रुतेर
द्वैतपरत्वेन तर्हि रोधसमाधीरधस्तादेवोक्तौ तर्हि पुनश्चोद्यपरिहारयोरपुनरुक्तौ पुनरुक्तिरित्याशंक्याह। इदानीमिति। मिथ्यासृष्टिवादे
श्रुतिपदानामप्रजनताभवदित्यादीनामजस्य विरोधाशंकायां तावन्मात्रे परिहृतेऽपुनश्चोद्यपरिहाराविति इत्यर्थः। श्लोकस्य तात्पर्य

नप्रसिद्धत्वे ५

मुक्त्वा पूर्वार्द्धं व्याकरोति। भूततइति। मायाह्येषा मया सृष्टा इत्यादिवन्नेनेनोस्तजनेति श्रुतिः सत्त्वे स्वत्त्वाभवदिति श्रुतिस्तु दे
वदन्तो व्याघ्रो भवदितिवत्। नचसत्त्वं विशेषणमात्रोपलम्भनेनेन मायायामप्यां सृष्टाविष्टायामविसृष्टेः श्रुतिः श्लिष्टेत्यर्थः। गौणमुख्ययो
र्मुख्ये संप्रत्ययवृत्तिन्यायमाश्रित्य शङ्कते। नन्विति। आग्निर्माणवक इत्यत्र माणवकेऽग्निशब्दप्रयोगेऽप्यग्निमानयेत्यादिप्रयोगदर्शनं व
ह्निः प्रतीयते मुख्यमेव प्रथमं प्रतिभातीति मुख्यपदवृत्त्यवहेलमुख्यार्थानपास्तस्यास्सृष्टिरेवेष्टव्येत्यर्थः। मुख्यसृष्ट्यंगीकारेपि सत्यास्सृष्टिर्ने
सिध्यत्यस्यापक्षे सत्यायाः सृष्टेः सृष्टिशब्दार्थत्वेनाप्रसिद्धत्वादिति परिहरति। नेत्यादिना। लौकिकानां मुख्यासृष्टेः सत्यस्याप्रसिद्धत्वेपि फ
लाभावान्न तत्र श्रुतितात्पर्यमित्याह। निष्प्रयोजनत्वाच्चेति। अन्यथास्सृष्टेरप्रसिद्धत्वमेव स्पष्टयति आविद्येति। गौणी स्वप्ने रथादिसृष्टिः
मुख्या जागरे घटादिसृष्टिः सर्वाप्यविद्यावस्थायामेव तस्यां सत्यामेव भावान्न तत्त्वदृष्ट्या कापि सृष्टिः संभवति तथाभूतस्यान्यथाभूत
स्यत्वेनोपरतो वा वस्तुतोऽन्यथाभावासंभवात्तदतिरेकेणावसृष्टेर्योगादित्यर्थः। वस्तुरूपालोचनया वास्तव्याः सृष्टेरसिद्धत्वे मुंडकश्रु
तिमनुकूलयति। सबाह्येति। सृष्टेर्विद्याविद्यमानत्वेपि किं वस्तु विवक्षितमित्याशंक्योत्तरार्द्धं विभजते। तस्मादिति। निरवयवत्वे विभुत्वमि
त्यादियुक्तिस्तेनाद्वैतमेव श्रुतितात्पर्यगम्यं न द्वैतमिति फलितमाह। तदेवेति। सृष्टेर्मृषात्वस्पष्टीकरणद्वारेणाद्वैतमेव श्रुत्यर्थस्तमानि
र्धारयितुं श्रौतं निश्चयमेव विवृणोति। नेहेति। आकांक्षां प्रदर्श्य श्लोकाक्षराणि व्याकरोति। कथमित्यादिना। तत्राद्यपदं व्यतिरेकं दर्शयित्वा
पुनरन्यथाख्यानेन व्याचष्टे। यदीहीति। द्वैतभावश्चेत्प्रतिषिध्यते कथं तर्हि सृष्टिरुपदिश्यते तत्राह। तस्मादिति। यथाप्राणादीनां दृष्टा
र्थं प्राणसंवादः श्रुतिषु कल्प्यते तेन तथा सृष्टिरेकत्वप्रतिपत्त्यर्थत्वेन कल्पिता वास्तव्याः सृष्टेरयोगात्त्योपदिष्टत्वादित्यर्थः। कल्पिता सृष्टिरि
त्यत्र हेत्वन्तरं दर्शयन्द्वितीयं पादमवतार्य तात्पर्यमाह। इन्द्र इति। मायाशब्देन सृष्टेर्व्यपदेशादसौ कल्पितायुक्तेति शेषः। अभिधानमन्थस
त्वानामसु पाठान्मायाशब्दो मिथ्यार्थो न भवतीति शंकते। नन्विति। मायाशब्दस्य प्रज्ञानामसूक्तांचित्स्वरूपावमंगीकरोति। सत्यमिति। क
थं तर्हि मिथ्यार्थत्वं तत्राह। इन्द्रियेति। नहि मायाशब्दितां प्रज्ञां ब्रह्मचैतन्यं भूयश्चान्ते विश्वमायानिवृत्तिरित्यादौ निवृत्तिश्रवणात्। किंत
स्याविद्धिप्रजन्या तस्याश्चाविद्यान्वयव्यतिरेकानुविधायित्वयाऽविद्यात्वेन मिथ्यात्वान्मायाशब्दस्य मिथ्यार्थत्वेनानुपपत्तिरित्यर्थः।
तात्पर्यार्थमुक्त्वा तत्रैवाक्षराणुगुण्यमाह। मायाभिरिति। पुरुषः सन्नियत इति संबंधः। मायामयी सृष्टिरित्यत्र हेत्वन्तरपरत्वेन ३०
तृतीयपादमवतारयति। अजायमान इति। अजायमानस्य बहुधा विजायमानत्वं विरुद्धमित्याशंक्य चतुर्थपादमुत्थापयति। त
स्मादिति। अश्रुतस्य कथमेवकारस्यावापः स्यादित्याशंक्याह। तुशब्द इति। अवधारणरूपमर्थमेवाभिनयति। माययैवेति
र्कस्मादित्यमवतार्य तेवास्तवे जन्मनि का वस्तुसतिरिक्त्याशंक्याह। नयुजेति। आत्मैकत्वज्ञानमेव श्रुतितात्पर्यगम्यं सृष्टि
स्तु नष्टत्वात् इद विवक्षितेत्यत्र हेत्वन्तरमाह। फलवत्त्वाच्चेति। तस्य फलवत्त्वप्रमाणमाह। तत्रेति। एकत्वमात्राचार्योपदेशा

मनुपश्यतः साक्षात्कुर्वतस्तत्रैकत्वसाक्षात्कारे सति शोकमोहोपलक्षितः संसारो न भवतीत्यर्थः। न केवलं विफलत्वाद्भेददृष्टि
रविवक्षिता किंतु निंदितत्वेन निषिद्धत्वादनर्थकरत्वाच्चेत्याह। स्योरिति। भेददृष्टेर्मिथ्यात्वे हेत्वंतरमाह। संभूतेरिति। सम्यक्भूति
रैश्वर्यं यस्याः सा संभूतिर्देवता हिरण्यगर्भाख्या तस्याश्च कार्यमध्ये श्रेष्ठाया निंदितत्वात्प्रधानमल्लनिबर्हणन्यायेन संभवशाद्वि
कार्यमेव निषिध्यते तथा च सिद्धं तस्य वस्तुत्वमित्यर्थः। कारणप्रतिषेधेन तदवस्तुत्वसिद्धेश्च यथोक्तार्थसिद्धिरित्याह। कोत्वेनमि
ति। पूर्वार्द्धं व्याकरोति। अंधमिति। संभूत्युपासनाया मंत्रार्द्धेनाद्येन निंदां विधाय ततो भूय इवेत्यादिनोत्तरार्द्धेन संभूतेरुत्कृष्टाया देवताया
हेयत्वमुपपाद्यते तत्र प्रधानभूतदेवतोपास्यत्वापवादोऽत्र तो। वाक्रनं सर्वमेव संभवेशाद्वि तं कार्यमात्रं निषिध्यते लब्धावृत्तदवस्तु
त्वसिद्धिरित्यर्थः। संभूतेरपवादेऽपि तन्मिथ्यात्वनियमाभावात्कार्यमात्रस्य मिथ्यात्वं शंकयं प्रतिज्ञातुमित्याशंक्याह। नहीति। संभू
तिनिंदा तदवस्तुत्वख्यापनार्था न भवति किंतु विनाशेन कर्मणा देवतोपासनस्य समुच्चयविध्यर्था समुच्चयविधानस्य फलत्वादि
तिशंकते। नन्विति। अपवादस्य समुच्चयविध्यर्थत्वे दृष्टांतमाह। यथेति। अत्र खल्वविद्याशब्दितकर्मापवादो विद्याकर्मणोः समु
च्चयविध्यर्थः स्थितः विद्यां चाविद्यां च यस्तद्वेदोभयं सहेति श्रवणादित्यर्थः। तत्कर्मबाधमभ्यनुजानाति। सत्यमिति। नहि संभूत्यपवादे
त्वादवस्तुत्वख्यापको न भवतीत्युक्तं स्थितमेवेत्याशंक्य समुच्चयस्य विद्यावस्थायामेवास्थितफलत्वात्त्वाद्यवस्तुत्वं संभूत्यादेर्नि
शाधीनमुक्तं तत्तदवस्थमेवेति मन्वानः सन्नाह। तथापीति। यथाग्निहोत्रादेः शास्त्रीयस्य कर्मणोऽशास्त्रीयप्रवृत्तिस्वरूपमृत्युतरणार्थ
त्वमिष्टं तथा साधनाद्यपणारूपमृत्युतरणार्थत्वं समुच्चयस्यापि वाच्यं तथा च संभूत्यादेरवस्तुत्वमविरुद्धमित्यर्थः। मृत्युतरणार्था
त्वसंस्कारार्थत्वं कथमित्याशंक्याह। एवंहीति। कामाचारवादभक्षणादिलक्षणात्स्वाभाविकप्रवृत्तिरूपाच्छुद्धिवियोगः संस्कारोऽय
थानिष्टाग्निहोत्रादिफलं तथा निष्कामेनानुष्ठितसमुच्चयफलं कामाख्याशुद्धिव्यावृत्तिरित्यर्थः। अविद्यया मृत्युं तीर्त्वेति मंत्रे मृत्यु
तरणाहेतुरविद्येति श्रवणात्संभूत्यामृतमश्नुत इति च संभूतेरमृतत्वफलाभिलापात्कथं समुच्चयफलं मृत्योरतितरणमित्या
शंक्याह। अत इति। यतो न समुच्चयानुरूपममृतत्वं घटते तस्याविद्यया मृतमश्नुत इति वक्ष्यमाणत्वादतः समुच्चयफलत्वेनावि
अ द्याविद्यया मृत्युं तीर्त्वा इत्यत्र निर्दिश्यते आपेक्षिकमृत्युतरणहेतुत्वसंभवादित्यर्थः। यद्यविद्यालाशेन समुच्चयो विवक्ष्यते कथं
तर्हि विद्यां चाविद्यां चानेन विद्याविद्ययोः समुच्चयो निर्दिश्यते नहि देवतादर्शनकर्मसमुच्चयस्य ब्रह्मविद्यया समुच्चयः संभ
वतीत्याशंक्याह। एवमिति। नांतरीयकत्वमवश्यंभावित्वं प्रतिबंधकाभावे कार्योत्पत्तेरुपपत्तेरित्यर्थः। एवं मंत्रार्थे स्थिते प्रकृते
फलितमाह। अत इति। अन्यार्थत्वं समुच्चयस्याशुद्धिक्षयहेतुत्वं तद्वदिष्टं किमित्यपवादस्तत्राह। यद्यपीति। तथाप्यतन्निष्ठत्वा
त्परमार्थामृतत्वफलवत्त्वाभावात्तदपवादसिद्धिरित्यर्थः। अपवादफलं दर्शयन्नाद्यभागविभजनमुपसंहरति। अत एवेति। को

त्वेनंजनयेत्पुनरितिश्रुत्यर्थमाचक्षाणोद्वितीयार्द्धंविभजते। एवंमायेत्यादिना। उक्तमर्थंदृष्टान्तेनस्पष्टयति। नहीति। नकश्चिदेनंजनयेदिति
कारणंप्रतिषिध्यतइतिसंबंधः। प्रश्नार्थेकिंशब्देदृश्यमानेकथंकारणप्रतिषेधसिद्धिरित्याशंक्याह। कोन्वेति। आक्षेपार्थमुक्त्वाद्विती
यार्द्धस्यतात्पर्यमाह। विद्यतेति। तत्रोद्भूतोजीवःकथंतस्यजनयितृकारणंनेत्युच्यतेव्याघातादित्याशंक्याह। नष्टस्येति। जीवजनयि
तृकारणाभावेप्रमाणमाह। नायमिति। तस्याविद्यामंतरेणस्वतोजन्माभावंसूचयति। नबभूवेति। इतोनिहितंवस्तुनभवतीत्याह। सएषइति
द्वेवावेत्यादिना। व्याख्यातंमूर्तामूर्तादिसर्वस्याज्यमग्राह्यंनेतिनेतीतिविप्सायायतोनिषेधतिश्रुतिरतःसएषइत्युपक्रम्यप्रतिपादित
स्यात्मतत्त्वस्यकूटस्थस्याविषयत्वेनग्रहणोपपत्तिरित्यर्थः। नेतिनेतीतिवीप्सातात्पर्यमाह। सर्वेति। रूपद्वयोपन्यासानंतरंतन्निषेधमंतरेण
निर्विशेषवस्तुप्रतिपत्तेरयोगात्तत्प्रतिपत्त्याचपुरुषार्थपरिसमाप्तिसंभवादादेशोनिर्विशेषस्यात्मतत्त्वस्योपदेशस्तावत्प्रस्तूयतेएवंप्रस्तुत
नेतिनेतीतिवीप्सयासर्वस्यमूर्तामूर्तादिविशेषस्यारोपितस्यनिषेधोदर्शितस्तेनचात्माजिज्ञासितोविशिष्टोनिर्दिष्टइत्यर्थः। सच्चेदे
वंमूर्तामूर्ताधिकारेप्रतिपादितस्तर्हिकिमितिप्रदेशांतरेपुनःपुनरेवंप्रतिपाद्यतेपुनरुक्तेरित्याशंक्यव्याख्यातमित्यादिव्याचष्टे। प्रति
पादितस्येति। यद्यपिमूर्तामूर्तप्रकरणेप्रतिपादितमात्मतत्त्वंतथापितस्यपरमसूक्ष्मत्वाद्दुर्ज्ञानत्वंमन्यतेश्रुतिः। सापुनरुपायविशेष
सद्भावाभिप्रायेणतस्यैवपुनःपुनःप्रतिपादनेच्छयायदारोपितमुक्तंतत्तदशेषमपह्नुत्याविशिष्टमात्मस्वरूपंनिवेदयतीत्यर्थः। सर्वमित्या
दिस्पष्टीकुर्वाणःसएषइतिव्याचष्टे। नाद्यमिति। सएषइत्याद्याश्रुतिरदृश्यतामात्मनोविशेषनिषेधमुखेनदर्शयतीत्यदृश्यंकस्मा
न्नसौवाचामगोचरीभूतंतदशेषमर्थादपलपतिसाहिपरमार्थवस्तुअदृश्यमितिब्रुवाणादृश्यस्यवस्तुत्वेनोपपद्यतेतथानुपपत्तेःदृ
श्यवर्गस्यावस्तुत्वंसिद्धमित्यर्थः। ननुकिमितिश्रुतिर्व्याख्यातंविशेषजातंनिह्नुतेपंकप्रक्षालनन्यायापातादित्याशंक्याग्राह्यभावे
२५८ न्नेत्यादिव्याकरोति। अपायस्येति। द्वेवावेत्यादिनाव्याख्यातस्यप्रपंचस्य। द्वितीयंब्रह्ममात्रमत्रपर्यवसायितामप्रतिपद्यमानस्यब्रह्म
वदेवोपायत्वेनाभिमतप्रपंचस्यापिवस्तुत्वेनग्राह्यत्वाशंकापासामाभूदित्यशेषविशेषराहित्येनाद्वितीयब्रह्मस्वरूपनिर्द्धारणार्थमा
रोपितंप्रपंचंप्रतिषेधतिश्रुतिरित्यर्थः। उपायस्यकल्पितत्वेनवस्तुत्वाभावादुपेयस्यचसदेकरूपत्वात्कथंतथाविधवस्तुप्रतिपत्तिरित्या
शंक्याजमित्यादिव्याचष्टे। नन्विति। समारोपितस्यसर्वस्यनिषेधादेवस्वातंत्र्येणवस्तुत्वाभावनिश्चयादारोपितसर्पादेरधिष्ठानातिरेके
णासत्ववदुपायस्यमूर्तादेरुपेया [illegible] द्वितीयस्यब्रह्ममात्रतामेवप्रतिपद्यमानस्यब्रह्मणश्चसदेकरूपत्वात्कूटस्थनित्यदृष्टि ३१
स्वभावत्वादिज्ञानतत्त्वस्योत्तमस्याधिकारिणःस्वयमेवान्यापेक्षामंतरेणात्मतत्त्वमुक्तविशेषणंप्रकाशीभवतिकल्पितस्यचो
पायत्वंप्रतिबिंबादिवदविरुद्धमित्यर्थः। आत्मतत्त्वमजमद्वितीयंपरमार्थभूतंद्वैतंतुमायाकल्पितमसदितिप्रतिपादितं। तत्रैवहेतुंत
माह। सतोहीति। यदात्मतत्त्वंसदासदेकरूपंतस्यमाययाजगदाकारेणजन्मयुक्तंमायायादुर्निरूपायाःसमर्थनपदीयस्त्वात्प

रमार्थतस्त्वेकरूपमनेकरूपतया नोत्पत्तुं पारयति विरोधादित्यर्थः। विपक्षे दोषमाह। तत्त्वत इति। यस्य वादिनो मते ब्रह्मैव परमार्थतो जगदा
त्मना जायते तेन स्याज्जातस्य जायमानत्वप्रतिज्ञा व्याहतेत्याह। जातस्यैव जायमानत्वे स्यादनवस्थेत्यर्थः। अद्वैतस्यावेदयंत्याऽद्वैतनिषेध
कृतकत्वादन्यथात्वजडत्वादियुक्त्या च तथाविधया निर्धारितमर्थं श्लोकान्तरार्थकथनार्थमनुवदति। एवमिति। उक्तमेव वस्तु युक्त्यंतरेणापि
द्रढयितुमुत्तरग्रंथप्रवृत्तिरित्याह। अधुनेति। पूर्वार्द्धं शंकोत्तरत्वेन व्याख्यातुं शंकयति। तत्रेति। श्लोकः सत्त्वस्यापरामृश्यते यन्न कदा
चिदपि गृह्यते तदसत्ता सदेव शशविषाणादिवदेवं प्रमाणाभावे प्रमेयासिद्धेरित्यर्थः। कार्यलिंगकानुमानवशादात्मतत्त्वस्य कारण
त्वेन सत्त्वनिर्णयान्नासत्त्वचोद्यमिति दूषयति। तन्नेति। संगृहीतमर्थं दृष्टांतेन विवृणोति। यथेति। विमतं सदधिष्ठानं कार्यत्वात्संप्रतिपन्न
वदित्यर्थः। उक्तेऽर्थे पूर्वार्द्धाक्षराणि योजयति। यस्मादिति। तस्मात्कारणस्य सत्त्वमविवादमिति शेषः। नासत इति। तस्य निःस्वभावत्वात्कारण
नाधि ति त्वायोगादित्यर्थः। तथाभूतस्यान्यथाभूतस्य च जन्मायोगादित्यर्थः। सत इति पंचम्यंतं पदं गृहीत्वा निमित्तकारणपरतया व्याख्यातं संप्रति
सत इति षष्ठ्यंतं पदमादायोपादानपरतया व्याकरोति। अथवेति। यथा रज्जोः सर्पधारादयाकारेण मायाकृतं जन्म तथैवाद्वयस्यापि
सद्रूपस्यात्मतत्त्वस्य जगदात्मना जन्म मायया प्रयुक्तं प्रतिपत्तव्यं जन्मरहितस्य वस्तुतो जन्मव्याघातादित्यर्थः। उत्तरार्द्धं विभजते। यस्येत्यादि
ना। मायिकं जन्म न तात्त्विकमिति स्थिते फलितमाह। तस्मादिति। सत्पूर्वकं कार्यमिति न व्याप्तिरसद्वादिभिरसतः सज्जन्माभ्युपगमादि
त्याशंक्याह। असत इति। तत्त्वतोऽतत्त्वतो वा नासतः सदाकारेण जन्मेत्यर्थः। तत्र दृष्टांतमाह। वंध्येति। पूर्वार्द्धं व्याकरोति। असद्वादिनामि
ति। असतो निःस्वरूपस्य स्वरूपाभावादेव तत्त्वतोऽतत्त्वतो वा कार्याकारेण न युक्तं जन्मेत्यत्र हेतुमाह। अदृष्टत्वादिति। उत्तरार्द्धं व्याकुर्वन्
दृष्टत्वमेव दृष्टांतेन स्पष्टयति। नहीति। सद्वादो मायया संभवस्य सद्वादस्तु तथापि नेति विशेषं दर्शयन्नुपसंहरति। तस्मादिति। कार्यकारण
निरूपणामत्रेति परामृश्यते। सतस्तत्त्वस्यैव मायया जन्मेत्युक्तमुपपादयति। यथेति। सतस्तु मायया जन्मेत्युक्तं अवस्थाद्वयेऽपि द्वैतस्य मनः
स्पंदितत्वस्वीकारादिति श्लोकस्यावर्त्त्यं चोद्यमुत्थापयति। कथमिति। अधिष्ठानरूपेण मनोऽपि सदिति सदृष्टांतमुत्तरमाह। तत्त्वत इति। म
नसः सन्मात्रत्वे कथमनेकधा स्पंदनमित्याशंक्य स्वप्नदृष्टांतं व्याचष्टे। यथेति। दार्ष्टांतिकमाह। तथेत्यादिना। मायाधीनं मनःस्पंदितम
वे६ वस्तुभूतमिति चोदयितुमित्युक्तं मनो ब्रह्म चेति कारणद्वयं तर्हि द्वैतस्य स्वीकृतमित्याशंक्य दृष्टांतेन निराचष्टे। अद्वयं चेति। दृष्टांत
भागं विभजते। रज्ज्विति। दृष्टांते चैतन्यातिरिक्तस्य ग्राह्यग्राहकभेदस्य मनःस्पंदितत्वं साधयति। नहीति। तथैव जागरितेऽपि परमार्थात्मरू
वे४ पेणाद्वयं सन्मनो ग्राह्यग्राहकद्वैताकारेणावभासते तथापि परमार्थसतो विज्ञानमात्रस्यावस्थाद्वयेऽपि विक्षेपाभावात्तस्मिन्नेवाधिष्ठाने
मायाकल्पितं मनःस्पंदितं द्वयाकारमित्यंगीकारान्न कारणद्वयं शंकितव्यमित्याह। जाग्रदपीति। मनोमात्रं द्वैतमित्यत्र प्रमाणमाह।
मनोदृश्यमिति। वृत्तमनूद्य श्लोकतात्पर्यमाह। रज्ज्विति। यथा रज्जुः सर्परूपेण विकल्प्यते तथात्मनो द्वैतरूपेण विकल्पनात्मकं तद्द्वै
विद्याकल्पितमित्युक्तेऽर्थे प्रमाणगवेषणायां विशिष्टमनुमानमुपन्यस्यतीत्यर्थः। तदेव प्रश्नपूर्वकं प्रकटयन् प्रथमार्द्धाक्षराणि व्या

मा·भा·

आ· चष्टे। कथमित्याना। विमतं मनोमात्रं तद्भावे नियतभावत्वाद्यथा मृद्भावनियतभावो मृन्मात्रो घटादिरित्यनुमानमारचयति। द्वैतमिति। द्र
ष्टमेव व्यतिरेकं स्फोरयन्नुक्तरीत्या द्वैतं विभजते। मनसो हीति। समाधिस्वापयोः द्वैतस्यानुपलंभे विनासत्वमित्याशंक्य मानाधीना मेयसिद्धि
रित्यभिप्रेत्याह। तदभावादिति। मनसो यदमनस्त्वमुक्तं तदुपपादयति। आत्मेति। समाधिस्वापयोरननुभवेऽपि मनसः स्वरूपेण नित्यत्वान्नाम
नस्त्वमस्तीत्याक्षिपति। कथमिति। संकल्पो हि मनसो व्यावहारिकं रूपं संकल्पश्च संकल्प्यापेक्षत्वात्तदभावेन भवति सर्वमात्मैवेत्यागमे
च संकल्प्याभावान्मनसो मनस्त्वं न वर्तते तथापि स्फुरति चेदात्मैवेति न विवेकिदृष्ट्या मनो नामास्तीति। श्लोकाक्षरैरुत्तरमाह। उच्यत इति।
तस्यैव सत्त्वे दृष्टान्तमाह। मृत्तिकावदिति। यथा घटशरावादिषु सत्स्वपि मृत्तिकामात्रमनुस्यूतं सत्यमिष्यते तथैवानात्मवस्तुसत्स्वपि आत्ममात्रं सत्य
मेष्टव्यं तत्सत्यमित्यवधारणादेवकारस्य दृष्टान्तनिविष्टस्य दार्ष्टान्तिकेऽनुषंगादित्यर्थः। उक्ते दृष्टान्ते प्रमाणमाह। वाचारंभणमिति। श्रुतिर्दृ
ष्टान्तपक्षरा विव्याचष्टे। तस्येत्यादिना। तेन तत्त्वज्ञानेनात्मातिरिक्तार्थाभावे निश्चिते संकल्पविषयाभावनिर्द्धारणाया संकल्प्याभावे दृष्टान्त
माह। दाहेति। यथाग्नेर्दाह्याभावे ज्वलनं न भवति तथा संकल्प्याभावे संकल्पो निरवकाशः स्यादित्यर्थः। संकल्प्याभावे किं मनसोऽपव
तितदाह। यदेति। मनश्चेन्मनस्त्वं व्यावृत्तं ते तर्हि कथमात्मनोऽवबोधो व्यंजकाभावादित्याशंक्याह। अकल्पकमिति। श्लोकं व्याव
र्त्याशंकामाह। यदीति। मनो मुख्यस्य द्वैतस्यासत्त्वे व्यंजकाभावान्नात्मबोधः संभवति मनसैवानुद्रष्टव्यमिति श्रुतेर्मनसश्चासत्वा
न॰१ गीकारादित्यर्थः। स्वरूपभूतेन ज्ञानेनैवात्मनोऽवबोधसंभवान्नातिरिक्ते मनस्यपेक्षेत्युत्तरमाह। अज्यत इति। ज्ञेयाभिन्नं ज्ञानमित्यस्यार्थे श्रु
तिमुदाहरति। नहीति। सत्यमोतदात्मकमोऽस्यं न परिलुप्यते तथेत्युदाहरत्यं ब्रह्मवदिति। प्रज्ञानं ब्रह्मेत्यादिश्रुतिसंग्रहार्थमादिपदं
ज्ञेयाभिन्नमित्युक्तं स्फुटयति। तस्यैवेति। आत्मनः स्वयमेवावगतिरूपत्वान्नार्थान्तरापेक्षेत्येतमर्थं दृष्टान्तेन स्फुटयति। नित्येति। मोक्ष
प्रकाशस्य ज्ञानफलं स्वर्गवत्परोक्षं किंतु तृप्तिवत्प्रत्यक्षं तत्र तस्य प्रकृतज्ञानफलस्य मनोनिरोधस्य प्रत्यक्षत्वार्थं प्रसंगं करोति। नि
गृहीतस्येति। न तस्य ज्ञेयत्वं सुषुप्ते प्रसिद्धत्वादित्याशंक्याह। सुषुप्त इति। श्लोकाक्षराणि व्याकर्तुं वृत्तं कीर्तयति। आत्मेति। तस्य स
त्यस्यशागुरुकेनानुबोधेन सम्यक्ज्ञानेन बाह्यस्य विषयस्य संकल्प्यस्याभावे निरालंबनस्य प्रचारासंभवे च मनः संकल्पमकुर्वत्तु
शान्तं निरुद्धं भवतीत्यन्वयः। निर्विषयं मनः शाम्यतीत्यत्र दृष्टान्तमाह। निरिंधनेति। निरुद्धे मनसि मनस्त्वव्यावृत्तौ मनःस्पन्दितस्य द्वै
तस्याभावमुक्तं स्मारयति। एवं चेति। वृत्तमनूद्य पादत्रयस्यार्थमाह। तस्येति। एवं विषयाभावेनेति यावत्। आत्मसत्यानुबोधो वि
वै कशब्दार्थः। प्रत्यगात्मन्येव पर्यवसानं प्रचारस्तस्याविहत्य तत्प्रत्यक्षत्वं विवक्षित्वा योगिभिरित्युक्ते चतुर्थपादस्यावतरणिकामाशंकामाह। ३२
नन्विति। निरुद्धस्यापि मनसः प्रचार इति संबंधः। विशेषप्रत्ययाभावस्य निरोधस्यापि विशेषाभावादिति हेत्वर्थः। तत्र प्रचारप्रसिद्धे व॰
सतीति यावत्। चतुर्थपादमुत्तरत्वेनावतारयति। अत्रेति। निरुद्धस्य मनसः सुषुप्तस्येव प्रचारस्य सुज्ञातत्वान्न तत्र ज्ञातव्यमस्तीत्यु
क्तं प्रत्याह। नैवमिति। विद्याभावव्यावृत्त्यर्थं मोहविशेषणं चित्तत्वमेव्यावर्त्यादि तु तमो विशेषणं अन्तर्दृष्टीनामनुगुणता भवतीत्यनेकान·

र्थफलानां प्रवृत्तीनां बीजभूता वासना यस्मिन् मनसि तस्येति सुषुप्तविशेषणं। आत्मनः सत्यस्यानुबोधो व्याख्यातः स एव बहुशो निरो
नविलुप्तान्यविद्यादीन्यनेकानर्थपर्यंतप्रवृत्तीनां बीजानि यस्य तस्येति निरूढस्य विशेषणं। प्रकर्षेणाशांतं सर्वं क्लेशात्मकं रजो यस्येति त
स्यैव विशेषणांतरं स्वतंत्रो ब्रह्मस्वरूपावस्थानात्मक इत्यर्थः। यथोक्तस्य प्रचारस्य सुषुप्तचारविसदृशस्य दुर्ज्ञानत्वे स्थिते फलितमाह।
तस्मादिति। मनसः सुषुप्तस्य समाहितस्य च प्रचारभेदोऽस्तीत्युक्तं तत्र हेतुमाह। लीयते हीति। समाहीनस्य मनसो द्वैतवर्जितस्य स्वरूपैक प्र
प्ययाति। तदेवेति। पूर्वार्द्धस्य तात्पर्यमाह। प्रचारेति। मनसः सुषुप्तस्य समाहितस्य चेति च वक्तव्ये यस्मादित्यस्य तस्मादित्युत्तरेण संबंधः
अविद्यादीत्यादिशब्देनास्मितरागादयो गृह्यंते सुषुप्ते मनसो वासनाभिः सह लयप्रकारं कथयति। तमोरूपमिति। आपद्यते इति संबंधः
जाड्यरूपमवस्थांतरेऽपि तुल्यमित्यतो विशिनष्टि। विशेषेत्यादिना। एवमाद्यं पादं व्याख्याय द्वितीयपादं व्याचष्टे। तदेवेति। पूर्वभा
गविभजनेन फलितमाह। तस्मादिति। तदेव निर्भयं ब्रह्मेत्यस्यार्थमाह। यदेति। समाहितं मनः ग्राह्यग्राहकमित्यविद्याकृतं यन्मलं द्व
यं तेन वर्जितं यदा तदेति संबंधः। मनसो ब्रह्मत्वे निर्भयत्वं तस्य फलितमाह। ब्रह्मत इति। तत्र हेतुमतः शब्देन सूचितमाह। द्वैतेति। यदुपशां
तं ब्रह्माभयमित्युक्तं तस्याभयत्वे प्रमाणं सूचयति। यद्विद्वानिति। ननु वक्ष्योक्तं ब्रह्म प्रकाशते न वा प्रकाशते प्रकाशते चेत् उपायोप
सायामद्वैतव्याघातो नचेत्प्रकाशते पुरुषार्थत्वासिद्धिरिति तत्राह। तदेवेति। तस्य ब्रह्मत्वसिद्धये परिच्छिन्नत्वं व्यवच्छिनत्ति। समंत
त इति। प्रकृतमेव ब्रह्म प्रकारांतरेण निरूपयति। अजमित्यादिना। न च तस्मिन्निरुपाधिके ब्रह्मणि ज्ञाने कर्तव्यशेषः संभवतीत्याह
नेति। अजत्वमुपपादयति। जन्मेति। किं जन्मनिमित्तं यदभावादजत्वमुपपाद्यते तदाह। अविद्येति। कुतस्तर्हि तन्निवृत्त्याजत्वसिद्धिरित्यत्रा
ह। साचेति। निमित्तनिवृत्त्याऽजत्वसिद्धेर्युक्तमनिद्रत्वं निद्राशब्देनाविद्याभिलापादित्याह। अत एवेति। विशेषणांतरं साधयति। अविद्याल
व क्षणेति। उक्तं विशेषणद्वयं विवृणोति। अप्रबोधेति। ब्रह्मणो नामरूपवत्त्वाभावे प्रमाणमाह। अत इति। विशेषणांतरमाह। किंचेति। सदा
भावरूपत्वे हेतुमाह। आग्रहणेति। जीवस्योपाधिस्थस्य ग्रहणाग्रहणानुदये तिरोभावः कर्ताहमित्याद्यन्यथाग्रहणोदये वाविर्भावो भव
ति तदभावाद्ब्रह्म रूपमेव सदा ब्रह्मेत्यर्थः। अस्याचार्योपदेशात्पूर्वं ब्रह्मण्यग्रहणं तदुपदेशादूर्ध्वं तद्ग्रहणमिति प्रसिद्धेर्ब्रह्मण्यपि
ग्रहणाग्रह णे स्यातामित्याशंक्याह। ग्रहणेति। यथा सवित्रपेक्षया ग्रहणाग्रहणे न स्तः किंतूदयास्तमयकल्पनया कल्प्य
ते तथा ब्रह्मस्वभावालोचनया ग्रहणाग्रहणे न विद्येते किं तूपाधिद्वारा कल्प्येते तेन ब्रह्मणः सदाभारूपत्वमविरुद्धमित्यर्थः।
इतश्च निरुपाधिकं ब्रह्म सदा विभातमेष्टव्यमित्याह। तमस्येति। अप्रभातत्वमिति च्छेदः। तदभावो ब्रह्मदृष्ट्या तमःसंबंधाभावः। उ
क्तमेव हेतूकृत्य विशेषणांतरं विशदयति। अत एवेति। विदुषा निरुद्धस्य मनसो ब्रह्मस्वरूपावस्थानमुक्तं ये तु विद्वांसो विसमा
ध्यादिकर्तव्यमाचक्षते तान्प्रत्याह। नेहेति। एवंविधत्वं निरुपाधिकत्वमुपचारः समाध्यादिः निरुपाधिके ब्रह्मणि विदुषां न

मा॰ भा॰
आ॰

कर्तृत्वविशेषोक्तौ त्वेतमर्थं वेदमर्यादाहस्त्वेन साधयति। यथेत्यादिना। अन्येषामनात्मविदामिति यावत्। अविद्यादशायामेव सर्वोऽव्यव
हारो विद्यादशायां चाविद्याया असत्त्वान्न कोऽपि व्यवहारो बाधितानुवृत्त्या तु व्यवहाराभाससिद्धिरित्यर्थः। विद्वानेव ब्रह्मेत्यङ्गीकृ
त्य बुधकृतं ब्रह्म पुल्लिङ्गत्वेन निर्दिष्टवान्। सर्वेति। श्लोकस्य तात्पर्यमाह। नामेति। अत्रेति। प्रकृतपदोपादानं नहि सर्वकरणवर्जि
तस्यात्रैव सिद्धत्वादुत्तरविशेषणमनर्थकमित्याशंक्याह। सर्वव्यापीति। बाह्यकरणसंबंधराहित्यवदंतःकरणसंबंधराहित्यं दर्शि
यति। तथेति। उभयविधकरणसंबंधवैधुर्येणात्मनः शुद्धत्वे प्रमाणमाह। अप्राण इति। करणसंबंधराहित्यमाह। अक्षरादिति। तस्य परत्वं
कार्यापेक्षया द्रष्टव्यं उक्तं हेतूकृत्य विशेषणांतरं विशदयति। यस्मादिति। अस्मिन्नुपरस्मिन्नात्मनि समाधीयते निक्षिप्यते जीवः
तदुपाधिश्चेति समाधिः परमात्मा समाधिनिमित्तयोगध्यानस्यावगम्यत्वाद्वा समाधित्वमवगंतव्यं अतएवेत्युक्तं हेतुं स्फुटयति।
विक्रियेति। प्रकृते ब्रह्मण्यविक्रियेयं विधिनिषेधाधीनयोर्वैदिकयोर्वा लौकिकयोर्वा हानोपादानयोरनवकाशत्वमित्याह। अ
हानेति। मनोविषयत्वाभावाद्ब्रह्मणि तयोरवकाशो नास्तीत्याह। चिंतेति। यथोक्ते ब्रह्मणि ज्ञाते फलितमाह। आत्मेति। प्रकर
पादे प्रतिज्ञातमुपहरति। अजातीति। किमिति लौकिको वैदिको वा ग्रहात्स्वर्गौ ब्रह्मणि न भवतस्तत्राह। यस्मादिति। उक्तमेवार्थ
मुपपादयति। अग्रहीति। ब्रह्मणि विक्रियाभावे हेतुमाह। विकारेति। तस्य विक्रियाविषयत्वाभावेऽपि हेतुं कथयति। निरवयत्वाच्चेति
विक्रियायास्तद्विषयत्वस्य वाभावे फलितमाह। अत इति। द्वितीयं पादमवतार्य व्याचष्टे। चिंत्येत्यादिना। तृतीयं पादं विभजते।
मदेवेति। चतुर्थपादं व्याकरोति। अजातीति। नन्विदं प्रकरणादावुक्तं किमर्थं पुनरिहोच्यते तत्राह। यदादाविति। ननु ग्रहान्न तत्त्वस
दो पूर्ववत्तत्त्वज्ञानमुक्तं न त्वकार्पण्यं तत्कथमकार्पण्यं वक्ष्यामीत्युपक्रांतस्यात्रोपहारः संभवतीत्याशंक्य तत्त्वज्ञानस्यैवाका
र्पण्यरूपत्वादुक्तोपसंहारसिद्धिरित्याह। एतस्मादिति। तत्त्वज्ञानातिरिक्तं ज्ञानं कार्पण्यविषयमित्यत्र लिंगं दर्शयति। यो वा इति
ज्ञान तत्तैरहितस्य कृपणत्वमुक्त्वा तद्वले फलितमाह। प्राप्येति। परमार्थब्रह्मस्वरूपावस्थानफलकं चेदद्वैतदर्शनं किमिति तर्हि सर्वैरेव नाद्रि
यते तत्राह। स्पर्शेति। परमार्थतत्त्वं कर्मनिष्ठानां बहिर्मुखानां दुर्दर्शमित्यत्र हेतुमाह। योगिन इति। यदुक्तं तत्त्वज्ञानं स्वरूपावस्थानफ
लकमिति तद्दर्शीकरोति। यदपीति। परमार्थतत्त्वे ब्रह्मेदं प्रत्यक्भूतमित्थं प्रागुक्तपरिपाट्या कूटस्थे स्थितं सच्चिदानंदात्मकं यद्य
पि तत्त्वज्ञानात्प्राप्यते तथापि मूढास्तन्निष्ठा न भवंतीति शेषः। यस्य तत्त्वानुभवस्य स्वरूपावस्थानफलमुक्तं तमिदानीं विशिन
ष्टि। अस्पर्शेति। तत्र वर्णाश्रमादिधर्मेण पापादिमलेन संस्पर्शो न संभवत्यस्मादित्यद्वैतानुभवोऽस्पर्शः। स एष योगो जीवस्य ब्र ६७
ह्मभावेन योजनादित्याह। सर्वेति। नामेति निपातस्य पर्यायं गृहीत्वा विवक्षितमर्थमाह। नामेत्यादिना। उपनिषत्सु न लिप्यते
कर्मपापपंकेनेत्याद्यासु दुःखे श्रवणमननादिलक्षणां योगशास्त्रस्य ज्ञानविषयत्वं व्यावर्तयति। वेदांतेति। केषां हि यथा

क्तस्यानुभवस्य लभ्यत्वमित्याशंक्याह। आत्मेति। उत्तरार्द्धं विभजते। योगिन इति। कर्मिणो हि श्रोत्रिया ब्राह्मणव्याघ्रस्याकं न स्यती
तिविवक्षितत्वात् तत्वज्ञानात्र स्यंतीत्यर्थः। अभयनिमित्तमेव तत्वज्ञानं मिथ्याज्ञानवद्रागाद्युदयनिमित्तं पश्यंतीत्याह। सर्वेतिम
पदर्शितत्वं विशदयति। भयेति। उत्तमदृष्टीनामद्वैतदर्शनमद्वैतदृष्टिफलं च मनोनिरोधमुक्त्वा मंददृष्टीनां मनोरोधाधीनमात्मदर्शि
नमुपन्यस्यति। मनस इति। अभयमित्यशेषभयनिवृत्तिसाधनमात्मदर्शनमुच्यते योगिनां सर्वेषां योगिनां कर्मानुष्ठाननि
ष्ठानां बुद्धिमुद्धिमतामित्यर्थः। मनोनिरोधाधीनं प्रागुक्तमनूद्य तत्फलं कैवल्यं कथयति। दुःखेति। श्लोकस्य विषयं परिशि
नष्टि। येषामिति। अभयं भयराहित्यं आसत्त्वात्मकमित्यर्थः। उक्तलक्षणा शांतिर्निरतिशयानंदाभिव्यक्तिः स्वाभावतो विद्यास्व ति
रूपसामर्थ्यादित्यर्थः। विदुषां जीवन्मुक्तानां मुक्तेः सिद्धत्वान्न साधनापेक्षेत्याह। नान्यापत्तेति। तत्र वाक्योपक्रममनुकूलयति
मत्यादिना। उत्तमभोज्ञानवज्ञो ऽधिकारिभ्यो व्यतिरिक्तानधिकारिणोवतारयति। यत्विति। योगिनः सुकृतानुष्ठायिनस्तदनुष्ठा
नादेव सन्मार्गगामिनस्तेषामपि तत्वज्ञानं कथंचिदुपजातं चेदलं मनोनिग्रहेणेत्याशंक्याह। तेषामिति। अभयं तदेव तत्वज्ञानं दुः
खनिवृत्तिरपि मनोनिग्रहमपेक्ष्य भवतीत्याह। कंचेति। तदेव व्यतिरेकमुखेन स्फोरयति। नहीति। इतरस्य मनोनिग्रहीनत्वमित्या
ह। किंत्विति। तदेवाभयमित्यत्र सूचितं स्पष्टं विवृणोति। आत्मेति। इतरस्य मनोनिग्रहोऽर्थवानित्याह। तथेति। तेषां साधकानां मुमुक्षूणा
मितियावत्। कृष्णं मुमुक्षूणां जिज्ञासूनां मनोनिग्रहसिद्धिरित्याशंक्याह। उत्सेक इति। दृष्टांतदार्ष्टांतिकभूतस्य श्लोकनिविष्टाक्षराणि
सो व्याचष्टे। मन इति। निग्रहोऽपीति तेषां व्यवसायवतां सुयोगभाविनां मनुद्वेगवतामिति। संबंधः च सुषोनिमीलनेन तन्मोदयस्य तेतुस्य चो
न्मीलनेघटादेवोपलभ्यते न कदाचिदपि श्रमेत्युद्वेगपरिवर्जनात् प्रागुदीरितानां मनोनिग्रहः संभवति तदाह। अपरिखेदाइति
समाधिं कुर्वन् न कृतत्वसाक्षात्कारप्रतिबंधकाः लयविक्षेपकषायसुखरागाख्याश्चामनसो ऽवक्ष्यमाणोपायेन निग्रहं कुर्यात् अन्य
थासमाधिसाफल्यानुपपत्तेरित्याह। उपायेनेति। प्रागुक्ताद्युपायादेव मनोनिग्रहपरिग्रहे श्रवणादिविध्यानर्थक्यमितिमन्वा
स्नेनो नः शंकते। किमिति। पूर्वोक्तोपायवतः श्रवणाद्यनुतिष्ठतो निग्रहद्वारा तत्वज्ञानसिद्धिरित्युत्तरमाह। नेत्युच्यत इति। तृतीयं पादं व्या
चष्टे। कथंचेति। लीयते स्थानद्वयमिति शेषः। चतुर्थपादमाकांक्षाद्वारा विवृणोति। सुप्रसन्नमित्यादिना। उपायेन निगृहीया
दित्युक्तेनमेवोपायं वैराग्यरूपमुपदिशति। दुःखमिति। ज्ञानाभ्यासाख्यमुपायांतरमुपन्यस्यति। अजमिति। अक्षरव्याख्या
नार्थमाकांक्षां निक्षिपति। कः सइति। तत्र पूर्वार्द्धं व्याकरोत्युच्यत इत्यादिना। वैराग्यभावना तत्तत्रविषये दोषानुसंधानेन वै
तृष्ण्यभावना तया कामभोगान्मनो निरोधयेदित्यर्थः। द्वितीयार्द्धं ज्ञानाभ्यासविषयं व्याकरोति। अजमित्यादिना। ज्ञानाभ्यास
वैराग्याभ्यां लयादिविक्षेपाद्व्यावर्तितं मनो रागप्रतिबद्धं श्रवणमनननिदिध्यासनाभ्यासप्रसूतसंप्रज्ञातसमाधिनात्म

संप्रज्ञातसमाधिपर्यंतेनेतोपि प्रतिबंधांतरं व्यावर्तनीयमित्याह। लय इति। श्लोकाक्षराणि व्याकरोत्येवमित्यादिना। ज्ञानाभ्यासः
श्रवणाद्यावृत्तिः विषयेषु क्षयित्वादिदोषदर्शनं वैतृष्ण्यं वैराग्यं लयो निद्रा संप्रबोधनमेवाभिव्यनक्ति। आत्मेति। मनसि प्रकृ
ते किमिति चित्तमुच्यते तत्राह। चित्तमिति। विक्षिप्तं विप्रसृतं शमयेत् व्यावर्तयेदिति यावत्। पुनरित्यत्र विवक्षितमर्थमाह। शममिति। उ
भयतो व्यावृत्तं मनस्तर्हि निर्विशेषब्रह्मरूपतां गतमित्याशंक्याह। नापीति। अंतरालावस्थस्य मनसः स्वरूपं तृतीयपादो वष्टंभ
नस्पृश्यति। सकषायमिति। रागस्य बीजत्वेन पराचीनविषयप्रवृत्तिं प्रति प्रतिपन्नत्वं यथोक्तं मनो ज्ञात्वा किं कर्तव्यमित्यपेक्षाया
माह। तत्रापीति। अंतरालावस्थापन्नस्यापरामृश्यते लयावस्थादिदृष्टांतयितुमपिशब्दः। यत्नतः संप्रज्ञातसमाधेरिति यावत्
साम्यमसंप्रज्ञातसमाधियुक्तमित्यर्थः। चतुर्थपादस्यार्थमाह। यदा त्विति। समाधेर्द्वयद्वारेण समं निर्विशेषं परिपूर्णं ब्रह्मरूपं प्राप्य
मनस्तन्मात्रया समाधिं चेत्प्राप्तप्रतिषेधः स्यादित्याशंक्याह। समप्राप्तमिति। ततो निर्विशेषवस्तुप्राप्त्याभिमुख्यादनंतरमित्यर्थः। किं
तन्मनसश्चालने यत्नातिविध्यते तत्राह। विषयेति। समाधित्सायां सुसुखमुत्पद्यते तद्विषयाभिलाषाद्विमनो निरोधव्यमित्याह।
नास्वादयेदिति। तत्रेति समाध्यवस्थोच्यते किंतु तस्यामवस्थायां सुखं यदुपलभ्यते तदज्ञानविजृंभितं मिथ्यैवेति प्रज्ञया विवेक
विज्ञानेन निस्पृहः सन्नभावयेदित्याह। निःसंग इति। किंच यच्चित्तं प्राचीनवैराग्याद्युपायेन निश्चलं सत्यगात्मप्रवणं प्रसाधितं त
द्यदि स्वभावानुसारेण बहिर्निर्गंतुमिच्छेत्तु तदा संप्रज्ञातसमाधेरसंप्रज्ञातसमाधिपर्यंतात्प्रयत्नात्तदात्मन्येवैकीकुर्यात्तन्मा
त्रमापाद्य परिशुद्धपरिपूर्णब्रह्मात्मकः स्वयं तिष्ठेदित्याह। निश्चरदिति। प्रथमस्य पादस्याक्षराणि योजयति। समाधिस्तत इति। तस्य
समाध्यवस्थायामिति शेषः। द्वितीयपादस्याकांक्षाद्वारा विवृणोति। कथमित्यादिना। निस्पृहो यथोक्ते सुखेनुरागरहितः सन्नि
त्यर्थः। विवेकरूपा बुद्धि[illegible] रज्जुसर्पवत्कल्पितत्वमित्येवमात्मिका तया भावयेदिति संबंधः। भावनाप्रकारमभिनयति
पदित्यादिना। प्रथमार्धस्याक्षरार्थमुक्त्वा तात्पर्यार्थं निगमयति। तत्रापीति। उत्तरार्द्धं विभजते। यदेत्यादिना। पूर्वोक्तसमाध्यनु
रोधादात्मन्येव निश्चलस्वभावं संस्थितं यथोक्तं सुखरागनिमित्तं तदुपायरागनिमित्तं वा निश्चरद्भवतीति संबंधः। तच्चावित्तं
तद्बाह्यविषयाभिमुख्याद्युक्तोपायेन ज्ञानाभ्यासादिना व्यावर्त्यात्मन्येव परस्मिन्ब्रह्मणि प्रयत्नतः संप्रज्ञातसमाधिवशा ३४
देकीकुर्यादसंप्रज्ञातसमाधियुक्तं परिपूर्णब्रह्मैवापादयेदित्यर्थः। तदेव स्पष्टयति। चिद्रूपेति। कदा पुनरिदं चित्तं ब्रह्म
मात्रमापद्यते तत्राह। यदेति। त्रिविधप्रतिबंधविधुरं विषमाकाररहितं यदा चित्तमवतिष्ठते तदा तद्ब्रह्म संपन्नं भवतीत्य
र्थः। अक्षराणि व्याचष्टे। यथोक्तेत्यादिना। उपायो ज्ञानाभ्यासादिः। निरहीनं विषयेभ्यो विमुखीकृतं न लीयते न निद्राप
रवशेन कारणात्मतां गतमित्यर्थः। अचलं रागादिवासनाशून्यमित्यर्थः। अचलत्वे दृष्टांतो निवातेति। किंतु ब्रह्मैका

रेणोत्स्येवंलक्षणं चित्तं यदा संपद्यते तेनदेतियोजना। निष्पन्नं ब्रह्मेत्युक्तमेव स्फुटयति। ब्रह्मस्वरूपमेवेति। असंप्रज्ञातसमाध्यवस्था
यां येन रूपेण चित्तमभिनिष्पद्यते तद्ब्रह्मस्वरूपं विशिनष्टि। स्वस्थमिति। इयेनोव्यतिरिक्तमिति शेषः। तत्र विदुषां संमतिमुदाहरति।
सर्वज्ञमिति। यथोक्तमिति असंप्रज्ञातसमाधिलक्षणं ब्रह्मेत्यर्थः। न स्मपरमपुरुषार्थरूपत्वमाह। सुखमिति। वैषयिकं सुखं व्यवच्छे
त्तुं परमार्थेति विशेषणं। किं तत्र ज्ञानेनेत्याशंक्याह। आत्मेति। तस्य सत्यस्यात्मभूतस्यार्थानुरोधिना बोधेन लक्ष्यते प्राप्यते ब्रह्मेति
वेत्यवलेतस्यस्वमहिमप्रतिष्ठत्वमाह। स्वात्मनीति। सर्वस्य त्रिविधस्यानर्थस्योपशमेनोपलक्षितत्वादपि पुरुषार्थत्वसिद्धिरित्या
ह। सर्वेति। निरतिशयानंदाभिव्यक्तिर्निरवशेषानर्थोच्छित्तिश्चेति एवं लक्षणं मोक्षमाचक्षते तत्कथमिदं ब्रह्मेत्याशंक्याह। अ
निर्वाणमिति। तस्य क्षीरगुडादिमाधुर्यभेदस्येव स्वानुभवमात्राधिगम्यत्वादवाच्यत्वमाह। तत्रेति। यदुक्तं परमार्थसुखमिति तदिदानीमुप
पादयति। सुखमिति। किमिति न हि सर्वेषामेव तद्भावादित्याशंक्याह। योगीति। ज्ञानस्याजातत्वेव धर्मे दृष्टांतमाह। यथेति। उक्तानामुपा
यानां परमार्थसत्यत्वे सत्यहेतौ निरन्याध्यानदप्राप्तिर्निवृत्त्याशंक्याह। न कश्चिदिति। तत्र हेतुमाह। संभवोस्येति। श्लोकाक्षरार्थविवेक
त्तुं भूमिकां व्याकरोति। सर्वोपीति। व्यावहारिकसत्यत्वमेवोपायानां न पारमार्थिकसत्यत्वमित्यर्थः। ऐकस्य पारमार्थिकसत्यस्य संप्रति
पत्त्युपायत्वेनोक्तत्वाह। मृदादीति। मृदुक्तमेनोनिग्रहादीनां परमार्थत्वे हेतं न हानिरिति तत्राह। अल्पादिना। तेषामपरमार्थित्वे कथम
हेतुत्वमिति पत्तिरित्यपि न व्यावहारिकसत्यानामपि तत्त्वप्राप्तिहेतुत्वस्य प्रतिबिंबवदुपपत्तेरिति भावः। उपायानां व्यावहारिकसत्य
व त्वं न पारमार्थिकसत्यत्वं किं न स्यादिति तत्राह। पारमार्थेति। तदेव स्पष्टयति। कर्त्रेति। स्वभावतो जत्वमत्र हेतूकृत्य तत्त्वे
हेत्वंतरमाह। अतइति। हेत्वंतरमेव स्पष्टयति। यस्मादिति। उत्तरार्धं व्याचष्टे। पूर्वस्मिन्निति। पूर्वेषु ग्रंथेष्विति शेषः। इति शब्दो हेतुप्र
करणपरिसमाप्तिं द्योतयति॥ ॥इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानंदपूज्यपादशिष्यभगवदानंदज्ञानविरचि
तायां गौडपादभाष्यटीकायां तृतीयं प्रकरणं समाप्तं॥ ॥आद्यंतमध्यमंगलाः ग्रंथाः प्रचारिणो भवंतीत्यभिप्रेत्याद्वैतप्रकरणादावोंका
रोच्चारणवदंते परदेवताप्रणामवच्च मध्येपि परदेवतारूपमुपदेष्टारं प्रणमति। ज्ञानेनेति। पूर्वोत्तरप्रकरणसंबंधसिद्ध्यर्थं पूर्वप्र
करणवृत्तमर्थं क्रमादनुद्रवत्योंकारेति। अद्वैतमित्यद्वैतोपलक्षितं तृतीयं प्रकरणमुच्यते चतुर्थप्रकरणमवतारयितुमुपयु
क्तमर्थांतरमनुवदति। तस्येति। द्वैतिनो भेदवादिनो वैनाशिका व्यतिरिक्ता गृह्यंते वैनाशिका नैरात्म्यवादिनः रागद्वेषादिदु
ष्टेनातिरिक्तक्लेशोपादाने पक्षांतराणां मिथ्यादर्शनत्वसूचनं कुत्रापयुज्यते तत्राह। ज्ञेयेति। पातनिकामेवं कृत्वा समन
तरप्रकरणप्रवृत्तिं प्रतिजानीते। तदिहेति। तदस्मत्कृतदर्शनत्वमिति संबंधः। आवीतन्यायो व्यतिरेकन्यायः यथा यत्कृ
तकं तदनित्यमित्यन्वयादनित्यत्वे गगनेपि यन्नानित्यं न तत्कृतकमिति व्यतिरेकोपि व्यभिचारशंकानिरासित्वन
टीका ४

मा·भा·
आ· व्याप्तिनिश्चयार्थमिष्यते तथा तर्कतः संभावितस्यागमेनावगतस्यादिप्रतिपक्षभूतवादांतरव्याकरणप्रपंचनमंतरेणापाति
कासम्यक्त्वशंका स्यात् अद्वैतदर्शनस्येति तज्जातिबोधेन तत्सिद्धिरुपसंहृतेत्यलातशांतिदृष्टांतोपलक्षितमारभ्यते
प्रकरणमित्यर्थः। विशेषेणास्पष्टमितो वीतः स न भवतीत्यवीतः अवीत एवावीतस्तेन न्यायेन व्यतिरेकेणेति यावत्प्रकर
णस्य तात्पर्यमेवं दर्शयित्वा प्रथमश्लोकस्य तात्पर्यमाह। तत्रेति। चतुर्थप्रकरणं सप्तम्या परामृश्यते किमित्यद्वैतरूपेणाचार्यान्न
मस्क्रियते तत्राह। आचार्येति। अभिप्रेतार्थः शास्त्रस्याविघ्नेन परिसमाप्तिस्तदर्थं विप्रतिपत्त्याद्विद्वारेति शेषः। आकाशस्य जडत्वाधि
क्यात्ज्ञानं स्वप्रकाशमाकाशेनेषदसमाप्तं वक्तव्यं विभुत्वादावुपमा द्रष्टव्या बहुवचनमुपाधिकल्पितभेदाभिप्रायं तेषामपि चि
न्मात्रत्वं विवक्षित्वा कृतानस्येवेति तेनेत्यादि पुनरनुवादेनान्वयमन्वाचष्टे। आचार्यो हि पुरा बदरिकाश्रमे नरनारायणाधिष्ठिते ना
रायणं भगवंतमभिप्रेत्य तपो महदतप्यत ततो भगवानतिप्रसन्नस्तस्मै विद्यां प्रादादिति प्रसिद्धं परमगुरुत्वं परमेश्वरस्येति भावः।
ननु प्रकरणे प्रारभ्यमाणे प्रतिपाद्ये प्रमेये वक्तव्ये किमित्युपदेष्टा नमस्क्रियते तत्राह। उपदेष्टुरिति। इदानीमद्वैतदर्शनयोग
स्तुतये तन्नमस्कारं प्रस्तौति। अस्पर्शेति। श्लोकस्य तात्पर्यमाह। आधुनेति। तस्य च स्तुतिस्तत्साधनेषु प्रवृत्तावुपयुज्यते सं
प्रत्यक्षराणि व्याकुर्वन्नस्पर्शयोगशब्दं व्याकरोति। स्पर्शनमिति। योगस्यान्यसंबंधप्रसंगाभावात् कथमस्पर्शत्वमित्या
शंक्याह। ब्रह्मेति। निपातयोरर्थं कथयति। वै नामेति। सर्वेषां सत्त्वानां देहभृतां सुखयतीति व्युत्पत्त्या सुखहेतुत्वं ब्रह्मस्व
भावस्य सुखविशेषणेन दर्शयति। सत्त्वेति। सुखहेतावपि ब्रह्मस्वभावे विवक्षितं विशेषं दर्शयति। भवतीति। हितविशेष
णस्य तात्पर्यमाह। तथेह भवतीत्यादिना। तस्य हितत्वे हेतुमाह। नित्यमिति। तस्यैवाविशेषणांतरमाह। किंचेति। तत्र हेतुं
प्रश्नपूर्वकमाह। कस्मादिति। आत्मप्रकाशत्वात् ब्रह्मस्वभावस्याविरुद्धत्वं नहि कस्यचिदात्मप्रकाशो विरुद्धो भव
तीत्यर्थः। यथोक्तस्य योगज्ञानमार्गस्य संप्रदायागतत्वमाह। यद्दश इति। तन्नमस्कारव्याजेन तस्य स्तुतिस्तदुपाये
दृष्टेन षु प्रवृत्त्यर्थमत्र विवक्षितेत्याह। तन्नमामीति। अद्वैतदर्शनस्याविरुद्धत्वेनाविवादत्वं विशदीकर्तुं द्वैतीनां विवादं ताव
दुदाहरति। भूतस्येति। एवं विरुद्धं वदंतो मिथो जेतुमिच्छंतीत्याह। विवदंत इति। प्रश्नपूर्वकं श्लोकाक्षराणि योजयति क
थमित्यादिना। एवकारार्थे हेतुमाह। यस्मादिति। द्वैताभिमानिनो जातिमिच्छंतीति पूर्वेणासंबंधः। चतुर्थपादं साध्याहा ३५
रं व्याकरोति। विवदंत इति। पक्षद्वयनिषेधमुखेन सिद्धमर्थं कथयति। भूतमित्यादिना। श्लोकाक्षरव्याख्यानार्थमाका
क्षां निक्षिपति। तैरिति। तत्राद्यं पादमवतार्य व्याकरोति। उच्यत इति। द्वितीयं पादं विभजते। तथेति। द्वितीयार्धं विभज
ते। विवदंत इत्यादिना। सदसदतिरिक्तवस्त्वभावाद्वस्तुन उत्पत्तेरनुपपत्तिरित्याह। अद्वयादिति। तद्धिप्रतिनियादिभिरु

ऽत्वादजातिरपि भवतीत्यारम्भ इत्याशंक्याह। ख्यापमानमिति। प्रतिवादिभिः सह विवादाभावे फलितमाह। अविवादमिति
अक्षरशोपि व्याचष्टे। तैरित्यादिना। अद्वैतवादिनो द्वैतवादिभिर्विवादाभावे वैधर्म्यदृष्टान्तमाह। यथा नेति। चतुर्थपादार्थमाह। अत
इति। जातस्यैव जन्मन्यानर्थक्यादनवस्थानाच्चाजातस्यैव पदार्थस्य जन्म सद्वादिनो। सद्वादिनस्तु सर्वेऽपि स्वीकुर्वन्तीति परपक्षमनु
वदति। अजातस्येति।। तत्र शिष्टधीदोषं प्रदर्श्याप्यनुजानाति। अजातो हीति। केनेत्यादिनोक्तेरेवमिष्यते तत्राह। सदसदिति। अ
वशिष्टानि श्लोकाक्षराणि व्याख्यातत्वान्न पुनर्व्याख्यानसापेक्षाणीत्याह। पुरस्तादिति। परिणामिब्रह्मवादे यदब्रह्मवादिभिर्दूषण
मुच्यते तदप्यनुज्ञातमेवेति मत्वाह। न भवतीति। अमृतं हि ब्रह्म न तद्रूपे स्थितं मर्त्यं भवितुमर्हतीति स्थितरूपविरोधान्न च मर्त्यं कार्यं
स्वरूपे स्थिते प्रलयावस्थायाममृतं ब्रह्म संपद्यते न ह्यपि स्वरूपेतस्यैवाभावान्नान्यथात्वमित्यभिप्रेत्याह। प्रकृतेति। किंच यस्य परि
णामवादिनः स्वभावेनामृतः सन् परमात्माख्यो धर्मश्राहितो भावो मर्त्यतां कार्यभावापत्त्या गच्छति तस्य कृतकेन समुच्चयानुष्ठाने
नामृतो जातो मुक्तो वक्तव्यः स च कथं निश्चलः स्यात्तु पारयति। यत्कृतकं तदनित्यमिति न्यायविरोधादित्याह। स्वभावेनेति। पुनरुक्ति
माशंक्य प्रत्यादिशति। उक्तार्थानामिति। प्रकृतेरन्यथाभावो न कथंचिदुक्तं तत्र प्रकृतिशब्दार्थं कथयति। सांसिद्धिकीति। श्लोकाक्षरा
णि व्याकुर्वन् प्रकृतेरन्यथात्वाभावे हेतुमाह। यस्मादिति। तस्मादमृतस्वभावप्रकृतिर्न विपर्ययेतीति किमु वक्तव्यमिति योजना।
कैमुतिकन्यायद्योतनार्थो। विशब्दः विवक्षितं हेतुं स्फुटयितुं प्रश्नपूर्वकं प्रकृतिं विभजते। कासावित्यादिना। सांगयोगमनुष्ठाय प
रिसमापनं संसिद्धिः सिद्धानामणिमाद्यैश्वर्यप्राप्तौ सामग्री संपन्नानां पाकाविलत्वभावं न जहातीति। घटस्य घटत्वं पटस्य पटत्वमि
धात ९ त्यादिकेति शेषः। प्रासंगिकं प्रकृतिशब्दार्थमुक्त्वा प्रकृतेरन्यथाभावप्राप्त्युक्तं ससिद्धान्तं यत्स्फुरितं तदिदानीं किं पुनर्न्यायेन कथय
ति। मिथ्येति। प्रासंगिकीमेव जीवानां प्रकृतिं प्रदर्शयितुं प्रक्रमते। जरेति। आत्मानो हि सर्वविक्रियारहिताः स्वभावतो भवन्ती
त्यर्थः। तेषां मुक्तप्रकृतेरन्यथात्वे का क्षतिरित्याशंक्याह। जरामरणमिति। विक्रियाशून्ये स्वात्मनि विक्रियाकल्पनायां तद्धा
मनया स्वभावहानिः स्यादित्यर्थः। श्लोकाक्षराणि व्याकर्तुमाकांक्षां दर्शयति। किं विषयेति। आश्रयविषयो विषयशब्दः। अ
प्रकृतं प्रकृतेरन्यथात्वनिरूपणमित्याशंक्याह। यस्या इति। पश्चान्तरं प्रकरोति। कल्पनायामिति। तत्र पूर्वार्द्धमुत्तरत्वेन व्याकरो
ति। अहेत्यादिना। उत्तरार्द्धं विभजते। एवं स्वभावादिति। प्रासंगिकं परित्यज्य सांख्यपक्षे वैशेषिकादिभिरुच्यमानं दूषणमभ्य
नुज्ञातमनुभाषते। कारणमिति। कारणस्य जायमानत्वेकान्ताहानिरित्याशंक्याह। जायमानमिति। सावयवत्वाच्च प्रधानस्य
नित्यत्वानुपपत्तिरित्याह। भिन्नमिति। श्लोकस्य तात्पर्यमाह। कथमिति। तत्र प्रथमपादाक्षराणि योजयति। कारणमि
त्यादिना। तदेव स्पष्टयति। कारणमेवेति। द्वितीयपादं विभजते। तस्येति। प्रधानादीत्यादिशब्देन तदवयवाः सत्वादयो।

सा॰भा॰
अ॰

गृह्यंते महादादीत्यादिग्रंथेनाहंकारादिग्रहणं तृतीयं पादं व्याकरोति। महादादीति। विप्रतिषेधं विशदयति। जायत इति। चतुर्थपा
दार्थमाह। नित्यं चेति। विमतमनित्यं सावयवत्वात् घटादिवदिति संभिप्रेत्य दृष्टांतं साधयति। नहीति। सांख्यस्मृतिविरुद्धमनुमानमि
त्याशंक्याह। विदीर्णं चेति। किंच कार्यकारणयोरभेदे किं कारणाभिन्नं कार्यं किं वा कार्याभिन्नं कारणमिति विकल्प्याद्यमनु
वदति। कारणादिति। अतोऽस्मिन्पक्षे कार्यं अजं स्यादन्यथा विधकारणाभिन्नत्वादिति दूषयति। अत इति। द्वितीयमनुवदति। य
दीति। जायमानात्कार्यात्कारणमभिन्नं यदीति योजना। न तर्हि कारणं ध्रुवं भवितुमर्हति कार्यादभिन्नत्वात् तत्स्वरूपवदिति
दूषयति। कारणमिति। श्लोकस्य तात्पर्यमाह। उक्तस्येति। कार्यकारणयोरभेदवादे प्रतिषेधोदर्शितस्तस्यैव दृढीकरणार्थं अयं
श्लोक इत्यर्थः। पूर्वार्द्धाक्षरोत्थमर्थमाह। कारणादिति। आग्नेरनिष्टपर्यवसायित्वमाह। इदं चेति। प्रधानस्याजत्वं जायमानत्वं च वि
प्रतिषिद्धमित्युक्तं ततोऽन्यदित्युक्तमेव व्यनक्ति। कार्यमिति। अभेदेऽपि मायावादे नैष दोषः। कारणस्य कार्यादनन्यत्वाभ्युपगमात्
कार्यस्यैव कारणमात्रांगीकारादिति मत्वाह। नवेति। तृतीयार्द्धं विभजते। किं चान्यदिति। अभेदवादेऽपि कार्यस्यानित्यत्वे कारणस्य
नित्यत्वमिति व्यवस्था किमिति न भवतीत्याशंक्याह। नहीति। किं तु यस्य प्रधानवादिनो मते प्रधानादजादभिन्नं कार्यं जायते महद
दादीत्यभ्युपगम्यते तस्य पक्षे तस्मिन्नर्थे दृष्टांतो वक्तव्यस्तदवष्टंभेनैव तेनार्थव्यवस्थापना न चात्रोभयसंप्रतिपन्नो दृष्टांतो दृष्ट
स्तीत्याह। अजादिति। यद्यजान्नित्याद्वस्तुनो जायमानमभ्युपगंतुं न शक्यते तर्हि जाताद्देव जायमानमभ्युपगम्यतामित्याशंक्याह
जाताच्चेति। सांख्यसमयेऽदोषांतरप्रदर्शनपरत्वं श्लोकस्य प्रतिजानीते। किं चान्यदिति। तत्र पूर्वार्द्धाक्षराणि योजयति। अजादिति। दृ
ष्टांताभावेऽपि प्रमाणांतरादर्थप्रतिपत्तिर्भविष्यतीत्याशंक्याह। दृष्टांतेति। परस्परवल्लभ्वनुमानाधीनार्थपरिज्ञानं न च दृष्टांताभावे
नुमानमवकल्पते तस्मान्न सांख्यसमयः संभवतीत्यर्थः। द्वितीयार्द्धं व्याचष्टे। यदापुनरित्यादिना। द्वैतवादिभिरन्योन्यपक्षप्रति
क्षेपमुखेनाद्वयापितं वस्तुनोऽजत्वं अद्वैतवादिनाभ्यनुज्ञातमिदानीं द्वैतनिरसनमपि श्रौतं विद्वदनुभवानुसारित्वात्तेनाभ्यनु
ज्ञातमेवेत्याह। हेतोरिति। हेतुफलात्मकः संसारोऽनादिरिति वदद्भिरस्तु स्यानादिस्वभावो नैव वक्तुं शक्यते हेतुफलयोरादिमत्त्वस्य
केवलत्वाद्धेतुफलात्मकं द्वैतमनिरूपितरूपमवस्तुभूतमित्यर्थः। श्लोकस्य तात्पर्यमाह। यत्त्विति। तमाश्रित्य कार्यकार
णात्मकस्य द्वैतस्य दुर्निरूपत्वमाहेति योजना। हेतुफलयोरात्मपरिणामत्वादादिमत्त्वमुपादानरूपेणाज्ञानादिमत्त्वमित्याशंक्या ३६
त्मनो निरंशस्य कूटस्थनित्यस्य स्वतः परिणामानुपपत्तेर्मैवमित्याह। नहीति। हेतुफलयोरन्योन्यमादिमत्त्वं ब्रुवता तदात्मकस्य सं
सारस्यानादित्वं विप्रतिषिद्धमित्युपपादितं संप्रति कार्यकारणभावोऽपि तयोर्न संभवतीत्याह। हेतोरित्यादिना। हेतुफलयोरन्यो
न्यं कारणत्वमभ्युपगच्छद्भिरभ्युपगम्यते विरुद्धमित्येतत्प्रश्नपूर्वकं प्रकटयति। कथमित्यादिना। इदं शास्त्रमेव विशदयति। यथे

ति। प्रतीतितो हेतुफलयोरुत्पत्तेरुपगंतव्यत्वात्त्वयुक्तं तन्निराकरणमित्याशंक्याह। संभव इति। तयोरुदये प्रतीतीति केनियतपूर्वभा
वी हेतुर्नियतोत्तरभावि फलमित्यभ्युपगमे हेतुमाह। युगपदिति। यथोक्तो विरोधो हेतुफलभावस्यासंभवः सन्नयुक्तोऽभ्युपगंतुं प्रती
तिविरोधादिति स्यादेतत्समाशंकामनुवदति। यदीति। तत्रोत्तरत्वेन श्लोकाक्षराणि योजयति। संभव इति। प्रतीत्यास्त्रमस्वीकारस्तदुप
त्तेश्चेत्याह। इतश्चेति। तामेवोपपत्तिं स्फोरयति। युगपदिति। ययोर्युगपत्संभवस्तयोर्न कार्यकारणत्वं यथा विषाणयोरिति व्याप्तेः व्य
कत्वात्क्रमस्यावश्यकतेत्यर्थः। उक्तं व्याप्तिरनुग्राहकं तर्कमुपन्यस्यति। फलादिति। हेतुफलयोर्मिथो हेतुफलत्वं ध्रुवं त[illegible]तेहेतु
धीनत्वाल्लब्धात्मकात्फलादुत्पद्यमानो हेतुर्न ततो लब्धात्मको भवति अलब्धात्मकश्चासत्त्वान्न फलमुत्पादयितुं [illegible]तो
हेतुफलभावस्यैवासिद्धिरित्यर्थः। हेतुफलयोरक्रमवतोर्न कार्यकारणभावेन संबंधः सिद्ध्यतीत्येतदाकांक्षापूर्वकं [illegible]यति। क
थमित्यादिना। स्वतो हेतुस्वरूपाज्जन्मफलं तदधीनत्वेन लब्धात्मकं स्यात्तस्याल्लब्धात्मकं तवोत्पद्यमानः सन्नेष हेतुर्न सिध्यति नरच
लुशशविषाणादेरसतः सकाशात्किंचिल्लब्धात्मकमुपलभ्यते हेतुश्चेदप्रसिद्धोऽलब्धात्मकोऽभ्युपगतः सत्तर्हि तथाविधोऽसद्रूपः स
न्न फलमुत्पादयितुमुत्सहते। नहि सदादिमत्फलमसतः सकाशादुपलब्धचरमित्यर्थः। तथापि कल्पं हेतुफलयोरसंबंधः सिध्य
तीत्याशंक्याह। नहीति। अन्यथा वस्त्वाधाराधेयभावादिकल्पनं हेतुफलयोर्योगपद्ये सत्यन्यतरस्यापि न पूर्वं सत्त्वे सत्ते त्वसत्त्वेः शश
विषाणयोरिवान्योन्यापेक्षया जन्यजनकत्वं नोपपद्यते शशविषाणादिष्वपि प्रसंगादित्युक्तमिदानीं पुण्येनैव पुण्येन कर्मणा भवती
त्यादिश्रुतेर्धर्मादिषु हेतुफलमाशंक्य श्रुतेरसंभावितार्थप्रमाण्यमोगादवद्यं पोवीर्यपर्यवक्तव्यमित्याह। यदीति। श्लोकाक्ष
राणि योजयति। असंबंधेत्यादिना। हेतुफलयोरिदं पूर्वमिदं पश्चादिति न ज्ञायते परस्पराश्रयात्तत्श्चेदं पूर्वं निष्पन्नमिति वक्तु
मशक्यमित्याह। अशक्तिरिति। उत्तरावसरे वेत्तदुत्तरयोर्ज्ञानं तर्हि कथमशक्तिः सूचकं तल्लिंगहस्त्वानम प्रतिभाभिधानीयमाप
तलीत्यर्थः। किंच यदि क्रमस्यानियतपूर्वापरीभावात्मनो परिज्ञानं तदा पूर्वं कारणमुत्तरं कार्यमिति प्रज्ञा हीयेत तथा च प्रति
ज्ञाहानिर्निग्रहांतरमापद्येतेत्याह। क्रमेति। अन्योन्यपक्षप्रतिक्षेपमुखेन सतोऽसते अजन्मनी प्रत्याख्याने क्रमाक्रमाभ्यां स
मुत्पत्तेरनुपपत्तेरसतो जातिरेवास्मदभिप्रेता वादिभिराविर्दर्शिता भवतीत्युपसंहरति। एवं हीति। तत्राद्यं पादं व्याकरोति। अथेत्या
दिना। क्रमपक्षे पूर्वं निष्पन्नमेव तदिच्छेतच्छक्त्या न परामृश्यते द्वितीयं पादं योजयति। अथेत्यादिना। द्वितीयार्द्धं विवृणोति। ए
रस्यो ते२ वमितीति। बीजांकुरयोरिव हेतुफलयोरन्यं कार्यकारणभावाभ्युपगमान्नान्यो न्यास्त्रयत्वमित्याशंक्याह। बीजेति। दृष्टांतस्य
साध्यसमत्वेऽपि साधकमस्त्वीत्याशंक्याह। नहीति। श्लोकापेक्षं चोद्यमुद्भावयति। नन्विति। शब्दमात्रविवक्षितार्थस्य
न्यशब्दमाश्रित्य फलप्रयोगमेवोदाहरति। पुत्रादिति। आदि शब्देन फलादुत्पद्यमानः सन्नते हेतुः प्रसिद्ध्यतीत्यादि ग्रहणे

मा०भा०
त्री०

कार्यकारणभावो हेतुफलयोरित्यज्ञानमभिप्रेतमर्थं कथयति। नहीति। तत्रैव प्रश्नपूर्वकमभिप्रेतमर्थमुदाहरति। किं तर्हीति। दृष्टांत
संप्रतिपत्त्या परिहरति। अत्रेति। मायावादिमते क्वचिदपि कार्यकारणभावस्यावस्तुभूतस्यासंप्रतिपन्नमित्युक्तं प्रत्यक्षावष्टंभेन
दृष्टांते साधयन्नाशंकते। नन्विति। बीजांकुरव्यक्त्योरिदं कार्यकारणत्वमिष्यते किं वा बीजांकुरसंतानयोरिति विकल्प्याद्यं दूषय
ति। न पूर्वस्येति। तदेव प्रपंचयति। यथेत्यादिना। बीजव्यक्तेरंकुरव्यक्तौ उक्तप्रकारेणानादित्वस्यान्योन्यकारणत्वस्य चानुपपत्ति
रिति शेषः। कल्पांतरमुत्थापयति। अथेति। बीजसंततेरंकुरसंततेश्चानादित्वमन्योन्यं कारणत्वं चाविरुद्धं सिध्यति बीजजातीयादं
कुरजातीयमंकुरजातीयाद्बीजजातीयमुत्पद्यमानमुपलभ्यते तथैव हेतुजातीयात्फलजातीयं फलजातीयाद्धेतुजातीयमित्य
विरुद्धमित्यर्थः। दृष्टांते दार्ष्टांतिके च संततेरेकस्याः व्यक्तेर्व्यतिरेकेणासंभवान्नैवमिति दूषयति। नेत्यादिना। तदेव प्रपंचयति। नहीति त
दनादित्ववादिभिस्तासु व्यक्तिषु मिथो हेतुत्वमनादित्वं तदिदं तच्छीलैरिति यावत्। अन्योन्याश्रयत्वादनवस्थानाद्वा हेतुफलयो
र्मिथो हेतुफलभावस्य वक्तुमशक्यत्वात् दृष्टांतदार्ष्टांतिकयोरनुपपत्तिः सिद्धेत्युपसंहरति। तस्मादिति। दृष्टांतस्यासंप्रतिपन्न
त्वे स्थिते कार्यकारणत्वस्य क्वचिदपि संप्रतिपत्त्यभावात् सुतरामज्ञानमपि तुर्य एवेत्यादिना छलं प्रयुक्तमिति फलितमाह। तथा चेति।
श्लोकस्य पूर्वार्द्धं व्याख्यायोत्तरार्द्धं व्याचष्टे। न वेति। किमिति हेतुशब्दस्य मुख्यमर्थं त्यक्त्वा गौणो योग इत्येतत्प्रकरणसामर्थ्या
दित्याह। प्रकृतो हीति। हेतुफलभावानुपपत्तिमुपपादितामुपसंहर्तुमिति शेषः। यत्तु नरन्योन्यपक्षे प्रतिक्षिप्ते द्विरजातिर्वस्तुनो ज्ञा
पिता पक्षिकैरिष्टः परिशिष्टं तत्र कथं अजातिर्वस्तुनो ज्ञापितेत्याशंक्याह। पूर्वापरेति। कार्यस्य गृह्यमाणत्वादजातिरसिद्धेत्या
शंक्य कारणस्यादिर्न गृह्यते ह्यतो वादिनेतरेतराश्रयादजातिर तीव्रव्यक्तासिद्धमितीत्याह। जायमानादिति। न त्वपूर्वार्द्धं प्रश्नद्वारा विवृ
णोति। कथमित्यादिना। नियतपूर्वापर्यनिर्द्धारिते जातिं सिध्यति तदभावेन तदसिद्धिरित्यर्थः। द्वितीयार्द्धं विभजते। जायमानो हीति।
७ कुतो कार्यस्य ग्रहणे कारणं ग्रहीतव्यमिति नियम्यते तत्राह। अग्रहणं हीति। कार्यकारणयोर्नियतसंबंधत्वेतरेतराश्रयात् दुर्ग्रहत्वा
दजातिरेव वस्तुनो ज्ञापितेत्युपसंहरति। तस्मादिति। कार्यकारणयोर्दुर्ज्ञानत्वं तच्छब्देन परामृश्यते वस्तुनो वस्तुतो जन्म नास्तीति
विकल्पपूर्वकं साधयति। स्वतो वेत्यादिना। कस्यचिदपि वस्तुनो वस्तुतो जन्म नास्तीत्यस्मिन्नर्थे हेत्वंतरपरत्वं श्लोकस्य दर्श ७७
यति। इतश्चेति। इतश्चाद्वैतार्थमेव स्फोरयितुं जायमानमनूद्य बोद्धा विकल्पयति। यज्जायमानमिति। सर्वत्रापि पक्षेषु दोषसंभावा
नां सूचयति। न तस्येति। तत्राद्यं दूषयति। न तावदिति। स्वयमेवाजायमानं कार्यं स्वस्मादेव स्वरूपान्नावजायते स्वयमेवस्यापेक्षामि
तरेण स्वकारणाधीनतया परिनिष्पन्नत्वादन्यथा स्वसिद्धेः स्वसिद्धिरित्यात्माश्रयः नहि घटादेव घटो जायमानो दृष्टोऽस्तीत्यर्थः
द्वितीयं प्रत्याह। नापीति। न खल्वन्यत्वं जनकत्वे प्रयोजकं घटादपि पटोत्पत्तिप्रसंगात्। न चोत्पादकत्वयोग्यविशेषितमन्यत्वं त

घेतिवाच्यं। उत्पन्निमित्तान्तरेण तद्योग्यत्वस्य दुरवगमत्वादित्यर्थः। तृतीयं निरस्यति। तथेति। विरोधमेव दृष्टांतद्वारा स्पष्टयति। यथे
ति। नहि घटपटाभ्यां घटः पटो वा जायमानो दृश्यते। तथा जायमानं स्वस्मादन्यस्माच्च भवतीत्यनुपपन्नमित्यर्थः। अन्यत्वे सत्य
पि जन्यजनकभावस्य प्रत्यक्षत्वान्नासौ शक्यते प्रतिक्षेप्तुमिति शंकते। नन्विति। किं प्रत्यक्षानुसारिणो शब्दप्रत्ययावविवेकि
नामिष्यते। किं वाविवेकिनामिति विकल्प्य प्रथमं स्वीकरोति। सत्यमिति। द्वितीयं प्रत्याह। तावेवेति। मृषैवेति। परीक्षमाणे सतीति
संबंधः। तच्च जन्मशब्दधीविषयं वस्तु शब्दमात्रमेव वाचारंभणश्रवणान्न परमार्थतो यावत्तद्विचने तस्मादसत्यालंबनमेव शब्द
प्रत्यययोरेकत्वमिति योजना। चतुर्थं शिथिलयति। सत्त्विति। पंचमं निराकरोति। यदीति। षष्ठं प्रत्यादिशति। अथेत्यादिना षण्णां
विकल्पानां निरासे फलितं निगमयति। अतो नेति। क्रियाकारकफलनानात्वपक्षे जन्मानुपपत्तिदोषमुक्त्वा पक्षान्तरमनूद्य दूष
यति। यत्पुनरिति। बौद्धानां न्यायमवष्टंभेन वस्तु व्यवस्थापयतां कुतोऽन्यायव्यवस्थितिरित्याशंक्याह। इदमिति। इदमा वस्तु परामृष्टं
इष्टमिति। क्षणिकत्वं विवक्षितं। एवमवधारणाविच्छिन्ने क्षणे वस्त्ववच्छेदक्षणातिरिक्तवस्तुनोऽवस्थानाभावान्न तस्मिन्ननुभू
यमतीत्यर्थः। न च तस्मिन्ननुभूते स्मृतिरुत्पद्यते। तथा चावस्तुनि प्रत्ययदर्पासिद्धौ व्यवहारासिद्धिरित्याह। अननुभूतस्येति। व
स्तुनोऽवस्तुतो जन्मराहित्ये हेत्वन्तरमाह। हेतुर्नेति। नानादेः फलाद्धेतुः जायते। नहि फलस्यानादित्वे ततो हेतुजन्मयुक्तं सदा
तज्जन्मप्रसंगादित्यर्थः। फलमपि न हेतोरनादेर्जायते दोषसाम्यादित्याह। फलं चेति। नापि स्वभावतो निमित्तान्तरेण फलहेतु
र्वा जायते तत्र हेतुमाह। आदिरिति। कारणरहितस्य जन्मानुपलब्धेरित्यर्थः। वस्तुनो वस्तुतो जन्मराहित्ये हेत्वंतरपरत्वं श्लोकस्य
सूचयति। किंचेति। हेत्वंतरमेव दर्शयितुं प्रथमं प्रतिज्ञां करोति। हेत्विति। फलाद्धेतुर्जायते ततश्च फलमित्यभ्युपगमात् कथमज
न्माभ्युपगतमिति पृच्छति। कथमिति। तत्राद्यपादाक्षरयोजनया परिहरति। अनादेरिति। तदेवोपपादयति। नहीति। फलं कार्यका
रणसंघातो हेतुर्धर्मादिः। फलं चापीति विभागं विभजते। फलं चेति। अजायत इति नाभ्युपगम्यत इति संबंधः। स्वभावत इति पदं योजय
ति। स्वभावत एवेति। फलितं निगमयति। तस्मादिति। न हेतुफलयोर्जन्मवतोरनादित्वमुपगंतुं शक्यं। अभ्युपगमे च जन्मैव तयोरा क
स्मिकं स्यादित्यर्थः। स्वभाववादनिराकरणं प्रतिज्ञातमुत्तरार्धावष्टंभेन प्रतिपादयति। यस्मादिति। वस्तुनो वस्तुतो जन्माद्यभावादद्वं
विज्ञानमात्रं तत्त्वमित्युक्तमिदानीं बाह्यार्थवादमुत्थापयति। ज्ञानेति। ज्ञानस्य स्वविषयत्वप्रत्ययवैचित्र्यानुपपत्तिं प्रमाणयति। अग्नी
ति। अग्निदाहादिप्रयुक्तदुःखोपलब्ध्यनुपपत्तेरस्ति बाह्योऽर्थो धीरित्याह। संक्लेशस्येति। परतंत्रं परकीयं शास्त्रं तस्यास्ति तां बाह्या
र्थस्याविद्यमानतेति यावत्। श्लोकस्य तात्पर्यमाह। वक्रस्येवेति। वस्तुनोऽस्ति वस्तुनो जन्मेत्युक्तार्थी तस्यैव दृढिक ×नहि वस्य×
रणं पूर्वोत्तरपक्षाभ्यां चिकीर्षते। तया पुनराक्षेपमुखेन बाह्यार्थवादिनां प्रस्थानं समुत्थापयतीत्यर्थः। ब्रह्मस्वरूपभूतां प्रज्ञप्तिं
प्रतिषेधयति। शब्दादीति। साकारवादं व्युदस्यति। स्वात्मेति। ग्राह्यग्राहकविषयनिरपेक्षत्वान्न स्यातिरिक्ता विषयते त्याशंक्याह। न

नो ३

हीति। सन्निमित्तत्वं सविषयत्वेन स्फुरणं तमेव हेतुं द्वितीयपादयोजनया विशदयति। अन्यथेति। प्रसंगस्येष्टत्वं प्रत्याचष्टे। नचेति। प्रत्य
यवैचित्र्यानुपपत्तिप्रयुक्तं फलं चतुर्थपादव्याख्यानेन कथयति। अत इति। ननु ज्ञानानां स्वभावभेदेनैव बाह्यालंबनवैचित्र्यमंतरेणास्व
गतेर्वैचित्र्यं घटिष्यते तत्राह। नहीति। औपाधिकं तर्हि प्रत्ययवैचित्र्यमित्याशंक्य बाह्यार्थातिरिक्तोपाध्यनधिगमान्मैवमित्याह
स्फटिकस्येति। तृतीयपादं हेत्वंतरपरत्वेनावतारयति। इतश्चेति। तस्योपलब्धिमुपपादयति। उपलभ्यते हीति। तदुपलंभेऽपि कुतो
बाह्यार्थसिद्धिरित्याह। यदीति। उपलब्धिरेव तर्हि दुःखस्य माभूदिति चेन्न स्वानुभवविरोधादित्याह। उपलभ्यते त्विति। विशिष्टदुः
खोपलब्ध्यनुपपत्तिसिद्धं फलमाह। अत इति। विज्ञानातिरिक्तबाह्यार्थाभावेऽपि क्लेशोपलब्धिरविरुद्धेत्याशंक्याह। नहीति। अन्य
त्रदाहच्छेदादिव्यतिरिक्ते चंदनपंकलेपादावितियावत्। हाभ्युपगमार्थापत्तिभ्यां बाह्यार्थवादे प्राप्ते विज्ञानवादमुद्भावयति। प्रज्ञापारि
२८ ति। अस्तु का नो वस्तुक्षतिरित्याशंक्याह। निमित्तस्येति। मतांतरेष्वाग्रहे तन्निराकरणमुच्यते। विज्ञानवादिनेति। श्लोकस्य तात्प
र्यमाह। अत्रेति। तत्र पूर्वार्द्ध इति प्रसज्यते। बाढमित्यादिना। हेतिनस्त्वव तर्कप्रधानत्वान्न प्रतीतिमात्रव्यवहारपातायुक्तेति मत्वाह। स्थि
रिभवेति। वस्तुनो बाह्यस्यार्थस्य तथात्वं प्रज्ञप्तिविषयत्वं तस्याभ्युपगमे कारणं प्रागुक्तयुक्तिदर्शनमित्येतस्मिन्नर्थेऽनुस्थि
रिभवेति प्रयोजनमा। विचारदृष्टिमेवावष्टभ्याह। वर्त्मा। किं ततो दूषणं। अहीति पृच्छति। अहीति। तत्रोत्तरार्द्धं सिद्धांती व्याकुर्वन्नु
त्तरमाह। उच्यत इत्यादिना। घटादेर्वैचित्र्याहेतुत्वे प्रश्नपूर्वकं हेतुमाह। कथमित्यादिना परमार्थदर्शनं प्रपंचयति। नहीति
तत्र वैधर्म्यदृष्टांतमाह। यथेति। घटे दर्शितन्यायं पटे विदर्शयति। पट इति। तंतुष्वपि न्यायसाम्यमुदाहरति। तत इति। परमार्थ
दर्शने फलमुपसंहरति। स्यवमिति। घटादीनां स्वकारणव्यतिरेकेणासतां न प्रत्ययवैचित्र्यहेतुत्वमतो घटादिप्रत्यय
२ वत्तत्प्रत्ययानामपि प्रत्ययत्वाविशेषाद्वास्तवालंबनवर्जितानि मंतव्यानीत्यर्थः। भूतदर्शने यौक्तिकं तत्वदर्शनं ततो निमि २८
त्तस्यानिमित्तत्वमिति व्याख्यानं। इदानीमभूतदर्शनादितिपदच्छेदेन व्याख्यानांतरमाह। अथवेति। यथा रज्ज्वादावधिष्ठा
नसर्पादेरारोपितस्य दर्शनान्न तु स्ववस्तुतो दर्शनमसत्यालंबनत्वमिष्टं। तथैवाधिष्ठानज्ञानापेक्षया परमार्थतोऽदर्शना
त्वाह्यस्यार्थस्य ज्ञानं प्र त्यालंबनत्वं वास्तवमभ्युपगंतुमशक्यमित्यर्थः। किंच विमतो बाह्योर्थो न तत्वतो ज्ञानं प्रत्या
लंबनं भ्रांतिविषयत्वात् रज्ज्वां सर्पादिवदित्याह। भ्रांतीति। हेतुं साधयति। तदभाव इति। भ्रांत्यभावे बाह्योर्थो न भातीत्युक्तं
हेतुं प्रपंचयति। नहीति। देहाभिमानवतो बाह्यार्थप्रतिभानध्रौव्याद्वैतदर्शिनोऽपि तत्प्रतिभानमप्रत्यूहं प्राप्नोतीत्याह। न २९
सुन्मत्तेति। बाह्यार्थसमर्थनार्थमुक्तमर्थापत्तिद्वयं कथं निरसनीयमित्याशंक्याह। एतेनेति। तत्वदर्शिनां स्फुरणातिरि
क्तेषु वस्त्वनुपलंभप्रदर्शनेन वैचित्र्यदर्शनं दुःखोपलब्धिश्च प्रत्युक्ता तेनानुपपद्यमानार्थापत्तिर्हि यस्योत्तुष्ठानं च
वहारदृष्ट्यानुपूर्वभ्रमसमारोपितं स्वप्नघटदेववैचित्र्यं दुःखं च व्यवहारांगमित्यन्यथाप्युपपत्तिरित्यर्थः। ज्ञानस्यसा
शक्या

लंबनत्वप्रसिद्धेस्तत्वदृष्ट्या ज्ञेयाभावे ज्ञानमपि न स्यादित्याशंक्याह। चित्तमिति। नहि स्फुरणं सकर्मकं तस्य सकर्मकत्वप्रसिद्धि
भावात्। जानातेस्तु सकर्मकत्वं क्रियाफलत्वकल्पनया स्वीकृतमिति भावः। चित्तस्यार्थस्पर्शित्वाभावेपि तदाभासस्पर्शित्वं
स्यादित्याशंक्याह। नार्थेति। तत्र हेतुमाह। अभूतो हीति। प्रथमपादं व्याचष्टे। परस्मादिति। विमतं चित्तं अर्थाभासमपि न स्पृशतीति चित्त
त्वात् संप्रतिपन्नवदिति। द्वितीयं पादं विभजते। नापीति। नहि दृष्टांते तस्यार्थाभासस्पर्शित्वं तस्यैव तदात्मना भानादित्यर्थः। तृ
तीयं पादं व्याकरोति। अभूतो हीति। विमतोऽर्थः सन्न भवति। अर्थत्वात् संप्रतिपन्नवदित्यनुमानान्न ज्ञानस्यालंबनमित्यर्थः। विम
तोऽर्थः स्वविषयज्ञानजनको न भवति। भ्रांतिविषयत्वात्संप्रतिपन्नवदित्युक्तमनुमानं स्मारयति। ठकेति। अर्थजन्यत्वाभावेपि
ज्ञानस्यार्थाभासजन्यत्वं स्यादित्याशंक्य चतुर्थपादार्थमाह। नापीति। ज्ञानस्य सालंबनत्वाभावे तस्य तथात्वे प्रथा भ्रांतिरपि वेत
भ्रांतिश्चाभ्रांतिप्रतियोगिनी त्वन्यथाख्यातिमतमाशंक्याह। निमित्तमिति। कालत्रयेपि ज्ञानस्य वस्तुनोऽर्थस्पर्शित्वाभावे तदाभास
नाभावान्न ज्ञानत्यानान्यथाख्यातिः सिध्यति भ्रांतिस्तु विधांतरेणापि भविष्यतीत्याह। अनिमित्तइति। श्लोकव्यावृत्त्यमाशंकां दर्शय
ति। नन्विति। यदि घटादिर्बाह्योऽर्थो नारभ्यते तर्हि तस्मिन् सत्येव तदाभासता ज्ञानस्य तस्य विपर्यासः तस्मिंस्तु दुष्टे तत्र बाह्यविपर्या
व सस्वीकृते कश्चिदविपर्यासो वक्तव्यः भ्रांतेरभ्रांतिपूर्वकत्वस्यान्यथाख्यातिवादिभिरिष्टत्वादित्यर्थः। तत्र पूर्वार्द्धयोजनया परिह
रति। अत्रेति। उक्तमेवार्थमुत्तरार्द्धयोजनया साधयति। यदि हीति। अभ्रांतेरभावादसंभ्रांतेरसति घटादौ घटाद्याभासता ज्ञानस्य भवे
कथं निर्वहतीत्याशंक्याह। अयमेवेति। स्वभावश्चैवमनादिविद्योच्यते। नहि भ्रांतिरभ्रांतिपूर्विकेति नियमः विषाद्यापातभ्रमाणामवि
द्यात्वाभ्युपगमादित्यर्थः। बाह्यार्थवादिपक्षमेवं विज्ञानवादिमुखेन प्रतिक्षिप्य विज्ञानवादमिदानीमपवदति। तस्मादिति। प्रतिक्षिप्तं
विज्ञानस्य जन्म दर्शयते विज्ञानवादिभिरित्याशंक्याह। तस्येति। वृत्तसंकीर्तनपूर्वकं श्लोकस्य तात्पर्यमाह। उत्तरेति। तत्र बाह्यार्थ
वादिनो बाह्योऽर्थो विज्ञानवदस्तीति पक्षप्रतिषेधमुखेन प्रवृत्तं तत्पुनराचार्येणाभ्युपेयमित्यनुज्ञातं बाह्यार्थवाददूषणस्य स्वमते
पि संमतत्वादित्याह। बाह्यार्थेति। बाह्यार्थवाददूषणानुमोदनप्रयोजनमाह। तदेवेति। अत्र सत्येव घटादौ घटाद्याभासवत्वं विज्ञान
स्य यदुक्तं तदेव हेतुत्वेनोपादाय विज्ञानवादनिषेधार्थं बाह्यार्थपक्षदूषणमनुमोदितमित्यर्थः। संप्रति विज्ञानवाददूषणमवता
रयति। तदिदमिति। तस्मादित्यादि व्याचष्टे। परस्मादिति। भूतदर्शनात् घटादेर्मृदादिमात्रं भूतं वस्तु तत्त्वं तस्यापि विज्ञानमात्रं तस्या
स्त्रेऽदर्शनादित्यावत्। द्वितीयं पादं दृष्टांतत्वेन विभजते। यथेति। विमतं विज्ञानं जन्मनतादिकं दृश्यत्वान्नीलपीतादिवदित्यर्थः।
विपक्षे दोषमाह। अजातइति। तत्वतो विज्ञानस्य जन्माभ्युपगमे तस्य तत्त्वाविकं जन्म पश्यंति ते पश्यादीनां खेपि पदं पश्यंतीत्यन्वयः। अ
नात्मत्वादीत्यादिशब्देनान्योन्यविलक्षणत्वमन्योन्यसादृश्यं च गृह्यते। तत्र हेतुं सूचयति। तेनैवेति स्वदृष्टेरनुपपत्तेस्तद्दृश्यते।

मंतरेणा चेतङ्कर्मदर्शयतासंभवादित्यर्थः। विज्ञानवादे फलितं विशेषं दर्शयति। अन इति। शून्यवादिनं प्रति विशेषं कथयति। येपीति। परस्पंत
एवेत्यविलुप्तदृक्स्वरूपतायोत्पत्तेर्दृग्बलादेव सर्वाभावः सिध्यति दृगभावस्तु कथं सिध्येन्नचैतां दृगेव तदभावं साधयेत्तयोरेककालत्वानु
पपत्तेरित्यर्थः। किंच सर्वशून्यतां वदतः शून्यतादर्शनस्य स्वात्मदर्शनस्य च शून्यतां वदंति तथा च स्वपक्षासिद्धिरित्यभिप्रेत्याह। स्वदर्शनस्येति
ततोपीति विज्ञानवादिभ्योपीत्यर्थः। यदि विज्ञानस्य बाह्यालंबनत्वं क्षणिकं शून्यत्वं च न संभवति किं तर्हि नित्यमेकस्वरूपं संभवतीत्याकांक्षायामाह न्यः३
अजातमिति। तस्या अप्रकृतेरन्यथात्वं पुरस्तादेव निरस्तमित्याह। प्रकृतेरिति। श्लोकस्य तात्पर्यमाह। उक्तेरिति। कूटस्थमद्वितीयं ब्रह्मेति यत्प्र
वंच प्रतिज्ञातं तज्जन्मनो दुर्निरूपत्वादुक्तहेतुभिः सिद्धं तस्यैव सिद्धस्यार्थस्य फलमुपसंहर्तुमेष श्लोक इत्यर्थः। पूर्वार्द्धं योजयति। अजातमि
ति। यदि चित्तं स्फुरणमजातमभीष्टं तर्हि तद्ब्रह्मैव तस्य कूटस्थैकस्याभावात्तत्तु न वस्तुतो न जातमेवमाद्यजन्मवदिति कल्प्यते चेत्तत्स्या
जातिरेवाजातित्वात्प्रकृतिर्भवतीत्यर्थः। द्वितीयार्द्धं योजयति। अजातरूपाया इति। तस्याश्चेदन्यत्वं स्वरूपहानिरापतेदित्यर्थः। कूटस्थे तत्त्वंना
तिकमित्यत्र हेतुं तरमाह। अनादेरिति। विमतः संसारो नांतवाननादिभावत्वादात्मवदित्यर्थः। किंच मोक्षोऽनंतो न भावत्वे सत्यादिमत्त्वात् घटादि थाः८
वदित्याह। अनंतेति। श्लोकस्य तात्पर्यमाह। अयं चेति। तत्र पूर्वार्द्धं व्याकरोति। अनादेरिति। अतीतकोटिरहितस्य पूर्वं नासीदित्यवच्छेदवर्जि
तस्येत्यर्थः। योऽनादिभावः सोंतवानेति व्याप्तिरात्मनि व्यभिचरत्याह। नेति। बीजांकुरयोर्हेतुफलभावेन संबंधस्तस्यानेरंतर्येण संतानस्यान
दिभावत्वेपि विच्छेदस्यांतस्य दृष्टत्वात्तदनैकांतिकेति शंकते। बीजेति। भावत्वविशेषणांशस्य तत्रावर्तनान्न व्यभिचारशंकेति दूषयति। नैकेति।
द्वितीयार्द्धं व्याचष्टे। तथेति। यत्रादिमत्त्वं तत्रानंतत्वमिति व्याप्तिभूमिमाह। घटादिष्विति। यथा कृतको घटादिध्वंसो नित्यस्तथा बंधध्वंसोपि
भविष्यतीत्यनैकांतिकत्वमाशंकते। घटादीति। मोक्षस्याभावत्वे सति परमार्थसत्त्वप्रतिज्ञाभंग्येत्तेति दूषयति। तथा चेति। किंच प्रागसतः स
त्तासमवायरूपं कार्यत्वं तदपि मोक्षस्यास्त्वेन सिद्धमितीत्याह। सत्त्वादेवेति। अस्तु तर्हि मोक्षस्यानंतत्वेन तत्राह। आदाविति। यदि त्वपूर्वो
दकादिगृहीतोऽथ च स्तुतो नास्य वेति यावत्। वितथैस्तैरेव मरीच्युदकादिभिः सादृश्यमापन्नत्वं विमता मोक्षादयो न परमार्थसंतो
भवितुमर्हंत्याद्यंतवत्त्वान्मरीच्युदकादिवदित्यर्थः। कथं तर्हि मोक्षादीनामपि तथात्वं प्रत्येत्याशंक्याह। सवितथाइति। लक्षिता मूढैरविद्या
रकेरिति शेषः। उपरोदकादीनां स्नानपानादिप्रयोजनोनुपलंभान्मोक्षस्वर्गादीनां तु सुखादिप्राप्तिप्रयोजनप्रतिलंभान्नेमोक्षा
दिवैतथ्यमित्याशंक्याह। सप्रयोजनतेति। तेषां मोक्षादीनामिति यावत्। पुनरुक्तिं शंकां वारयति। वैतथ्य इति। किंच येन हेतुना स्वप्न ८७
स्य मिथ्यात्वमिष्टं तस्य जागरितेपि तुल्यत्वाज्जन्मादिरहितं सविन्मात्रं तत्त्वमेष्टव्यमिति विवक्षित्वाह। सर्वेति। यदि देहांतदर्श
नान्मिथ्यात्वं स्वप्नस्येष्टं तर्हि वैराजदेहे सर्वस्य जागरितस्य दर्शनात्तन्मिथ्यात्वं दुर्वारमित्यर्थः। किंच योग्यदेशवैधुर्यान्मिथ्या
त्वं स्वप्नस्य यद्यभीष्टं तर्हि संवृतेजदेशे प्रत्यग्भूते ब्रह्मांडखंडेकरसंभूतानां विद्यमानानां दर्शनं न कुतोपि स्यात्तब्रह्मयोन।

वकाशत्वादित्याह । मंद इति । अवतारितश्लोकसहितानामुत्तरश्लोकानां जात्याभाससमित्यस्मात्प्राक्तनानां तात्पर्यमाह । निमित्तस्ये
तिरक्रमेवार्थं प्रपंचयति । न युक्तमित्यादिना । स्वप्ने देशांतरगतो नियतकालाभावान्नगत्वादर्शनमिष्टं । तथाप्यस्या दृष्टमविरा
दिमार्गपातत्वाद्भ्रमदर्शनमयुक्तं कालानवच्छिन्नत्वादित्यर्थः । किंच यद्देशस्थः स्वप्नं पश्यति प्रतिबुद्धस्तस्मिन्देशे नास्तीति मिथ्यात्व
मभीष्टं । तथा यस्मिन्देहे स्थितः संसारमनुभवति भ्रमभावं प्रतिपन्नस्तस्मिन्देहदेशे नास्ति पूर्वं च स्वरूपेणावस्थानादतो जागरित
स्यापि मिथ्यात्वमेष्टव्यमित्याह । प्रतिबुद्धश्चेति । श्लोकस्य तात्पर्यं कथयति । जागरित इति । किंच यथा स्वप्ने संवादादप्रमाण्यमिष्टं
तथा जागरितेऽपि परं श्रेयः स्वाभिः साधनीयमिति ब्रह्मवादिभिः सह समालोच्याविद्यानिद्रातः प्रतिबुद्धो नैव श्रेयः साध्यत्वमालो वि ५
चितं प्रतिपद्यते सर्वस्यानित्यमुक्तत्वनिश्चयादतो मुमुक्षुत्वं श्रवणादिकर्तव्यता च भ्रांत्यैवेत्याह । मित्राद्यैरिति । किंच स्वप्नवदेव गृही
तमुपदेशादिविहायान्यपश्यतीति तत्साध्यफलाभावादित्याह । गृहीतं चेति । अथवा लोकदृष्ट्याय यत्किंचिद्गृहीतं तद्वत्स्वप्नोदकादित
द्विहानेव किंचित्करोमीति प्रतिबुद्धोऽप्यप्रत्ययबाधात्तु न स्वसंबंधित्वेनावगच्छतीति तेन तदाभासमात्रमेवेत्याह । गृहीतं चेति । उ
क्तमर्थं विवक्षित्वा श्लोकाक्षराणि योजयति । मित्राद्यैरित्यादिना । किंच स्वप्नावस्थायां येन देहेन नाड्यादिषु पर्यटति स मिथ्याप
यम्भूतस्य निश्चलस्य देहस्य दर्शनात् । तथा जागरितेऽपि येन परिव्राजकादिशरीरेण लोकस्य पूज्यो द्वेष्यो वा दृश्यते स मिथ्याक
ख्यते पृथगेव कूटस्थब्रह्मात्मशरीरस्यानुभवादित्याह । स्वप्ने चेति । किंच यथा स्वप्ने देहो मिथ्या तथा चित्तदृश्यं जडं सर्वमवस्तु मि
थ्याभूतमपि तद्वदित्याह । यथेति । पूर्वार्द्धगतान्यक्षराणि योजयति । स्वप्न इति । उत्तरार्द्धगतानि व्याकरोति । यथेत्यादिना प्रकर
णार्थमुपसंहरति । स्वप्नेति । यथा जागरितं तथा स्वप्नो गृह्यते तथा च स्वप्नस्य जागरितकार्यत्वाद्यः स्वप्नद्रष्टा तस्यैव जागरितं सदिति
स्वप्नवत्तन्मिथ्यात्वमित्याह । भावहेतुत्वादिति । किंच जागरितस्य विद्यमानत्वमनेकसाधारणत्वं च वस्तुतो नास्ति स्वप्नप्रकारत्वात्
किंतु तदाभाससमानत्वमित्याह । तद्धेतुत्वादिति । जागरितस्य च वस्तुतोऽसत्त्वे हेत्वंतरं श्लोकस्य दर्शयति । इतश्चेति । इतश्चाहार्थ पर
मेव स्फुटयन्पूर्वार्द्धं योजयति । जागरितवदिति । उत्तरार्द्धं योजयति । तद्धेतुत्वादिति । सति प्रमातरि बाध्यत्वं स्वप्नस्य मिथ्यात्वं जा
गरितस्य पुनस्तदनुपलंभात्परमार्थतः सत्त्वं कार्यस्य मिथ्यात्वे कारणस्यापि मिथ्यात्वमिति मानाभावात् । नहि सर्वसाधारणं
विद्यमानं च जागरितं मिथ्या भवितुं युक्तमित्याशंक्याह । यथेत्यादिना । कार्यकारणभावेऽपि स्वप्नजागरितयोर्न मिथ्यात्वम
विशिष्टमस्तीति वैषम्यादित्याशंक्याह । उत्पादस्येति । ननु कार्यकारणत्वं सत्योः सत्योरेव स्वप्नजागरितयोरित्युक्तं तद्दुरुक्तमि
त्याह । नवेति । श्लोकव्यावर्त्यामाशंकामाह । नन्विति । किमिदं वैलक्षण्यमविवेकिनां प्रतिभाति किं वा विवेकिनामपीति वि
कल्प्याद्यमंगीकरोति । सत्यमिति । द्वितीयमाह । विवेकिनां त्विति । द्वितीयभागमाकांक्षाद्वारा विभजते । यदपीत्यादिना । संभ
वे नासतोऽस्तीत्येतदृष्टांतेन साधयति । नहीति । कथंचिदपि सतो सतो वेत्यर्थः । यदुक्तमुत्पादस्याप्रसिद्धत्वं तदसुक्तं स्वप्न

स्वप्नजागरितयोस्तथा कार्यकारणत्वांगीकरणादित्याशंक्याह। असदिति। जागरिते दृष्टस्य स्वप्ने दर्शनाज्जागरितस्य स्वप्नं प्रति कारणत्वं
वेन्न हि स्वप्ने दृष्टस्य जागरितेपि दर्शनात्तस्य जागरितं कारणत्वं किं न स्यादित्याशंक्याह। असत्स्वप्नेपीति। श्लोकस्य व्याख्यावस्मामा
शंकामुत्थापयति। नन्विति। पूर्वापरविरोधे परिचोदिते परिहारे कथ्यमाने मनःसमाधानं प्रार्थ्यते। स्वत्विति। तमेव प्रकारं प्रकटय
न्नक्षराणि योजयति। असदिति। तुच्छत्वं व्यवच्छिनत्ति। रज्ज्विति। दर्शनस्याभासत्वं सूचयति। विकल्पितमिति। यथा जाग्रद्दृष्टस्य विशे
षस्य स्वप्ने दर्शनाज्जाग्रद्वासनाधीनः स्वप्नो जागरितकार्यत्वेन व्यवह्रियते तथा स्वप्ने दृष्टस्य जागरितेपि दर्शनात्तत्कार्यत्वं जाग
रितस्य प्राप्तमित्याशंक्य द्वितीयार्धं व्याचष्टे। नचेति। यत्तु स्वप्नजागरितयोरुक्तं कार्यकारणत्वं तदपि न नियतमिति निपातार्थः कथ
यति। चकारादिति। तस्मादित्यादेरर्थः स्वप्नस्य जागरद्वासनाधीनत्वादिति भावः। जागरितस्य परमार्थसत्वात्तत्कार्यस्य स्वप्नस्यापि
तादात्म्यात्तथात्वं विवक्षित्वा कार्यकारणत्वं कथं न भवतीति व्याख्यातं कथयति। नान्विति। व्यवहारदृष्ट्या कार्यकारणत्वं स्वप्नजागरि
तयोरुक्तं तत्त्वदृष्ट्या त्वप्रसिद्धमेव न क्वचिदपि कार्यकारणत्वमिति वदन्नेव वस्तुनोऽज्ञानादेव स्वप्नवत्कार्यं भवति इति मतं व्यावर्तयति न
स्तीति। शून्यवादिनस्तु सदेव कार्यं जायते शून्यादिति मन्यंते तान्प्रत्याह। सदिति। नथेत्यनेन नास्तीत्येतदनुकृष्यते। सांख्यादय न॰
स्तु कार्यकारणयोर्द्वयोरपि सत्वं संगिरंते तान्प्रत्याह। सद्वेति। सद्भूमिकारणं मिथ्याप्रपंचस्य सृष्टेरित्येके वर्णयंति। तान्नु निराचष्टे
सद्धेतुकमिति। श्लोकस्य तात्पर्यमाह। परमार्थतस्त्विति। प्रसिद्धं कार्यकारणत्वं यथा कथापादप्रक्रियया प्रतिपादितमपि तु सुवित
मन्यथा प्रसिद्धिप्रकोपादित्याक्षिपति। कथमिति। अनिर्वाच्यं मायामयं कार्यकारणत्वं प्रतीतिमात्रप्रसिद्धमयोक्तिकम
भिकल्पप्रसिद्धिर्विरुद्धेत्यभिसंधायाद्यं पादं विभजते। नास्तीत्यादिना। द्वितीयं पादं व्याचष्टे। नत्वेत्यादिना। तृतीयं पादं व्याक
रोति। तथा सद्वेति। चतुर्थपादार्थमाह। [illegible]सदिति। अस्तु तर्हि प्रकारांतरेण कार्यकारणभाव इत्याशंक्य योग्यानुपलब्धिविरुद्धत्वान्
मेवमित्याह। नचेति। स्वप्नजागरितयोर्वस्तुनो नास्ति कार्यकारणत्वमित्यत्रैव हेत्वंतरमाह। विपर्यासादिति। श्लोकस्य तात्पर्यमा
ह। पुनरपीति। अक्षरार्थं कथयति। विपर्यासादित्यादिना। कश्चिदित्यस्य पूर्वेण क्रियापदेन संबंधः। दृष्टांतमनूद्य दार्ष्टांतिकमाह
त्वे६ यथेत्यादिना। तत्त्वदृष्ट्या कार्यकारणस्याप्रसिद्धेः कथं जन्मादिसूत्रमपूर्वैः सूत्रैर्जगत्कारणं ब्रह्म सूत्रितमित्याशंक्याह। उपलं
भादिति। अविवेकिनां विवेकोपायत्वेन कारणत्वमुपेत्य सूत्रकारप्रवृत्तिरित्यर्थः। श्लोकाक्षराणि व्याचष्टे। यावदित्यादिना। अत्र
न्री४ स्ति वस्तुभावो द्वैतस्येति शेषः। कार्यकारणभावमुपेत्य जन्मोपदिष्टम अद्वैतवादिनां मंदविवेकिषु विवेकदार्ढ्योपायत्वेन कथं त ४०
हुपदेशः स्यादित्याशंक्याह। तामिति। यदा ब्रह्मणः सकाशादशेषं जगद्भवतीत्यभ्युपेतं तदा तदतिरेकेण जगतोऽभावाद्ब्रह्मैव स
र्वमिति निश्चितं तेन हि पश्येषु च वेदांतेषु पूर्वापरपर्यालोचितेषु तदभ्यासिनां तेषां तदभ्यासप्रसादादेव कूटस्थाद्वितीयवस्तुविष
यविवेकदार्ढ्यसिद्धेस्तस्य नीत्यभिप्रेत्याद्वैतवादिभिर्जातिरुपदिष्टा न तु द्वैतस्य श्रुतितो न्यायतश्चानिरूपयितुमशक्यं परमार्थ

लं गृहीत्वा जातिरुपदिष्टा इत्यजातिरेव पारमार्थिकीत्यर्थः । चतुर्थपादार्थमाह तेनेति । तेषां विवेकोपायत्वेन जातिरुपदिष्टा इत्य
त्रोपक्रमं नुकूलयति । उपाय इति । उदरमंतरं कुरुते अथ तस्य भयं भवतीत्यादिश्रुतिभ्यो ब्रह्मणि विकारदर्शिनां भयप्राप्तिश्रूयते
तथा च श्रोत्रियाणामपि भेददर्शिनां नानानुरनाधूते तेत्याशंक्याह । अजातेरिति । नहि कल्याणकृत् कश्चिद्दुर्गतिं तात गच्छतीति स्मृतेस्तेषामात्यंतिक
पतनाभावेऽपि निंदानुपपत्त्या कांश्चिद्दोषलेशः संभवतीत्याशंक्य सम्यग्दर्शनाप्राप्तिप्रयुक्तं गर्भवासादिदोषमभ्यनुजानाति
दोषोऽपीति । अन्वयमादर्शयन्नुपादत्ते पूर्वतान्यक्षराणि योजयति । एवेत्यादिना चतुर्थपादं व्याचष्टे । यद्यपीति । कश्चिन्निंदानु
पपत्तिसूचितेति यावत् । यत्तु हेतुभ्यां द्वैतस्यास्तित्वमुक्तं तद्दूषयति । उपलंभादिति । श्लोकस्य व्यावर्त्यामाशंकामनूद्य दूषयति
नन्वित्यादिना । व्यभिचारस्यासिद्धिमाशंक्य परिहरति । कथमित्यादिना । उपलंभसमाचारौ मायाहस्त्यादेर्हस्तिनिवस्तुत्वाभावेऽपि
भवतस्तथा द्वैतेऽपि न तयोरस्तित्ववस्तुत्वसाधकत्वमित्युपहरति । तस्मादिति । भूतदर्शनावष्टंभेन निमित्तस्यानिमित्तत्वमुक्तमित्ये
तदेतैः श्लोकैर्विप्रपंचितं संप्रति भूतदर्शनमुपसंहरति । जात्याभासमिति । श्लोकाक्षराण्याकांक्षाद्वारा विवृणोति । किं पुनरित्यादि
ना । गोरश्वादीर्घत्वो ह्रस्यादेवदत्तस्य गुणवत्त्वेन द्रष्टत्वं स्फुटीक्रियते । पूर्वार्धार्थानुवादेनापरार्धं योजयति । जायत इत्यादिना विशे
षं प्रश्नपूर्वकं विशदयति । किं तदित्यादिना । ब्रह्मणश्चिद्रूपस्याजत्वमुपपादितमुपसंहरति । एवेनेति । चित्प्रतिबिंबानां जीवानां बि
बभूतब्रह्ममात्रत्वादजत्वमविशिष्टमित्याह । एवमिति । उक्तब्रह्मात्मैक्यज्ञानस्य फलमाह । एवमिति । श्लोकाक्षराणि व्याकरोति
एवमित्यादिना । कार्यकारणभावस्य दुर्भणत्वाद्यथोक्तो हेतवः चित्तचैतन्यं ब्रह्मेति यावत् । एवमिति । जातिबिंबानां बिंबमात्र
त्वं जीवानामपि प्रतिबिंबकल्पानां बिंबभूतब्रह्ममात्रत्वादित्यर्थः । अद्वयस्य बहुवचनभाक्त्वमयुक्तमित्याशंक्याह । धर्मा इति
ति उत्तरार्धं योजयति । एवमेवेति । विज्ञानं विज्ञप्तिरूपं ब्रह्मेत्यर्थः । यथोक्तज्ञानेमुख्यानधिकारिणोऽप्युपदिशति । त्यक्तेति । उक्तज्ञान
वतां संसारसंत्रासाभावे प्रमाणमाह । तत्त्वेति । विज्ञानमजमचलमेव जात्याभासं चलाभासं चेत्युक्तं तदिदानीं दृष्टांतेन प्रपंचय
ति । ऋजुवक्रादिकेति । अप्रच्युतपूर्वस्वरूपस्यासत्यनानाकाराभासो विवर्तस्तत्र विज्ञानस्य स्पंदितत्वं श्लोकस्य तात्पर्यमाह ६८
यथोक्तमिति । तत्र दृष्टांतभागं व्याचष्टे । यथा हीति । दार्ष्टांतिकं योजयति । तथेति । किमित्यविद्यामंतरेणामुख्यमेव स्पंदनं विज्ञा
नस्येष्यते तत्राह । न हीति । निरवयवस्य विभुनो विज्ञानस्य वस्तुतश्चलनविकल्पस्याविद्यमानमेव स्पंदनमित्यत्र वाक्योप
क्रमानुकूल्यं कथयति । अजेति । विज्ञानं शांतमित्युक्तं दृष्टांतेन स्पष्टयति । अस्पंदमानमिति । श्लोकाक्षराणि व्याकरोति । अस्पंद
मानमित्यादिना । तथाविधयेत्यत्राविद्ययेति छेदः । अलातदृष्टांते कथं ऋजुवक्रादीनामसत्त्वमित्याशंकायां निरूपणासहत्वादि
त्याह । अलात इति । यदा खल्वलातं स्पंदमानमवतिष्ठते तदा तस्मिन्नन्यतो देशांतरादागत्याभासा भवंतीति न शक्यं वक्तुं
ऋजुवक्राद्याभासानां देशांतरादागमनस्यानवगमात् यदा तदेवालातं निस्पंदनं स्पंदनवर्जितं वर्तते तदा न तेभ्योऽन्यत्राभासाभि
वर्तीत्यपि न युक्तं वक्तुं अनुपलंभाविशेषान्न चाभासास्तस्मिन्नेवालाते लीयंते तेन तदनुपादानत्वात् । यदि हि स्पंदनिमि

मा॰भा॰
अ॰१०

नमलातमुपादानं तदानिमित्ताभावमात्रान्नैमित्तिकाभावाद्दर्शनादृजुवक्राद्याकारांस्पंदनाभावेप्यलाते भवेयुरित्यर्थः। इतश्च दृष्टां
तदृष्टान्ताभासानां मिथ्यात्वमेवेष्टव्यमित्याह। किंचेति। हेत्वंतरमेतत्स्पष्टयन्पूर्वार्द्धाक्षराणि व्याचष्टे। तस्मिन्नेवेति। आभासानां
दि ॰ शांतरागमनस्यानुपलंभो हेतुः कर्त्तव्यः। अनुपलब्धिमेव हेतूकृत्य तृतीयपादार्थमाह। नचेति। चतुर्थपादार्थमाह। नवनि व२
स्पंदमिति। ऋजुवक्राद्याभासानां दृष्टान्ते निर्गमनप्रवेशयोरसंभवं साधयति। नेत्यादिना। दृष्टान्तनिर्विष्टाभासवहालोतिके
पित्तन्याद्याभासा मिथ्यैव भवेयुरित्याह। विज्ञानेपीति। ऋजुवक्राद्याकारेषु जन्माद्याकारेषु चाभासत्वस्य तुल्यत्वादि
म तिहेतुमाह। आभासस्येति। इतश्च दृष्टान्ते मिथ्यात्वंभासानामेष्टव्यमित्याह। किंचेति। तदेवपूर्वार्द्धयोजनया विशदयति। नेति
ऋजुवक्राद्याभासानां वस्तुनोऽभावेपि किमिति प्रवेशाद्यसिद्धिरित्याशंक्याह। वस्तुनो हीति। द्वितीयार्द्धं योजयन्नुदाहरति
कमात्वप्येत्। विज्ञानेपीति। तुल्यत्वं सार्द्धेनोत्तरश्लोकेन साधयति। कथमित्यादिना। नहि तस्मिन्न विज्ञाने पश्चात्कथंचिद्विच्छे
नवति तत्तोन्यस्मात्कस्माच्चिदागमजन्माद्याभासस्तत्रैभवितुमर्हति। तथापि प्रथमाभावान्नचैन [illegible] माधि
ज्ञानादवलंबनयावस्थितादन्यत्राभासा कथितुमुत्सहते। प्रतीत्यभावस्य तुल्यत्वात्। नापि तदे [illegible] वविज्ञानं प्रविशंति तस्य केद
स्यतदुपादानत्वानुपगमान्नचने विज्ञाने प्रवेष्टुं समर्थाः। ज्ञानेनो निर्गंतुं वा पारयंति। तेषामवस्तुत्वादित्यर्थः। कथं तर्हि विज्ञाने
प्रधानेष्वामित्याशंक्याभ्युपगमेपवेत्याह। कार्येति। आभासानां विज्ञानस्य च कार्यकारणता स्यादर्थवत्वादाभासाः सर्वदैव
निरूपयितुमशक्यत्वान्मायामयाः संतो मिथ्यैव भवंतीत्यर्थः। सार्द्धश्लोकस्य तात्पर्यमाह। अलातेनेति। नहि सक्रियत्वमपि किंचि
ज्ञानस्य प्रसज्येत इत्याशंक्याह। सदेति। यदि विज्ञानमचलमभीष्टं तर्हि तत्र जाताद्याभासाः हेत्वभावान्नस्युरित्याशंक्योक्तिमा
वा हीन परिहरति। जात्याभासा इत्यादिना। यतः सदैवाचिंत्याः अतो मृषैव क्षेपः। संक्षेपतस्तात्पर्यमाह। पश्येत्यादिना। यदुक्तं कार्यका
रणाभावादिति तदिदानीमुपपादयितुमुपक्रमते। द्रव्यमिति। अवयवद्रव्यमवयविद्रव्यस्योपादानमवयवगुणाश्चावयविन
कार्येषु समानजातीयेषु समवायिनो दृष्टाः। नचैवमात्मनो द्रव्यत्वं येन समवायित्वं। नच तद्गुणानां क्वचित्समवायित्वं गुणगुणि
भावस्यान्य ॰ त्वस्य तस्मिन्नदुर्वचत्वादित्यर्थः। श्लोकाक्षराणि योजयति। अजमित्यादिना। अवयवावयविविभागविरहितत्वमज
त्वमेकत्वं गुणगुणिभावस्य ॰ चत्वं तत्तेत्यात्मतत्त्वपरामृश्यते। तत्र कार्यकारणभावं दूषयितुं सामान्यन्यायमाह। तेनामिति। अद्रव्य
स्यापि रूपादेः तंत्वादिहारावटशो कुंभादेः कारणत्वं दृष्टमित्यतो विशिनष्टि। स्वतंत्रमिति। अस्तु तर्हि द्रव्यत्वेनान्यत्वेन वात्म
न्यपि कार्यकारणत्वं नेत्याह। नचेति। नहि तत्र गुणावत्वेन द्रव्यत्वं निर्गुणत्वात्। नापि समवायित्वेन तथात्वमन्योन्याश्रयत्वप्रसंग ४१
ता। नच तत्र कृतस्थिरत्वस्य सर्वस्य सन्मात्रत्वेनैकरूपत्वप्रतिभानादतो न तत्र कारणत्वं कार्यत्वं वा प्रतिपत्तुं शक्यमिति कालित
माह। अतद्वृत्तेति। चिकीर्षितकुंभसंवेदनसमनंतरं कुंभः संभवति संभृतश्चासौ कुंभस्तथा तस्य संविदं जनयतीति व्यवहारो विनोप
पद्यते कस्यचिदपि विदग्धदृष्ट्यानुरोधेनानन्यत्वादित्याह। एवमिति। यस्य धर्मादेः शरीरादेश्च कार्यकारणभावो विदग्धदृष्ट्यापु

रस्ता निरस्तः सोपि अन्यत्वाभावेन न सिध्यतीत्याह । एवं हेत्विति । तत्र पूर्वार्द्धं योजयति । एवमित्यादिना । आत्मस्वरूपस्य निर्विकारत्वात्त
स्य तत्स्यात्र सिद्धत्वमित्यादयो यथोक्तहेतवः बाह्या धर्मा घटादयो ऽनात्मानः । न च धर्मशब्दितानां जीवानां चित्तशब्दितानां स्वस्मादा
त्मनो जन्मेति युक्तं तेषां प्रतिबिंबकल्पानां बिंबभूतब्रह्ममात्रत्वादित्यभिप्रेत्याह । विज्ञानेति । उत्तरार्द्धं योजयति । एवं नेति । न फलाद्धे
तुर्जायते नापि फलं हेतोरिति तत्त्वदर्शी उपदिष्टमिदानीं मुमुक्षूणां तदभिनिवेशत्याजनार्थं तदभिनिवेशभावाभावयोः फलं दुःखवानुद्भ
वौ दर्शयति । यावदिति । श्लोकाक्षरा... आकांक्षापूर्वं दर्शनपुरःसरं विवृणोति । ये पुनरित्यादिना । अभिनिवेशवशाद्धेतुफलोद्भवो किं कथ
त्तितदा । यावदिति । अभिनिवेशनिवृत्त्या तदनुद्भवो वा किं स्यादित्याशंक्याह । क्षीणे इति । आकांक्षापूर्वकं पूर्वार्द्धं योजयति । यदीति । तु
त्तरार्द्धं व्याचष्टे । क्षीणे पुनरिति । कूटस्थमद्वितीयमात्मतत्त्वमिच्छता कुतो जन्म नाशो व्यवह्रियेतेत्यत आह । नेत्येति । अविद्यायाः सर्वस्य
जायमानत्वे सति अविद्याविषये नित्यं नास्त्येवेत्याह । शाश्वतमिति । परमार्थतस्तु सर्वमजं कूटस्थमास्थीयते कल्पनां विना विना
शो नास्त्येव हेतुफलादेरित्याह । सद्भावेनेति । पूर्वापरविरोधमाशंकते । नन्विति । ननु तावदात्मनो जन्मविनाशौ तस्य कूटस्थत्वान्नाविततो न्य
स्य तेषां युक्तौ तस्याद्वितीयत्वात्तथा च हेत्वादेर्ध्वंसनस्य जन्मनाशौ न त्वपावकक्रमाविलम्बः । कथमात्मनि समाधानेन मनः समा धानमर्पयते । अ
विविति । तत्र पूर्वभागाक्षरार्थं कथयति । संवृत्येत्यादिना । अविद्याविषये नित्यस्य वस्तुनो ऽभावे फलितमाह । अत इति । द्वितीयार्द्धाक्षरार्थमा
ह । परमार्थेति । जात्यन्धभावे जन्मादिविक्रियाभाववत्तमेवोच्छेदाभावस्तमेवोच्छेदाभावे हेतुं कथयति । तु नेति । यथा पुरो वर्त्तिनि भुजं
गाभावमननुभवन्नविवेकी नास्ति भुजंगो रज्जुरेवायं कथं मृषैव बिभेषीति भ्रांतमभिदधाति भ्रांतस्तु स्वकीयादपराधादेव भुजंगचौर
कल्पभीतिः सन्नपलायते न च तत्र विवेकिनो वचनं मूढदृष्ट्या विरुध्यते तथा परमार्थकूटस्थात्मदर्शनं व्यावहारिकजन्मादिवचने
नाविरुद्धमिति भावः । संवृत्या जायते सर्वमित्युक्तं । तदिदानीं प्रपंचयति । धर्मा इति । तत्राद्यं पादं विभजते । येपीति । प्रसिद्धा वद्यानकल्प
मिति शब्दस्य दर्शयति । तत्त्वेत्येवं प्रकारा इति । एवं प्रकारमेव स्फोरयति । यथोक्तेति । अनंतरप्रकृतासंवृत्तिशब्देनोक्ता तया च संवृत्ये
वते धर्मा जायंते न तु तेषां तत्त्वतो जन्मास्तीत्यर्थः । ननु ते तत्त्वत इत्युक्तं प्रपंचयति । परमार्थत इति । संवृत्यापि जन्म न पारमार्थिकमेवेत्या
शंक्य तृतीयपादं योजयति । यस्तु नरिति । प्रत्येतव्यं जन्मेति शेषः । चतुर्थपादार्थमाकांक्षाद्वारा स्फोरयति । मायेत्यादिना । जन्म मायोप
मं तेषामित्युक्तं तदेव दृष्टांतावष्टंभेन साधयति । यथेत्यादिना । श्लोकाक्षरार्थं पराकांक्षां दर्शयन्योजयति । कथमित्यादिना । यदुक्तं स
द्भावेन ह्यजं सर्वमिति तत्प्रपंचयति । नाजेष्विति । आत्मनि नित्यानित्यकथानावतरतीत्यत्र हेतुमाह । यत्रेति । श्लोकस्य पूर्वार्द्धं व्या
चष्टे । परमार्थतास्त्विति । द्वितीयार्द्धं व्याकरोति । यत्रेत्यादिना । तत्रेति । प्रकृते शुद्धधर्मिष्विति यावत् । आत्मसु नित्यानित्यकथाभावे शब्दागोच
रत्वं हेतुस्तत्र प्रमाणमाह । यत इति । आत्मनः शब्दागोचरत्वे कथमसौ व्याख्यातृभिः शब्दैरेव प्रतिपाद्यतामाचरतीत्याशंक्याविन

पि०र

स्पंदनमात्रमविस्तारसुंदरं प्रतिपाद्यप्रतिपादकरूपं द्वैतमिति सदृष्टांतमाह। यथेति। स्वप्ने प्रतिपाद्यप्रतिपादकद्वैतस्य चित्तस्पंदितमात्र
त्वं जागरिते कथं तथा स्यादित्याशंक्याह। तद्वदिति। चेति। पौनरुक्त्यं श्लोकयोराशंक्य शंकांतरनिरासार्थत्वान्मैवमिति मन्वानः सन्ना
ह। यत्पुनरिति। वाचां गोचरीभूतस्य सत्त्वे द्वैतत्वं तस्मादवक्षाणो दृष्टांतमात्रवदे। स्वप्नदृगिति। यान्पश्यति तेन विद्यंते पृथगित्युत्तरत्र
संबंधः। श्लोकस्य तात्पर्यमाह। इतश्चेति। इतःशब्दार्थमेव स्फुटयन्नसराधि व्याचष्टे। स्वप्नानीति। न ते विद्यंते इति पूर्ववदन्वयः। स्व
स्वदृशो विषयभूतानां तत्र दृश्यमानत्वेऽपि द्वैतभेदमिथ्यात्वे किंमायया तन्मिति पृच्छति। यदेति। उत्तरश्लोकेनोत्तरमाह। उच्यत इति।
श्लोकाक्षराणि योजयन् कर्मधारयं व्यावर्तयति। स्वप्नेति। जीवादिभेदानां स्वप्ने दृश्यमानानामुक्तानां चित्तात्पृथगसत्त्वं साधयति
चित्तमेवेति। नहि द्रष्टा चित्तं चेन्निद्वयं स्वप्ने स्वीकृतं नेत्याह। तथेति। तुच्छत्वस्य चित्तविषयत्वं व्यावर्तयति। तेनेति। स्वप्नावस्थस्य चि
त्तस्य स्वप्नदृग्विषयत्वे फलितमाह। अन्यदिति। दृष्टांतनिविष्टमर्थं दार्ष्टांतिके योजयति। चरन्नित्यादिना। जागरदवस्थो हि पुरुषोपा
न जीवान्पश्यतीत्यत्र जीवशब्देन कार्यकारणसंघातो गृह्यते। चेतनानां दृश्यत्वाभावादिति द्रष्टव्यं। श्लोकद्वयविवक्षितम
नुमानद्वयमाचरति। [illegible]नल इति। अक्षरव्याख्यानं तु दृष्टांतव्याख्यानेनैव स्पष्टत्वान्न पृथगपेक्षितमिति विवक्षित्वाह। उक्तार्थं
मिति। दृश्यदर्शनव्यतिरेकमाह। केवलप्रमाणप्रतिहतं हेतुद्वयमित्याशंक्याह। उभे हीति। दृश्यदर्शने परस्परापेक्षसिद्धिके दृश्ये
सिद्धे तदवच्छिन्नं दर्शनं सिध्यति तस्य च सिद्धौ तदवच्छिन्नं दृश्यं सिध्यतीत्यन्योन्याश्रयान्न दृश्यं दर्शनं सिध्यति। अतो विभागाद
ग्राहिप्रमाणाभावान्न तद्धीधीहेतुद्वयस्येत्यर्थः। किंच संभावनायां प्रमाणप्रवृत्तिर्वक्तव्या। न च दृश्यदर्शन(यो)योरन्यतरस्यापि नैर
पेक्ष्येण संभावना संभवति। अन्योन्याश्रयदोषात्। तथा च परस्परपुरस्कारेणासिध्यदुभयं कल्पितमेव स्यादिति मत्वाह। किंतावि
ति। तद्द्वयं दर्शनं वा किमस्तीति पृष्टे विवेकिना नास्तीत्येवोच्यते प्रागुक्तदोषादित्यर्थः। किंच प्रामाणिकस्यैव प्रामाणिको भेदः
संभवति। न च दृश्यदर्शनयोः स्वरूपे प्रामाणम स्तीत्याह। लक्षणेति। कथं तर्हि प्रमाणप्रमेयविभागो वादिभिर्गृह्यते तद्भ्रांति
दोषवत्त्वादाह। तन्मतेनेति। तत्र प्रथमपादं विभजते। जीववदिति। तज्जीववच्चित्तेन इति संबंधः। अन्योन्यदृश्यत्वमितरेतर[illegible]ग्राह्यत्वं त
देव स्पष्टयति। जीवादीति। द्वितीयपादं व्याचष्टे। तस्मादिति। तदेव स्फुटयति। चित्तं चेति। किं तदस्तीति पृष्टे सति न किंचिदस्ती
त्युच्यते विवेकिना इति योजना। उक्तमेवार्थं दृष्टांतेन विवृणोति। नहीति। इहेति जागरिते। किं। द्वितीयार्द्धं व्याचिख्यासुः पृ ४२
च्छति। कथमिति। तदेवावतार्य व्याकरोति। लक्षणेत्यादिना। यतस्ततो न तद्भेदस्य प्रामाणिकत्वमिति शेषः। कथं तर्हि लौकि
कानां परीक्षकादीनां च प्रमाणप्रमेयविभागप्रवृत्तिरित्याशंक्य चतुर्थपादार्थमाह। तन्मतेनेति। तदेव प्रपंचयति। नहीति।
घटे किं प्रमाणमित्युक्ते ज्ञानमित्युत्तरमतिप्रसंगान्नापि घटज्ञानमन्योन्याश्रयप्रसंगादतो न घटतज्ज्ञानयोर्मानमेयभावः संभवती

मू१

तीत्यर्थः। दृशानामंडजादीनां दर्शनातिरिक्तानां सत्वानुमानस्य भेदग्राहकप्रमाणाबाधकं परिहृत्य दर्शनातिरेकेणाप्येषामसत्वे जन्मादिप्रत्ययबा
धः स्यादित्याशंकां परिहरति। यद्यपीत्यादिना। मायामयस्य निर्निमित्तकस्य वृत्तीवस्य विशेषं बुभुत्समानं प्रत्याह। माय इति। संविदतिरेकेणांडजादीनां
ने७ परमार्थतः सत्वाक्त्वानुमानस्य जन्मादिप्रतिभासबाधः सत्त्वाभावेपि स्वप्नादिषु जन्मादिविकल्पबाहुल्यापलंभादिति। श्लोकत्रयस्य तात्प
र्यमाह। स्वप्नेत्यादिना। परस्तु जन्मादि सत्यमिति मन्यते तं प्रति प्रागुक्तं स्मारयति। न कश्चिदिति। वृत्तानुवादपूर्वकं श्लोकतात्पर्यमाह। व्यवहारे
ति। अत्र स्वशाखिनव्याख्येयानि व्याख्यातत्वादित्याह। कार्यमिति। संवेदनस्य कल्पितदृश्योपहितरूपेणादृश्यानु दृश्यव्यतिरेकेणासत्वमिति
स्पष्टयति तेनोक्तमिदानीं न तत्त्वतः संवेदनस्य विषयसंबंधाभावादात्मैव संवेदनमित्याह। चित्तमिति। प्रकृतार्थं कथयति। निर्वाणमित्यादिना। निर्विषय
त्वेनासंगत्वे सिद्धे श्रुतिमपि संवादयति। असंगोहीति। श्रुतियुक्तिसिद्धमसंगत्वं साधयति। सविषयस्येति। निर्विषयत्वेन चित्तस्यासंगत्वं सं
गीतं तदसंगत्वं शास्त्रादेर्विषयस्य सत्वादित्याशंक्याह। योस्तीति। ननु परमार्थतः वैशेषिकाः षट् पदार्थान्द्रव्यादिसमवायांतानातिष्ठंते
तथा च चित्तस्य कथमसंगत्वं तत्राह। परेति। वैशेषिकपारिभाषिकव्यवहारानुरोधेन पदार्था ये द्रव्यादिः समवायांतः स्युर्न परमार्थभूता
स्ते किंतु संवृत्या प्रतिभांति तस्मादविरुद्धमसंगत्वमित्यर्थः। व्यावर्तयेद्वीचिमुत्थापयति। नन्विति। तत्र यस्मादिति सामान्येनोक्तं हेतुं विशेषतो
मि अनक्ति। शास्त्रेति। आदिशब्देन प्रमाता प्रमाणं प्रमेयमित्यादिगृह्यते। असंगत्वाक्षेपं परिहरति। नैवदोषइति। तत्र निर्विषयत्वे हेतुं प्रश्नपूर्वकं पू
र्वार्द्धयोजनया साधयति। कस्मादित्यादिना। परमार्थतो द्वैतस्यासत्त्वे वाक्योपक्रममनुगुणमादर्शयति। ज्ञानइति। द्वितीयार्द्धं योजयति। य
स्येति। नहि द्व स्य लक्षणं गुणादिपंचकस्य चततो व्यावर्तक प्रातिस्विकलक्षणं प्रतिपत्तिमंतरेण प्रकल्प्यते नैषा तत्र लक्षणात्मक तात्स
तिपत्तौ तत्प्रतिपादितप्रतिपत्तिस्तत्र लक्षणप्रतिपत्तौ च तल्लक्षणांतरं तत्र लक्षणप्रतिपत्तौ च तत्प्रतिपत्तिरिति परंपराश्रयान्न किंचिदपि वस्तुतः सिद्ध्येदित्यर्थः। पत्तिरि
वस्तुतो निर्विषयस्यैव सिद्धत्वादसंगत्वं चित्तस्य प्रागुक्तं संगतमेवेत्युपसंहरति। तेनेति। शास्त्रादिभेदकल्पनायाः संवृतिसिद्धत्वे
तदधीनात्मन्यजत्वकल्पनापि सांवृतिसिद्धैव स्यादित्याशंक्यांगीकरोति। अजइति। कल्पितमात्मन्यजत्वमित्यत्र हेतुमाह। पर
ने९ तंत्रेति। परिणामप्रसिद्धजन्माभावोस्यैवात्मा जायते जन्मशून्यत्वमत्वे तन्निषेधस्याजत्वस्यापि न युक्तमित्यर्थः। श्लोकव्या
वर्त्याशंकामाह। नन्विति। शास्त्रादिभेदस्य कल्पितत्वे तस्य युक्तमात्मन्यजत्वमपि कल्पितं स्यादित्यर्थः। किमयमजोयमात्मेति
व्यवहारस्य कल्पितत्वं किं वा तदुपलक्षितस्वरूपस्येति विकल्प्याद्यमंगीकरोति। सत्यमिति। अजोयमित्यभिधानस्य संवृति
प्रयुक्तत्वात्तद्व्यवहारस्य कल्पितत्वमिष्टमित्यर्थः। केवलायां वस्थायामजोयमित्यभिधानाभावमुपेत्य व्यावर्त्यं दर्शयति। परमार्थे
नेति। आत्मन्यजत्वव्यवहारस्य कल्पितत्वे द्वितीयार्द्धं व्याख्यानेन हेतुमाह। यस्मादिति। परेषां परिणामवादिनां शास्त्रे यापरि
णामसिद्धिस्तामपेक्ष्य तन्निषेधेन योऽजइत्यात्मोक्तः संवृत्यैव न तु जायते अतश्च प्रतियोगिनो जन्मनः संवृतिसिद्धत्वा

तन्निषेधरूपमजत्वमपि तदाह गोवेत्यर्थः। अजत्वादिव्यवहारोपलक्षितस्वरूपस्याकल्पितत्वं तस्य कल्पनाधिष्ठानत्वान्नैव कल्पि
तस्य शास्त्रादेः कल्पितेन प्रमितिहेतुत्वं प्रतिबिंबादौ बिंबादिप्रमितिहेतुत्वस्य संप्रतिपन्नत्वादिति द्रष्टव्यं। ननु ज्ञानस्य क
ल्पितशास्त्रादिजन्यत्वे मिथ्यात्वान्नापुनरावृत्तिफलसाधनत्वं तत्राह। अभूतेति। यदि हि द्वितीयः संसारः सत्यः स्यात् तदा तन्निव
र्तये साधनमपि वस्तुभूतमभिधीयेत मिथ्याभिनिवेशमात्रस्य तु मिथ्योपायजन्येनापि ज्ञानेन वस्तुनिष्ठेन निवृत्तिः सिध्यतीति
श्लोकार्थं कथयति। यस्मादित्यादिना। निर्निमित्तो न जायत इत्युक्तं तदेव प्रपंचयति। यदेति। उत्तमाधमहेतुत्वं विभजते। नातीति। आ
शीर्विर्जितैः फलतस्सारहितैरधिकारिभिरिति यावत्। देवत्वादीत्यादिशब्देनोत्कृष्टजन्म गृह्यते। केवलत्वं धर्मिणां प्राधान्यं। मनुष्य
त्वादीत्यादिशब्देन मध्यमसंयोनयो गृह्यंते। तिर्यगादीत्यादिशब्देनानुक्तमधमजन्म संगृह्यते। वाक्यीयज्ञानादज्ञाननिवृत्तौ त
न्निवृत्त्यर्थं विशिनष्टि। आविद्येति। अविदुषां प्रतीयमानाद्वैतवैविदुषां न प्रतिभातीत्येतद्दृष्टांतेन स्फुटयति। यथेति। उक्तेर्थे हेतुत्वे
न चतुर्थपादं व्याचष्टे। नहीति। तदा न जायते चित्तमिति कालपरिच्छेदप्रतीतेरागंतुकत्वमाशंक्य परिहरति। नानिमित्तस्येति। चि
त्तस्य हि निमित्तवर्जितस्य नित्यसिद्धस्य या सर्वदानुत्पत्तिः सा निर्विशेषा द्वितीया चेत्तत्र हेतुमाह। अजातस्येति। सर्वस्य द्वैत
स्य चित्तदृश्यत्वेन मिथ्यात्वान्नित्यसिद्धस्य पूर्णस्य चिदाकारस्य स्फुरणस्य जन्मायोगात्तदनुत्पत्तिरुक्तलक्षणा युक्तेत्य
र्थः। उक्तमनूद्याकांक्षापूर्वकं श्लोकमवतार्य व्याकरोति। द्वैताभाव इत्यादिना। यथा रूप्यकल्पनाकालेपि शुक्तेः रूप्यत्वस्वा २१२
भाविकं तथा जन्मकल्पनाकालेपि संविदो निर्विशेषाद्वितीयब्रह्मता स्वाभाविकी जन्मभ्रमनिवृत्त्यपेक्षया तु तदा न जा
यत इति उक्तमित्याह। सर्वदेति। न केवलं मोक्षावस्थायामेव चैतन्यस्याजत्वं किंतु घटाद्युपरक्तस्यापीत्यभिप्रेत्याह। सर्वा
वस्थास्विति। सर्वस्यैव चित्तप्रतिबिंबस्य चिंत्यकल्पभ्रमरूपत्वादिति हेतुमभिप्रेत्याह। अद्वयाचेति। तृतीयपादार्थं क
थयति। पूर्वमपीति। तत्र हेतुमाह। यस्मादिति। तस्माद्रज्जुसर्पवद्द्वैतस्य जन्मनश्च द्वैतरूपत्वाद्वस्तुतोऽसत्त्वादिति यावत्। द्वया
भावं स बुध्ध्यैव निर्निमित्तो न जायत इत्युक्तं तदिदानीं प्रपंचयति। बुध्ध्वेति। द्वैताभावोपलक्षितात्मतत्त्वामनाद्यनंतापरमार्थ
भूतं प्रतिपद्य वेदादियोनिप्राप्तो धर्मादिहेतुमसांकर्येणानुतिष्ठन् यदा विद्वानवतिष्ठते तदा सर्वकारणासंस्पर्शरहितं पदम ४३
श्नुवानो न पुनः शरीरं गृह्णातीत्यर्थः। श्लोकं व्याचष्टे। यथोक्तेनेति। द्वैतयत्नादिना हेतुना द्वैतस्य रज्जुसर्पादिवदेवकल्पितत्वं य
५८ थोक्तो न्यायमस्तीत्यन्वेतन्यस्य जन्म निर्हेतुयं निमित्तं तस्याभावतामभावोपलक्षिता सत्ता निमित्ताभावादेवानाद्यनंता तस्मादेव
सत्त्वा [illegible] बुध्ध्येति प्रयोजना। पृथगिति देवत्वादिरूपकृष्टजन्मप्राप्तये धर्मं मनुष्यत्वप्राप्तये धर्माधर्मौ। तिर्यगाद्याधम

योनिशास्त्रमेवाधर्मसंसांकेर्पणाननुतिष्ठन्निति यावत् तत्कृतस्य ज्ञानवृत्तोधर्माद्यनुष्ठानायोगे हेतुं सूचयति तत्कृतेति कार्य
भूतसर्वानर्थराहित्यमुक्त्वा पुनरस्य यामिस्यस्यार्थमाह आविद्येति यथोक्तपदशान्तिःसदा सतीत्याशंक्याह अभूतेति अभि
वाशित्वादिहेतुभिरहंयात्मदर्शनेनच साध्यसाधनात्मनो द्वैतस्य वस्तुनोऽभावं यदा पुमान् बुद्धवांस्तदा वस्तुभावं पुरुषो बु
ध्वैवनिःसंगोऽचित्तं यथा पुनर्न प्रवर्तते तथा तान्निवृत्तिमनुवृत्तो भवतीत्यर्थः अत्रस्तस्माविभजते तस्मादित्यादिना यस्माद
भूताभिनिवेशात्तदनुरूपं चित्तं प्रवर्तते तस्मान्निःसंगं विनिवर्तत इति संबंधः अभूताभिनिवेशमेव विशदयति असतीति
असभिनिवेशस्याविद्याव्यामोहरूपत्वमन्वयव्यतिरेकाभ्यां द्वैमितिवर्कं हीत्युक्तं तदनुरूपस्येत्यत्र तच्छब्देनाभिनिवेशो गृह्यते
तस्यैतस्याभिनिवेशविषयस्येत्यर्थः अभयपदमश्रुतेइत्यत्र हेतुमाह निवृत्तस्येति विहद्वन्द्वमेवेकगम्यत्वाद शेषकल्पना
रहितत्वाच्च सिद्धमोक्षस्याभयादिरूपत्वमित्याह विषयइति अत्रसेरार्थं कथयति निवृत्तस्येत्यादिना योमोक्षोऽविदुषां विष
यादृशीनःसमेव पुनर्विशिनष्टि अजमिति स्वयंप्रभातत्वे हेतुमाह सकृदिति कल्पितस्य सर्वस्याधारत्वाद्धर्मानाशो कथ
मपि परतन्त्रो भवितुमर्हत्यनवच्छिन्नादतः स्वयंज्योतिरित्याह धर्मइति किंचनिधीयते सर्वनिक्षिप्यते सुषुप्त्यादावस्मि
न्निति धातुरात्मा व्यत तथा च सर्वस्यज्ञानसाधनस्योपसंहारे सुषुप्त्यादौ साक्षितयात्मनः सिद्धेः स्वयंज्योतिष्ट्वमेष्टव्य
मित्याह धातुरिति किंचात्मत्वादेवात्मनः स्वयंज्योतिष्ट्वमन्यथा घटवदनात्मत्वप्रसंगादित्याह स्वभावत इति आकाशापू
र्वकं श्लोकमवतार्य तदक्षराणि व्याचष्टे पुनरपीत्यादिना धातुस्वभाव इत्येकं पदं गृहीत्वा व्याचष्टे वस्त्विति विवक्षितार्थ
स्तु पूर्वस्मान्नातिरिच्यते आत्मा वस्तुक्तलक्षणो विवक्षितस्तर्हि किमित्यसौ उक्त्याचार्योपदिष्टस्तथैव सर्वैर्न गृह्यते तत्रा
ह सुखमिति मिथ्याभिनिवेशादात्मतत्वस्य रूपं सुखं सदेवाच्छादितं तस्मादेव वस्तुतोऽसदविदुःखं सर्वदाऽकृष्टीक्रियते
तेनासौ भगवानात्मा उक्त्याचार्योपदिष्टोपि न विस्पष्टो भवतीत्यर्थः श्लोकव्यावृत्त्याशंकां दर्शयति एवमिति स्वयंज्योति
ष्ट्वादिप्रागुपदिष्टप्रकारेणेति यावत् तत्र श्लोकमवतार्य व्याकरोति उच्यतइत्यादिना द्वैतेऽग्रहणमात्रेऽपि कथमात्मस्वरूप
स्य सुखस्यानपायिनोच्छाद्यमानत्वं तत्राह द्वयेति इतस्त्वात्मतत्त्वं यथावदप्रतिभातीत्याह दुःखं चेति यथावदात्मप्रथाभा
वे हेतुमाह परमार्थेति द्वैतोपस्थानेनैव न भातीति शेषः सुखस्याविद्यमानस्य आवरणमविद्यमानस्य दुःखस्याविवरणमिति हि
तेफलितमाह अतइति उक्त्याचार्योपदेशस्य लाभार्थं शून्यत्वं वारयति बहुशइति आत्मनि प्रवचनस्य परिज्ञानस्य दुर्लभत्वे
प्रमाणमाह आश्चर्य इति परीक्षकाभिनिवेशानामप्यात्मावरणत्वसति लौकिकपुरुषाभिनिवेशानां तदावरणत्वं किमु वक्त

मा॰भा॰
आ॰ ष्यमितिसाधयति अस्तीत्यादिना श्लोकस्य तात्पर्यमाह अस्तीति प्रमातादेहादिव्यतिरिक्तोऽस्तीत्याद्यो वैशेषिकाः सोदे
हादिव्यतिरिक्तोपि नासौ बुद्धेर्व्यतिरिच्यते क्षणिकस्य विज्ञानस्यैवात्मत्वादिति द्वितीयो विज्ञानवादिपक्षः तृतीयो दिगंब
रपक्षः चतुर्थे तु शून्यवादिपक्षे शून्यस्यात्मत्वमिति कल्पद्वयेन नाधर्मावीप्सा द्वितीयार्द्धं विभजते नेत्यादिना अनित्येभ्यो घटादिभ्यः सु
खदुःखाद्याकारेण परिणामितया वैलक्षण्यादस्तिभावो योयं प्रमातानोक्तः स चलः सविशेषणः सन् परिणामीत्यर्थः देहाद्यतिरिक्तोपि प्र
माताबुद्ध्यतिरिक्तो नास्तीति यो नास्तिभावः सक्षणिको पि विज्ञो यल्लान्नदभावस्येत्याह नास्तिभाव इति प्रकारचतुष्टयस्यास्तित्वस्य ना
स्तित्वस्य अस्तित्वनास्तित्वस्य नास्तिनास्तित्वस्य चेति यावत् बालिशत्वे सिद्धे फलितं न्यायमुपसंहरति किमुतेति आत्मनो यदा
वस्था मुक्तं तदुपसंहरति कोटीरिति यासां कोटीनां परीक्षकपरिकल्पितनिर्वचननिरूपणीयानां गन्धैरभिन्नविवक्षाविशेषैरात्मा सदा
२८ समावृतस्तास्तत्त्वेनाश्रुतस्य कोटयः सन्तीति तथा चात्मनो यथावदात्मग्रहणमित्यर्थः यदात्मा समावृतो न तर्हि तस्य ज्ञानं ज्ञानेवा
भाक्ति नैराकांक्ष्यं स्यात् तत्त्वांतर परिशेषादित्याशंक्याह भवामिति आत्मा हि वस्तुतोऽस्तीत्यादिकल्पनारहितो येनोपनिषत्प्र
घ वेद्येन प्रतिपन्नः स सर्वज्ञो भूत्वा ज्ञातव्यांतरमपश्यन् परमार्थपंडितो निराकांक्षो भवतीत्यर्थः श्लोकनिरस्यामाकांक्षां दर्शयति कीदृ
गिति किमिति परमार्थतत्त्वे जिज्ञास्यते तेन ज्ञानात्पांडित्यसिद्ध्यर्थमित्याह पदवबोधादिति तत्र श्लोकमवतार्य व्याकरोति आहेत्यादि
ना तेषामेव प्रावादुकानामुपलब्धिनिश्चयैरिति संबंधः यो भगवानुक्तविशेषणः स येन तियोजना ज्ञानवतोपि यावज्जीवादिश्रुतिव
शादग्निहोत्रादिकर्तव्यमित्याशंक्याह प्राप्येति यथोक्तां चतुष्कोटिविनिर्मुक्तामिति यावत् समस्तत्वं ज्ञातव्यविशेषशून्यत्वं परिपू
र्णात्मरूपत्वं तेन ब्रह्मण्यपदप्रयोगप्रमाणमाह सब्राह्मण इति स विद्वान् परोक्षीकृतब्रह्मसतत्त्वः सन् फलावस्थो मुख्यो ब्राह्म
णो भवतीत्यर्थः ब्राह्मणस्य ब्रह्मविदो विद्याफलावस्थस्यैषः स्वभावो महिमेत्युक्तो निर्विकारो वृद्धिह्रासाभावादेकरूपो भवती
ति व्याकुर्वतस्त्वार्थः तदेव पदं विशिनष्टि अनापन्नादिमध्यांतमिति तद्व्याकरोति आदीति अन्वयं दर्शयन् अवशिष्टं भागं व्याच
ष्टे तदेवं प्राप्येति ज्ञानवान् फलावस्थः सन् कृतकृत्यो न तस्य किंचिदस्ति कर्तव्यमित्यस्मिन्नर्थे भगवद्वाक्यं प्रमापयति नैव
ति यावज्जीवादिश्रुतेरविद्वद्विषयत्वाद्विदुषो नाग्निहोत्रादिकर्तव्यमित्युक्तं इदानीं तस्यापि नियोगतोऽस्ति कर्तव्यमित्याशं ५५
क्याह विप्राणामिति ब्रह्मविदो ब्राह्मणानामेष विनयः स्वभावतो न नियोगाधीनां कर्तृत्वतामधिकरोति शमोत्वाभावि
को न नियोगेन क्रियते तेन यादमोपि स्वभावसिद्धत्वान्न नियोगमपेक्षते एवं कूटस्थमात्मतत्त्वं विद्वान् पुमान् शेषविक्रियाशू
न्यब्रह्मस्वरूपेण तिष्ठतीत्यर्थः अक्षरार्थं कथयति विप्राणामित्यादिना तमेव स्वाभाविकं विनयं विवृणोति यदेतदिति एष एव

तिः आत्मस्वभावो गृह्यते परमतनिराकरणमुखेनात्मतत्त्वमवधारितं अधुना स्वप्रक्रियया अवस्थात्रयोपन्यासमुखेनापि तदवधार
यितुं अवस्थाद्वयमुपन्यस्यति सवस्त्विति वृत्तानुवादपूर्वकं प्रकरणशेषस्य तात्पर्यं दर्शयति एवमिति शिष्यस्याध्यारोपदृष्टि
माश्रित्य जाग्रदादिपदार्थपरिशुद्धिपूर्वको बोधप्रकारः स्वप्रक्रिया तया तस्यैवात्मतत्त्वस्य प्रदर्शनपरो ग्रन्थ इत्यर्थः तत्र
जागरितमुदाहरति सवस्त्विति यद्धि प्रातिभासिकं व्यावहारिकं च स्थूलमर्थजातमादित्यादिदेवतानुगृहीतैरिन्द्रियैरुपल
भ्यते जागरितमित्यर्थः द्वयमित्यस्यार्थमाह शास्त्रादीति तत्र श्लोके लोकप्रसिद्धमित्येतदुच्यते लौकिकमिति तद्व्याचष्टे
लोकादिति न केवलमिदं जागरितं लोकप्रसिद्धं किंतु वेदान्तेष्वपि च परंपरया तत्तनोपायत्वेन प्रसिद्धमित्याह एवंलक्षणमिति
स्वप्नोपन्यासपरं उत्तरार्द्धं योजयति अवस्त्विति बाह्येन्द्रियप्रयुक्तो व्यवहारः संवृतिशब्दार्थः सोपि स्थूलार्थविलक्षणे स्वप्ने संभवति
तथा च बाह्येषु करणेषूपसंहृतेषु जागरितवासनानुसारेण मनसः तत्तदर्थाभासाकारावभासनं स्वप्नशब्दितमित्यर्थः शु
द्धमित्यस्य केवलमिति पर्यायं गृहीत्वा विवक्षितमर्थमाह प्रविविक्तमिति तस्यापि लोकप्रसिद्धार्थं लौकिकमित्यनेनो
क्तं तद्दर्शयति सर्वप्राणीति संप्रति सुषुप्तं दर्शयति अवस्त्विति स्थूलसूक्ष्मं च वस्तु विषयभूतं यत्र न विद्यते तत्र ग्राह्येन्द्रिया
र्थसंप्रयोगजन्यो वा स्थूलार्थावगाही वासनात्मको वापि न ज्ञातो पलंभोन संभवति तदशेषविशेषविज्ञानशून्यं सुषुप्तमिति वि
शिनष्टि अनुपलंभं चेति ननु इदं कारणात्मना बुद्धेरवस्थानं न च कारणे लोकप्रसिद्धं कार्यस्यैवावस्थाद्वयात्मकस्य तथात्वादि
त्याभिप्रेत्याह लोकोत्तरमिति तस्य साक्षिप्रसिद्धत्वं विवक्षित्वोक्तमिति स्मृतमिति ज्ञाने ज्ञेयात्मकमवस्थात्रयं तुरीयं च परमार्थ
तत्त्वविद्वदनुभवगम्यमपीत्याह ज्ञानमिति श्लोकगतपदद्वयमनूद्य विवक्षितमर्थं कथयति अवस्त्विति ग्राह्यग्राहकविभागवर्जि
तत्वादेवकृतो लोकातीतत्वमित्याशंक्याह आद्येति सुषुप्तं वेदलौकिकं कथं तु दवगम्यतामित्याशंक्याह सर्वप्रवृत्तीति अव
स्थाद्वयबीजं सुषुप्तमिति एतत्प्रसिद्धं शास्त्रविदामित्याह एवमिति अवस्थात्रयमेव मुक्त्वा ज्ञानपदार्थं कथयति सोपायमिति ज्ञा
नमत्र मनोवृत्तिरूपं विवक्षितं अवस्थात्रयातिरिक्तमविपरीतकपरिकल्पितज्ञेयं संभवतीत्याशंक्याह सर्वेति सर्वैरेव तावादि
कैः शुष्कतर्कजल्पनशीलैः कल्पितस्य कार्यकारणादिरूपस्य वस्तुनोऽवस्थात्रयेणैव नियमेनांतर्भावान्न ज्ञेयांतरं नास्तीत्यभि
न्नप्रमेयविशेषणाज्ज्ञेयं विज्ञेयमुच्यते तेन तदपि नावस्थात्रयातिरिक्तमस्तीत्याशंक्याह विज्ञेयमिति उपायोपेयभूतं यथोक्तं
विदुषामभिमतमिमादर्शयति सदेति आत्मनि विज्ञाते सर्वमिदं विज्ञातं भवतीति श्रुत्यापि प्रतिज्ञानं तदुक्तं वस्तुज्ञानफलं
ति कथयति ज्ञाते चेति ज्ञानज्ञेयवेदने विवक्षितक्रममनुक्रामति पूर्वमित्यादिना यत्पुनरवस्थात्रयातीतं तुरीयं तस्य विज्ञाने

त्वं८ न

५६

मां०भा०

श्री० विवक्षितक्रमं दर्शयति स्थानेति तुरीये विदिते सतीति संबंधः तस्य स्थानत्रयात्मकद्वैताभावोपलक्षितत्वमाह अद्वयइति ज
न्मादि सर्वविक्रियारहितत्वेन कौटस्थ्यं कथयति अजइति कार्यसंबंधस्तत्र नास्तीति वक्तुं कारणभूताविद्यासंबंधाभावम
भिदधाति अभयइति यथोक्ततत्वज्ञानस्य परिपूर्णब्रह्मरूपेणावस्थानं फलमाह स्वयमेवेति ज्ञानवतो यथोक्तं फलं आर्चिरादि
मार्गापेक्षमिति निराकांक्षयति इहेति उक्तज्ञानवतो महाबुद्धित्वे हेतुमाह सर्वलोकेति ज्ञानवतो यथोक्तं ज्ञानं कदाचिद्भवदपि का
लांतरे ऽभिभूतं असत्कल्पं भविष्यतीत्याशंक्याह एवंविदइति श्रुत्याचार्यप्रसादाद्धि दितेस्वरूपे स्वरूपस्फुरणस्य व्यभिचाराभावात्
परिपूर्णब्रह्मस्वरूपता विदुषो भवतीत्युक्तं स्पष्टयति नहीति अवस्थात्रयस्य विज्ञेयत्वनिर्देशात्पारमार्थिकत्वमाशंक्य परि
हरति हेयेति शंकोत्तरत्वेन श्लोकं अवतार्य हेयशब्दार्थं व्याचष्टे लौकिकादीनामिति तान्येव त्रीणि विशिनष्टि जागरितेति कौशलं
वेदांततात्पर्याभिज्ञत्वं अद्वितीयवस्तुविचारचातुर्यपरिनिष्पन्नं श्रवणं बाल्यं दंभदर्पाहंकारादिराहित्यं युक्तितः अतार्था
नुसंधानकुशलत्वं मौनं मुनेः कर्मज्ञानाभ्यासलक्षणं निदिध्यासनं आहितं तान्येतान्याप्तव्यानि यद्यपि ज्ञेयस्य विज्ञेयत्वं युक्तं तथा
पि कथं हेयादीनां विज्ञेयत्वमित्याशंक्याह उपायत्वेनेति तदेव प्रकटयति प्रथमतइत्युक्तं उत्तरार्धं व्याचष्टे तथामिति हेयादीनां ऽसर्व
प्रदविद्याकल्पितत्वान्नास्ति परमार्थत्वं शंकेत्यर्थः यदुक्तं ज्ञेयं चतुष्कोटिवर्जितं परमार्थतत्वमिति तदिदानीं स्फुटयति प्रकृत्येति बहु
वचनप्रयोगमाप्राप्तदोषं प्रत्यादिशति विद्यतइति कल्पितभेदनिबंधनं बहुवचनमित्यर्थः क्वचनेति देशकालावस्थाग्रहणं अ
ल्पमपीति कार्यकारणभावस्यांशांशिभावस्य वोपादानं ज्ञेयशब्दप्रयोगोपन्मुख्यस्य वज्ञेयत्वप्राप्तिं प्रत्युदस्यति आदिबुद्धाइति य
थोक्तरीत्या समुत्पन्नज्ञानस्य फलमाह यस्येति प्रथमपादस्य तात्पर्यमाह द्रष्टृतापीति उक्तमर्थं दृष्टांतेन स्पष्टयति यथेति पदां
तरस्यार्थं कथयति नवेति निश्चितस्वरूपत्वमेव व्यतिरेकद्वारा स्फोरयति नेत्यादिना न खल्वात्मा स्वसत्तायामेवं नेत्यमितिसंदिह्य
मानस्वरूपो भवितुमलं तस्य स्फुरणाव्यभिचारात् तद्रूपत्वस्य प्रागेव साधितत्वादित्यर्थः द्वितीयार्धं व्याकरोति यस्येत्यादिना
मा५ आत्मस्वरूपस्य स्फुरत्वं यथोक्तप्रकारः बोधाख्यो निश्चयो बोधनिश्चयः तस्मिन्निरपेक्षत्वे स्वार्थं परार्थं वा यस्य भवति सोऽ
मृतत्वाय कल्पतइति संबंधः तदेव दृष्टांतेन साधयति यथेत्यादिना इतिशब्दो यथेति अनेन संबध्यते सोमृतत्वायेत्यादिवचनात् ८५
आगंतुकममृतत्वं आशंक्य तत्प्रत्युदस्यति आदिशांताइति श्लोकस्य तात्पर्यमक्षरार्थं च निर्दिशति तथानापीत्यादिना उक्तमेवा
र्थं चतुर्थपादेन संक्षिप्य दर्शयति अजमिति श्लोकार्थमुपसंहरति विशुद्धमिति उक्तरूपतानंगीकारे मोक्षस्यापुरुषार्थता
स्यादित्याह नहीति संसारदुःखोपशममसुखजन्मवाधदिक्रियैन नदाकृतकस्यानित्यत्वमवश्यंभावीत्यर्थः इदानीं मुमुक्षुप्र
नै

चिरेव तन्निष्ठानामित्याह ये केचिदिति । त्र्यादीनामुपानवत् द्वारज्ञानाभावेपि ज्ञातारं तत्र प्रयुक्तस्तदधिकारः संभवतीत्यभिप्रेत्यापीत्युक्तं तत्वज्ञानस्यदृ
ढभवत्वमभ्युपेत्यचेदित्युक्तं चतुर्थपादं व्याचष्टे । तत्त्वेति । ज्ञानवतां विज्ञातं परमार्थतत्वमन्येषामनवगाह्यमित्यत्र प्रमाणमाह सर्वभूतेति सर्वेषां
शेवनार्थमविद्वन्निंदां दर्शयति वैशारद्यं त्विति श्लोकस्य तात्पर्यं दर्शयति ये यथोक्तमिति उत्तरार्द्धमादौ योजयति यस्मादिति तस्मा
दित्युत्तरेणास्य संबंधः प्रथममर्द्धमुक्तेर्थे हेतुत्वेन व्याचष्टे यस्मादित्यादिना समनंतरोक्तस्य यस्मादित्यस्यापेक्षितं पूरयति अत इति
एवमविद्वन्निंदां प्रदर्श्य विद्वत्प्रशंसां प्रसारयति अत इति कूटस्थे वस्तुनि निर्विशेषे येषामसंभावनाविपरीतभावनाविरहितं निर्द्धा
रणारूपं विज्ञानं संभावनोपनीतमस्ति ते हि व्यवहारभूमौ महीतिनिरतिशयेन तत्त्वपरिज्ञानवत्वात् महानुभावा भवंतीत्यर्थः ननु तत्त्व
विषयज्ञानस्य सर्वलोकसाधारणत्वात् तत्त्वज्ञानवतां किमिति प्रशंसा प्रस्तूयते तत्राह तत्त्वेति श्लोकस्य तात्पर्यमाह तदिदमिति
यदिदमुपक्रमात्तदमहात्मभिरनवगाह्यमिति योजनीयं असद्वात्मत्वं सुदृढहृदयत्वं तत्र हेतुः पंडितैरिति अपांडित्यं विवेकाविर
हित्वं तत्र हेतुर्वेदांतेत्यादिना सूच्यते तेषां कोशविपर्ययेण पर्यालोचनापरिचयवराङ्कुरैरित्यर्थः विचारचातुर्याभावाद्वपदार्थ
वाक्यार्थविभागावगमशून्यत्वमाह अल्पप्रज्ञैरिति तर्हि पारमार्थिके तत्त्वे केषामेवमनीषा समुन्मिषतीत्याशंक्य येषां केषां
भूतानां ब्रह्मादीनां स्तंबपर्यंतानां आत्मा परं ब्रह्म तद्भूतस्य विदुषः सर्वत्रात्मभूतस्य सर्वेषु भूतेषु निरुपचरितस्वरूपत्वादे
वपरमहितस्यापरप्रेमास्पदत्वादेवपरमसुखात्मकस्य प्राप्यपुरुषार्थविरहिणो मार्गे देवा विद्यावेलो विपदमन्वेषमाणा
विविधमोहमुपगच्छंतीत्यर्थः महात्मनो ज्ञानवतो गंतव्यपदरहितस्य परिपूर्णस्य गतिरवगंतुमशक्येति निदर्शन
वशेन विशदयति शकुनानामिति अस्ति साम्यमित्युक्तं प्रमेयं तद्विषयनिश्चयवत्प्रमाता प्रमाणं तथाविनिश्चय ज्ञानमिति विध
वस्तुपरिच्छेदे कथं महाज्ञानत्वमित्याशंक्याह अज्ञोपीति अज्ञो धर्माद्यप्रतीतिविंला जीवा विषयस्यं तेतेषु जं ज्ञानं कूटदृष्टि
भु रूपं विकल्पं ब्रह्माचलं आत्मभूतम् पुगम्यते तेषां च मानमेयादिभावस्य कल्पितत्वेपि वस्तुतो वस्तुपरिच्छेदाभावात
दुपपन्नं तज्ज्ञानवतो महाज्ञानत्वमित्यर्थः किं चास्मन्मते ज्ञानस्य यदसंगत्वमंगीकृतं तदपि विषयाभावादेव सिद्ध्यति न तु
मुक्तेर्निर्विषयं मन इति यदुच्यते तदप्यविरुद्धमित्याह यतो नेति आकांक्षापूर्वकं पूर्वार्द्धं योजयति कथमित्यादिना उत्तरार्द्धं
माचष्टे यस्मान्नेति नित्यज्ञप्तिरूपस्यात्मनो संगत्वं प्रागपि सूचितमित्याह आकाशेति कूटस्थब्रह्मैवेत्यमिति स्वमतेज्ञा २६
नमसंगं सिद्धमित्युक्तं मतांतरे पुनः सविषयत्वात् ज्ञानस्यासंगत्वमसंगतं प्रसज्येतेत्याह अणुमात्रेपीति अविद्वद्दृष्ट्या क
स्यचिदपि पदार्थस्य जन्मांगीकारे ज्ञानस्य तदनुबंधित्वेनासंगता योगो बंधध्वंसलक्षणं प्रयोजनं दूरापास्तं भवतीत्याह किं
मुतेति श्लोकान्तराणि व्याकरोति हृत इति विद्वानद्वैतवादी पंचमप्यपरामृशते न चेदावरणच्युतिरिष्यते नहि स्वीकृत
मावरणमित्याशंक्याह अलब्धेति बोद्धृत्वं नहि कथमित्याशंक्य बोधनशक्तिमत्वादित्याह बुध्यंतइतीति शंकोत्तरत्वे
न श्लोकमवतारयति तेषामित्यादिना अविद्वद्दृष्ट्यैवाविद्यावरणं सिध्यति न तत्त्वदृष्ट्येत्यभिप्रेत्य व्याचष्टे अलब्धेति

मा.भा.
श्री

उक्तेर्थे हेतुकथनार्थं विशेषणत्रयमाह यस्मादिति तस्माद्बंधनरहिता इति पूर्वेण संबंधः आत्मनो यथोक्तस्वभावत्वे बोधृत्वं न सि
ध्यतीत्याक्षिपति यद्येवमिति पदांतरेणोत्तरमाह उच्यत इति मुख्यावेव क्रियाकर्त्तारौ प्रकृतिप्रत्ययाभ्यामभिधेयावित्याशंक्य नि
यममुदाहरणाभ्यां निरस्यति यथेत्यादिना किमिति मुख्यबोद्धृत्वे संभाविते तदेव नेष्टमित्याशंक्य ज्ञानस्य विदहृष्ट्या विषयसंबं
धासंभवादित्याह क्रमत इति किंच जीवानां ब्रह्मात्मनाविभुत्वादाकाशवत् क्रियासमवायायोगान्न मुख्यं बोद्धृत्वं सेद्धुमलमित्या
ह सर्वेति ज्ञानमात्रं पारमार्थिकं तत्रैव ज्ञातृज्ञेयादि कल्पितमिति सौगतमतमेवं भवतापि संगृहीतमित्याशंक्याह ज्ञानेनेति तत्र पूर्वा
र्द्धाक्षराणि व्याकरोति यस्मादिति यस्य परमार्थदर्शिनो ज्ञानं तन्न विषयांतरेषु क्रमते किंतु सवितरि प्रकाशवदात्मन्येव प्र
तिष्ठितं यस्मादिष्यते तस्मात्तस्मिन् मुख्यं बोधृत्वं सेद्धुमर्हतीत्यर्थः परमार्थदर्शिनो विशेषणं तायिन इति तद्व्याचष्टे तायिनः सं
त्यादिना आत्मनो मुख्यस्य बोद्धृत्वस्याभावे हेत्वंतरं सर्वे धर्मास्तथेति तद्विभजते सर्वेत्यादिना प्रकरणादौ उक्तमेव किमर्थं
पुनरिहोच्यते तत्राह यदादाविति तदिदमिहोपसंहृतमिति शेषः क्रमते न हीत्यादेरक्षरार्थमुपसंहरति आकाशकल्प
स्येति सर्वे धर्मा रूपस्येत्य स्यार्थं निगमयति तथेति धर्मा न क्रमंते क्वचिदपीति शेषः तथा च नात्मनि मुख्यं बोद्धृत्वं किंत्वौ
पचारिकमिति प्रकृतमुपसंहर्तुमिति शेषः पूर्वार्द्धस्य तात्पर्यमाह आकाशमिति ज्ञानमित्यादि व्याचष्टे ज्ञानेति स
कलदोषविकलं परिपूर्णमनादिनिधनं विज्ञप्तिमात्रमुपनिषदेकसमधिगम्यं तत्त्वमिह प्रतिपाद्यते मतांतरे तु नैवमिति
कुतो मतसांकर्यशंकावकाशमासादयेदित्यर्थः प्रकरणचतुष्टयस्य शास्त्रस्यादाविवांते विपरदेवतानत्यानु विशिष्ट स्प९
स्मरणपुरःसरं नमस्काररूपमंगलाचरणं संपादयति दुर्दर्शइति दुर्विज्ञेयत्वप्रत्यक्षादिप्रमाणाधिगम्यत्व
हेतुं विवक्षित्वा विशिनष्टि अतिगंभीरमिति प्रत्यक्षादिभिरनवगाह्यत्वे कूटस्थत्वं निर्विशेषत्वमशेषसंबंध
विधुरत्वं चेति हेतुत्रयमभिप्रेत्याह अजमित्यादि विशेषणत्रयं तर्हि कुतश्चिदनवगतत्वान्नास्त्येवेति नि
श्चिते तु मुक्तं प्रमाणाधीनत्वात्प्रमेयसिद्धेरित्याशंक्योपनिषद्भिरुतडुमेधया सापाकरण द्वारेणावगम्यमान
मेवमित्याह बुध्वापदमिति तत्र तर्हि सकलविभागविकले कुतो नमस्कारक्रियास्वीक्रियामहे इत्याशंक्या ४९
ह नानात्वमिति यद्यपि वस्तुतस्तस्मिन्नानात्वं नावकल्पते तथापि विद्यासामर्थ्यं मायामवलंब्य काल्पनिकं
नानात्वमनुसृत्य नमस्कारक्रियाप्रचयादिप्रयोजनवती प्रामाणिकैरभिप्रेतेत्यर्थः श्लोकस्य तात्पर्यमाह
शास्त्रेति यदि परमार्थतत्वे शास्त्रस्यादाविवांतेपि नमस्क्रियते तदा तस्याद्यंतमध्येष्वनुसंधेयतया स्तुतिर्विवक्षि

तासिध्यति तेन तदर्थमादावेवावस्थाने विप्रकृष्टीभावस्तद्विषयः श्लोकेनोपदिश्यते तथास्य प्रतिपाद्यस्य ब्रह्मणो मह
महिमत्वं समधिगतमित्यर्थः दुर्दर्शत्वमुक्तं व्यनक्ति अस्तीति सर्वेषामेव यथोक्ते परमार्थतत्त्वे प्रवेशानुपपत्तिमाशं
क्य संप्रदायरहितानां तथात्वेपि तद्दृष्टानामेवमित्याह अकृतेति कौटस्थ्यादिसिद्ध्यर्थं व्याख्यातं पदत्रयमनुवदति अज्ञाम मेव
ति उक्तं वेदान्तैकगम्यं तत्त्वं द्वैताभावोपलक्षितमित्याह इङ्गिति यथोक्तं ब्रह्मलिङ्गज्ञात्वा ज्ञानसामर्थ्यात् ब्रह्मीभूतस्त्वेदाचा
र्यस्तर्हि कथं तस्मै नमस्कर्तुं प्रवर्तते नहि परिपूर्णवस्तु वस्तुतो व्यवहारगोचरतामावरतीत्याशंक्याह अव्यवहार्यमिति
परमार्थतो व्यवहारागोचरत्वेपि परमार्थतत्त्वस्य मायाशक्तिमनुसृत्य व्यवहारगोचरतां परिकल्प्य नमस्कारक्रियात
स्मिन्प्रयोजनवशादाश्रितेत्यर्थः इदानीं भाष्यकारोपि भाष्यपरिसमाप्तौ शास्त्रप्रतिपादितं परदेवतातत्त्वमनुसतन्न स्म
मस्काररूपं मंगलाचरणमाचरत्यज भवतीति यद्ब्रह्माद्यौपनिषत्प्रसिद्धं सर्वव्यापरिच्छेदरहितं तदहं प्रत्यक्भूतं नमस्येताद्वि
यं प्रकृष्टीभावं करोमीति संबंधः प्रणामप्रयोजनमाह प्रणतेति यो हि प्रणतः ब्रह्मणि प्रकृष्टीभूतास्तन्निष्ठाः स्युरिति तेषांय
दुर्विधातत्कार्यात्मकं भयं तदाचार्योपदेशजनितबुद्धिवृत्तिफलकारकं ब्रह्मैव हंति न खलु जडाद्बुद्धिवृत्तिर्वस्तुसामर्थ्य
मन्तरेणाज्ञानं तत्कार्यमपनेतुमलं बुद्धिद्धाबोधो बोधेद्धा वा बुद्धिकृतं फलमादधातीत्यर्थः तस्यैव ब्रह्मणः संप्रति तटस्थ
लक्षणं विवक्षति अजमित्यादिना यद्यपि जन्मादिसर्वविक्रियाशून्यं वस्तुतो ब्रह्म कूटस्थमास्थीयते तथापि तदेव स्व
र्पणतदीयशास्यात्मकेनानिर्वाच्येनाज्ञानवेषवत्तेन योगादाकाशादिकार्यात्मना जन्मसंबंधं प्राप्य जगतो निदानमि
तिव्यपदेशभाग्भवति तथाच श्रुतिसूत्रयोर्ब्रह्मणो जगत्कारणत्वं प्रसिद्धमित्यर्थः यद्यपिचेदं ब्रह्म कूटस्थं तथापि विभु
तयावशान्निर्वर्जितमवति एतेनैवापि यथोक्ताज्ञानमहात्म्यात्कार्यब्रह्मतां प्राप्य गतिमतां गन्तव्यतां बादर्यधिकरणं
न्यायेन प्रतिपाद्यते तदाह अगतिन्वेति यद्यपिचेदं ब्रह्म वस्तुतो निरस्तसमस्तनानात्वमेकरसमद्वितीयमुपनिषद्भिर
भ्युपगम्यते तथापि जीवाजगदीश्वरस्थोऽस्य तद्यदनाद्यनिर्वाच्याविद्यावशादनेकमिव प्रतिभातीत्याह एकमिति॥
केषां दृष्ट्या पुनरनेकत्वं ब्रह्मणोऽवगम्यते तदाह विविधेति विविधाः श्रुते विषयधर्माः श्रुतस्त्राहितया मुग्धं विपर्य
स्तं विवेकविकलमीक्षणं येषां तेषां दृष्ट्या ब्रह्मणोनेकत्वधीः न तु तत्त्वतः शास्त्रदृष्ट्या तु तस्मिन्नेकत्वमेव प्रामाणि
कमित्यर्थः संप्रति ग्रंथप्रणयनप्रयोजनदर्शनपूर्वकं परमगुरुनागमशास्त्रस्य व्याख्यातस्य प्रणेतृत्वेन व्यवस्थिता

भा॰भा॰
श्री॰

नप्रणमति प्रज्ञेति यो हि कारुण्यादिदं ज्ञानाख्यममृतं भूलहेतोस्तदुपकारार्थमुद्दधार तं परमगुरुं नतोस्मीति संबंधः अमुमिति
तस्य पुरोदेशे सान्निहितत्वेनापरोक्षत्वं सूचितं परमगुरुत्वं पूज्यानामपि गुरूणामतिशयेन पूज्यत्वादाचार्यस्य समधिगतमि
त्याह पूज्येति नमस्कारप्रक्रियां प्रकुर्वे इति पादपातैरिति पादेन दीपो पादेन तयोः स्वकीयस्योत्तमांगस्य पातः भूयो भूयो
न श्रीभावास्तोरिति यावत् आचार्येण ज्ञानाख्यममृतं कथंभूतमुद्धृतवानित्यपेक्षायामुक्तं मंतरस्थमिति कस्यांतरस्थमितिवी
श्लो ४ क्षायामाह वेदेति ॐमित्यत्राह प्रज्ञेति मेधा संहिता प्रज्ञैव वैशाखो मंथा तस्य वेधो वेधनं सैव पर्णी तेन क्षुभितो विलोडितो
जलनिधिर्वेदनामा तस्यांतरे स्थितमिदममृतमिति यावत् उक्तस्य ज्ञानामृतस्य प्रसिद्धादमृतादवांतरवैषम्यमादर्शय
ति अमरैरिति यद्धि भगवता नारायणेन क्षीरसागरांतरस्थितममृतमुद्धृतं तेन देवकर्यं चिदमरा लेभिरे इदं तु तैरना
प्यासलभ्यं न भवति ज्ञानसामग्रीसंपन्नैरेव लभ्यत्वादित्यर्थः यदि कारुण्यादिदममृतमाचार्येण वेदोदधेर्भूतोपका
रार्थमुद्धृतं कथं तर्हि कारुण्यं तस्य प्रादुरभूदित्याशंक्याह भूतानीति योयं समुद्भवदुस्तारः संसारः तस्मिन्नविर
तमनवरतं सततमेव यानि जननानि विग्रहभेदग्रहणानि तान्येव गम्हा जलचरादयस्तैर्घोरैः क्रूरैर्भयंकरैर्निम
ग्नानि भग्नसंकल्पानि परवश्यानि भूतानि उपलभ्य कारुण्यमाचार्यस्य प्रादुरासीत् ततश्चेदममृतमुद्धृत्य भ
तेभ्यो दत्वा तानि रक्षितवानित्यर्थः अधुना स्वगुरुस्तत्केविद्याप्राप्तावंतरंगत्वमंगीकृत्य तदीयपादसीरुहयुग सर
लं प्रणमति यस्येति तेषाममस्मद्गुरूणां पादौ सर्वभावे चाद्यनेदेहानां प्रज्ञीभावेनमस्येन श्रीभवामीति संबंधः तौ
वन्नगतः सर्वस्यापि पावनी यौ पवित्रतया पवित्रत्वमापाद्य निर्वापाते तो वस्वसंबंधिनां सर्वेषां भवः संसा
रः तस्य युक्तंभयं स्वकारकेन सद्धापनृत्यपूरुषार्थपरिसमाप्तिं कुर्वीते तानेव स्वगुरून्विशिनष्टि यस्ये ६७
ति मे मम स्वांतमंतःकरणं तस्मिन्मोहो व्याकुलता हेतुरविवेकस्तस्य कारणं यदनाद्यज्ञानं तद्येषां प्रज्ञैवा
लोकस्तस्य भादिप्तिस्तया हतं विनाशमगमत् गतवत् तत्पदाविति संबंधः न केवलमज्ञानमेवाचार्यस्य
प्रसादादपगच्छन्नष्टं भवति किंतु तत्कार्यमनर्थजातं अपि कारणनिवृत्तोस्थितिमलमानमाभीसीभव
तीत्याह मज्जेत्यज्जमिति अ सकृदनेकशो देवतिर्यगादियोनिषु योयमुपजनो नानाविधदेहभेदसंग्रहो

सावेवोदवानुदधिः तस्मिन्नतितरां सन्नेमयावद्धे कदाचिद्यथोक्तमज्ञानं कार्यरूपेणामज्जवन्नभिव्यक्तमवतिष्ठते तदेवचाव
स्थाविशेषेतद्रूपेणोन्मज्जदभिव्यक्तमनर्थकरं परिवर्त्तते तदेवमतिक्रूरे संसारसागरे परिवर्त्तमानं अज्ञानं सकार्यमाचा
र्यप्रसादान्ममापनीतमासीत्यर्थः। न केवलमेकस्य ममैव यथोक्तफलप्राप्तिराचार्यप्रसादादाविर्भूता किंतु तच्चरणपरिचर्या
पराणामन्येषामपि भूयसामित्याह। यत्पादाविति। येषां गुरूणां माहद्यमाश्रितानामन्येषामपि शिष्याणां तदीयशुश्रू
षापराणामेमनीषा जुष्टा श्रुतिमनननिदिध्यासनसहकृते श्रवणज्ञानं शमः शांतिरिंद्रियोपरतिर्विनयो वनातिरनोद्धत्यं ते
षां प्राप्तिरस्या श्रेष्ठात्प्रतिष्ठिता सिध्यति यस्मादमोघा सफला श्रवणादीनां प्राप्तिस्तस्मादनल्पत्वं तस्यां सम्भाव्यते तदेव
माचार्यप्रसादादात्मनोऽन्येषां च बहूनां पुरुषार्थपरिसमाप्तिसंपन्नादाचार्यपरिचरणं पुरुषार्थकामैराचरणीयमित्यर्थः
स्व विष्णुं कृष्णं मायाविरचितविविधद्वैतवर्गं निसर्गाद्यातानर्थसार्थं निरवधिमधुरं सच्चिदेकस्वभावं। आम्नायान्मानमेवं वि
धिमुखविमुखं नेति नेतीति गीतं वंदे वाचां धियां वा परमपि जगतामास्पदं कल्पितानां॥ ॥ गौडपादीयभाष्यस्य व्याख्या
संमताऽ आख्यातृसंमिता निर्मिता सेयमर्पिता पुरुषोत्तमे॥ ॥इति श्रीपरमहंसपरिव्राजकाचार्यश्रीशुद्धानंदपूज्यपादशिष्यभग
वदानंदज्ञानकृतायां गौडपादभाष्यटीकायां चतुर्थप्रकरणं समाप्तं॥ ॥

४८

Mandukya bhashananda Giri

मांडूक्यभाष्यानंदगिरी प० ४८